माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिनिरग्निकद्विज-

सदाचारकर्म-संस्कारकर्म-श्राद्धकर्मादि-

वैदिक-मन्त्र-सङ्ग्रहः

सपरिशिष्टः



सङ्ग्रहीता

शिवराज आचार्यः कौण्डिन्न्यायनः

माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिनिरग्निकद्विज-

सदाचारकर्म-सँस्कारकर्म-श्राद्धकर्मादि-

वैदिक-मन्त्र-सङ्ग्रहः

(सपरिशिष्टः)

सङ्ग्रहीता

शिवराज आचार्यः कौण्डिन्न्यायनः

शाङ्करवेदान्ताचार्यः (त्रि.वि.वि.), साहित्याचार्यः (त्रि.वि.वि.), एम्.ए. (सँस्कृते, त्रि.वि.वि.), एम्.ए. (फिलोसफिविषये, आगरा.), आयुर्वेदशास्त्री (नेपाल.), विशिष्टशास्त्री (त्रि.वि.वि.), विद्यावारिधिः (पिएच्.डि., वाराणसीस्थ-स.सं.वि.वि.), वाचस्पतिः (डि.लिट्., वाराणसी.)

काव्यप्रकाशस्य हैमवत्त्यास् सँस्कृतव्याख्याया रचयिता

कौण्डिन्न्यायनशिक्षाकारो वेदभाषानिघण्टुप्रणेता च

प्रमुद्रणसंशोधकाश् च सम्पादकाः

आमोदवर्धनः कौण्डिन्न्यायनः वेदाचार्यः

प्रमोदवर्धनः कौण्डिन्न्यायनः मीमांसाचार्यः

सुमोदवर्धनः कौण्डिन्न्यायनः वेदान्ताचार्यकक्षाच्छात्त्रः

स्वाद्ध्यायशाला

२०५२

प्रकाशिका
[नारायणी] देवी आचार्यानी

प्रथमं सँस्करणम् १००० पुस्तकानि
२०५२

मूल्ल्यम्-
नैपालीयानि रूप्यकाणि १००/-
भारतीयानि रूप्यकाणि ६५/-

ग्रन्थप्राप्तिस्स्थानम्-
स्वाद्ध्यायशाला, १६८, शिवभक्तमार्ग:,
(च. २/४१९, सरस्स्वतीमार्ग:) लाजिम्पाट्
काष्ठमण्डपनगरम्-२
नेपालदेश:
दूरस्स्वन: ~~४१०३२७~~ ४४३३३२६

सुसङ्गमकयोजकौ-
पुरुषोत्तम: गौतम:
विनोदकुमार: घिमिरे:

प्रस्ताविका

शुक्लाम्बरङ् कृष्णमृगाजिनाङ्कितं
सुकूर्चकवँ विश्शवसृजञ् चतुर्मुखम् ।
कुसुम्भ-दण्ड-स्स्रुव-दर्भ-हस्तकं
सरस्स्वतीशङ् कमलासनम् भजे ॥

वैदिके सनातने वर्णाश्श्रमधर्मे वेदोऽखिलो धर्ममूलमुच्च्यते । तस्माद् वैदिक-सनातन-वर्णाश्श्रम-धर्माऽनुयायिभिर् धर्मकर्म वेदशास्त्रानुसारमेव कर्तव्व्यम् , न तु स्वमनीषिकया; तदुक्तम्-

"यश् शास्त्रविधिमुत्सृज्ज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखन् न पराङ् गतिम् ॥
तस्माच् छास्त्रम् प्रमाणन् ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्त्वा शास्त्रविधानोक्तङ् कर्म कर्तुमिहार्हसि ॥" (गीता. १६।२३,२४)
"स्वाभिप्प्रायकृतङ् कर्म विधिविज्ज्ञानवर्जितम् ।
क्रीडाकर्मेव बालानान् तत् सर्वं स्यान् निरर्थकम् ॥"(उत्तराङ्गिरसे १।१०)
"इष्ट्वा दत्त्वाऽपि वा मूर्खस् स्वर्गन् न हि स गच्छति ।
शङ्काविहितचारित्त्रो यस् स्वाभिप्प्रायमाश्श्रितः ॥" (बौधायनः १।१०।७)
"पूर्वन् निश्चित्त्य शास्त्रार्थयँ यथावत् कर्मकारकः ।
अवेदनिन्दको धीमानधिकारी व्रतादिषु ॥"(चतुर्वर्गचिन्तामणौ व्रत.,पृ. ३२५)
"आचारयुक्तश् श्रद्धालुर् वेदज्ज्ञोऽद्ध्यात्मचिन्तकः ।
कर्मणाम् फलमाप्नोति न्यायार्जितधनश् च यः ॥"
(भविष्य्यपुराणे १।१८१।३८)इति ।

तत्राऽपि वेद-वेदाङ्ग-स्मृति-पुराणा-ऽऽगमेषु पूर्वम्पूर्वं शास्त्रम् बलवत्तरमिति, शास्त्रोक्तेषु कर्मस्स्वपि स्वशाखाश्रुतिसूत्रजातेन विहितमुक्तं सूचितमाकाङ्क्षितन् तस्स्याऽनुकूलमविरुद्धञ् च कर्म यथायथन् तदितरेब्भ्यः प्रबलमिति च बोद्ध्यम् ।

तत्र च वैदिक-सनातन-वर्णाश्श्रम-धर्माऽनुयायिनान् द्विजानां सर्वे धार्मिकक्रियाकलापास् तत्तद्वेदब्राह्म्मणग्रन्थवचनादिशास्त्रविधानानुसारवँ वैदिकादिमन्त्रप्प्रयोगेण कर्तव्व्याः । मन्त्रपूर्विका हि क्रियाऽब्भ्युदयकारिणी भवतीति मुनयो वदन्ति । तथा हि निरुक्ते यास्कः *"पुरुषविद्याऽनित्त्यत्त्वात् कर्म्मसम्पत्तिर् मन्त्रो वेदे"* (१।१।२) इति । पाणिनीय-व्याकरण-भाष्य्यकारः पतञ्जलि-मुनिरपि *"अग्नौ कपालान्यधिश्श्रित्त्याभिमन्त्रयते भृगूणामङ्गिरसाङ् घर्मस्स्य तपसा तप्प्यद्ध्वमिति । अन्तरेणापि मन्त्रमग्निर् दहनकर्मा कपालानि सन्तापयति । तत्र नियमः क्रियते एवङ् क्रियमाणमब्भ्युदयकारि भवतीति"* इति (पस्पशाह्निके) । कात्त्यायनमुनिरपि *"मन्त्रान्तैः कर्मादिः सान्निपात्त्योऽभिधानात्"* इति (श्रौतसूत्रे १।३।५) । स्मृतिषु पुराणेषु च धर्मकर्मणि मन्त्रप्रयोगस्स्याऽऽवश्श्यकत्त्वम् माहात्म्यञ् चाऽनल्पम् प्रतिपादितम् । तथाहि *"अन्नहीनो दहेद् राष्ट्रम् मन्त्रहीनस् तु ऋत्त्विजः । दीक्षितन्*

दक्षिणाहीनो नास्ति यज्ञसमो रिपुः" इति मनुस्मृतौ (११।४०), मत्स्यपुराणे (९३।१११) च; "विधिहीनमसृष्टान्नम् मन्त्रहीनमदक्षिणम् । श्रद्धाविरहितयँ यज्ञन् तामसम् परिचक्षते" इति गीतायाम् (१७।१३); "विना मन्त्रेण यत् कर्म नाऽमुत्रेह फलप्प्रदम्" इति गरुडपुराणे (१।५०।३३); "यदमन्त्रहुतङ् किञ्चिद् वेदबाह्य्यञ्च च यत् कृतम् । अश्श्रद्धया च क्क्रोधेन तद् वस् तृप्त्यै भविष्यति" इति गुहवचनम् भूतानि प्रति स्कन्दपुराणे माहेश्वरखण्डे (२।४७।८७); "तस्मान् मन्त्रैः सदा देयम् पौराणैर् वैदिकैरपि । अन्यथा ते न गृह्ण्णन्ति भूतानामुपतिष्ठति" इति च तत्रैव (२।४०।१६४); "श्रुतिरप्प्यत्र प्राहेदम् मन्त्राणावँ विषये नृप । मन्त्रा दैवता यद्यद् विद्द्वान् मन्त्रवत् करोति देवताभिरेव तत् करोति, यद् ददाति देवताभिरेव तद् ददाति, यत् प्रतिगृह्ण्णाति देवताभिरेव तत् प्रतिगृह्ण्णाति, तस्मान् नाऽमन्त्रवत् प्रतिगृह्ण्णीयान् नाऽमन्त्रवत् प्रतिपद्यते" इति च तत्रैव (२।४०।१६२-१६३); "मन्त्रमूलमिदं सर्वन् त्रैलोक्क्यं सचराचरम् । तेन मन्त्रविहीनन् तु कार्यल्ँ लोके न सिद्ध्यति ॥ यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः । कार्यार्थन् नैव सिद्ध्येत तथा कर्म ह्यमन्त्रकम्" इत्त्यादिकञ्च च स्कन्दपुराणे रेवाखण्डे (१२५।२५,२६), "मन्त्रहीनान् तु यः कुर्याद् भक्तिन् देवस्य भारत । स विडम्बति चात्मानम् पशुकीटपतङ्गवत्" इति च तत्रैव (१२५।४१); "मन्त्रस्नानवँ विना विप्प्रो जलस्नानङ् करोति यः । मनोनिर्मलता तस्स्य नास्ति हि श्श्रुतिचोदिता" इति, "शीतास्स्वप्सु निषिच्च्योष्णा मन्त्रसम्भारसम्भृताः । गृहेऽपि शस्स्यते स्नानमफलं स्यात् तदन्न्यथा (तद्धीनमफलम् बहिः [नदीसमफलवँ विदुः])" इति च चतुर्वर्गचिन्तामणौ श्राद्धखण्डे (पृ. ८७७), पराशरमाधवीये च (प्रथमभागे, पृ. २६७); "मन्त्रपूतन् तु यत् स्नानम् प्राहुः स्नानम् फलप्प्रदम् । न वृथा वारिमग्नानायँ यादसामिव तत् समम्" इति व्यासवचनञ्च च चतुर्वर्ग-चिन्तामणौ श्राद्धखण्डे (पृ. ८८३); "तिलानामप्प्यभावे तु सुवर्णरजतान्वितम् । तदभावे निषिञ्चेत् तु दर्भैर् मन्त्रेण वा पुनः ॥ सुवर्णं रजतन् दर्भान् यथालाभम् प्रयोजयेत् । न मन्त्रेण विना कार्यङ् कदा चित् तर्पणम् बुधैः ॥ बहुगोषु यथा नष्टाम् मातरल्ँ लभते सुतः । मनुना यस्स्य यद् दत्तन् तद् धि तस्स्योपतिष्ठते" इति च याज्ञवल्क्य-जाबालि-मरीचि-वचनानि चतुर्वर्गचिन्तामणौ श्राद्धखण्डे (पृ. ९२०); "मन्त्रहीनङ् क्रियाहीनयँ यः श्राद्धङ् कुरुते द्विजः । मद्भक्तस्याऽसुरेन्द्रस्य फलम् भवति भागतः" इति च वाराहपुराणे (१९०।३५) ।

मन्त्रश्च स एवाऽभ्युदयकारी अदृष्टोत्पादको वा भवति यः खलु शास्त्रसम्मतेन शुद्धकुलीनेन शिखासूत्र-स्नानसन्ध्योपासन-भक्ष्याऽभक्ष्यादिनियमपालनपरायणेन अधिकारिणा शास्त्रसम्मतस्याऽधिकारिणो गृहस्थस्स्य शुद्धकुलीनस्स्य स्वतन्त्रस्स्य ब्राह्मणस्स्य गुरोर् मुखाच् शास्त्रसम्मतनियमानुसारङ् गृहीतः । शिखासूत्ररहितेन स्नानसन्ध्योपासनविधुरेण लशुन-पलाण्डु-क्याकु-ग्रामकुक्कुट-ग्रामशूकराद्यभक्ष्यभक्षकेण मद्यपायिना अकार्यकारिणा वा अद्ध्यापितो-ऽधीतो वाऽपि मन्त्रोऽभ्युदयकारी नैव भवति । तस्माद् वैदिकसनातन-वर्णाश्रम-धर्माऽनुयायिभिर् यथाधिकारं शास्त्रोक्त-नियमानुसारवँ वेदादिमन्त्राणामद्ध्ययनेऽद्ध्यापने च प्रयत्नः कर्तव्यः । एतस्मिन् विषये च "यथा वेदशब्दा नियमपूर्वमधीताः फलवन्तो भवन्त्येवयँ यश् शास्त्रपूर्वकं शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्ज्यते" (पाणिनीयव्याकरणभाष्ये पस्पशाह्निके), "एकश् शब्दस् सम्म्यग् ज्ञातश् शास्त्रान्वितस् सुप्प्रयुक्तस् स्वर्गे लोके कामधुग् भवति" (पा.व्या.भा. ६।१।८४), "तपोविशेषैर् विविधैर् व्रतैश्च विधिचोदितैः । वेदः कृत्स्नोऽधिगन्तव्यस् सरहस्स्यो द्विजन्मना" (मनु. २।१६५), "सँस्कारवद्भिः कर्तव्व्यवँ वेदस्स्याऽद्ध्ययनन् द्विजैः । शुद्धस्स्य फलवत् तत् स्यादन्न्यथा निष्फलं स्मृतम्" (वीरमित्त्रोदयसँस्कारप्रकाशे लघुव्यासः पृ.५१७), "ऋक्पादमप्प्यधीयीत मार्गेणोक्तेन धर्मवित् । न त्वेव चतुरो वेदानन्न्यायेन कदा चन (वीरमित्त्रोदयसंस्कारप्रकाशे व्यासः पृ. ५२६), "असयँयमेन येऽधीता न त्रायन्ति कदा चन । ऋगेका सयँयमस्थेन

अधीता पारयत्त्यपि" (बृहद्योगियाज्ञवल्क्यस्मृतौ ११।१६) इत्त्यादीनि वचनानि स्मर्तव्व्यानि। अविधिना कृतं हि वेदाद्ध्ययनमसुराणाम् वलस्स्य वर्धकम् भवति, न तु देवानाम् वलस्स्य वर्धकम्। प्रतिपादितं हि भगवतो वरदानं वलये मत्स्यपुराणे *"दानान्न्यविधिदत्तानि श्राद्धान्न्यश्श्रोत्त्रियाणि च। हुतान्न्यश्श्रद्धया यानि तानि दास्स्यन्ति ते फलम्। अदक्षिणास् तथा यज्ञा: क्रियाश् चाऽविधिना कृता:। फलानि तव दास्स्यन्ति अधीतान्न्यव्व्रतानि च"* इति (२४६।८४,८५)। एष विषयो वामनपुराणेऽपि प्रतिपादितोऽस्ति (३१।८३-८५; ९२।५५) *"अव्रताधीतवेदेन अन्न्यायाप्तधनेन च। वित्तशाठ्ठ्येन च कृतन् न तथा फलदायि तत्"* इति च स्कन्दपुराणे वैष्णवखण्डे (२।३८।३३)। *"दुरिष्टैर् दुरधीतैश् च दुराचारैर् दुरागमै:। विप्प्राणाङ् कर्मदोषैस् तै: प्रजानान् जायते भयम्"* (कूर्मपुराणे १।३०।४, व्रह्म्माण्डपुराणे २।३१।३६, मत्स्यपुराणे १४४।३५-३६, लिङ्गपुराणे १।४०।४-५, वायुपुराणे १।५८।३६, स्कन्दपुराणे १।२।४०।२२१, सोमाकरकृतवेदाङ्गज्योतिषभाष्ष्ये, श्लो. १७, ४३; पुरुषार्थचिन्तामणौ, पृ. ४०९) इत्त्यादिभिर् वचनैश् च स्वशाखाश्रुतिसूत्त्रादिविवेकविधुरेण अद्ध्ययनादिविद्ध्यनुसरणरहितेन च कृतयँ यजनाद्ध्ययनादिकमपि लोकस्स्याऽपि अनर्थायैव भवतीति च वोधितमेव।

वेदमन्त्राणाम् फलप्प्रदत्त्वस्स्य सम्पादनायैव वेदादिशास्त्रेषु उपनयनस्स्य वेदाद्ध्ययनस्स्य च नियमास् सम्म्यक् प्रतिपादितास् सन्ति। किन्तु अद्यत्त्वे द्विजकुमाराणामुपनयनवँ वेदाद्ध्ययनार्थमेवाऽस्तीत्त्येतावन्मात्त्रञ् ज्ञानमपि द्विजनिकायेऽपि दुर्लभञ् जायमानमस्ति। शास्त्रोक्तनियमानुसारं साङ्गोपाङ्गवँ वेदमद्ध्येतुम् उत्सहमानो द्विजस्तु अद्यत्त्वेऽलव्भ्य एव। न च तादृशस्स्य द्विजस्स्य भरणे समुत्सुक: क्षत्त्रियो वैश्श्यो वा सेवने समुत्सुकस् सच्छूद्द्रो वाऽ पि क्व चिद् दृश्श्यते श्रूयते वा। एतावदेव न, *"सावित्त्रीमात्त्रसारोऽपि वरवँ विप्प्र: सुयन्त्रित:। नाऽयन्त्रितस् त्त्रिवेदोऽपि सर्वाशी सर्वविक्क्रयी"* (मनु. २।११८) इति वचनेनानुज्ज्ञातस् सावित्त्रीमात्त्रसारो द्विजोऽपि अद्यत्त्वे-ऽतीव दुर्लभ:। *किमधिकवँ वक्तव्व्यम्, भावेनाऽपतितो द्विजोऽपि सुदुर्लभ एवाद्यत्त्वे।* अद्यत्त्वे वैदिक-नित्त्यसदाचारकर्म-संस्कारकर्म-श्राद्धकर्मादि-न्न्यूनतम-धार्मिक-क्रियाकलाप-सम्पाद-नायाऽपि गुरुमुखाद् वेदमन्त्रान् अधीतवान् द्विज: प्राप्तुम् महता यत्नेनैव शक्क्यते। निकटे एव भविष्ष्यत्काले तादृशोऽपि द्विज: सर्वथाऽलभ्भ्यताङ् गमिष्ष्यन् प्रतीयते। एतादृश्श्यां स्थितौ अदृष्टश्रोत्त्रियगुरुमुखा अश्श्रुतशुद्धवेदमन्त्रोच्चारणा: परिचितदेश्श्यभाषाक्षरा: कतिपये व्राह्म्मणव्व्रुवा: पौरोहित्त्ये प्रवृत्ता दृश्श्यन्ते। अवोधा अनन्न्यगतिकाश् च जनास् तानेव पौरोहित्त्ये वृणते। मन्त्रविकलत्त्वादपि तादृशै: पुरोहितैस् सम्पादितानि कर्माणि पूर्णफलदानि न भवन्ति। मन्त्रविकलत्त्वेन संस्कारादिकर्मकरणादेवाऽद्यत्त्वे द्विजानां संस्कार एव सर्वथा लुप्तप्रायो-ऽतीव दुर्वलो वा जायमानोऽस्ति। *अत एव वेदादिशास्त्रेषु द्विजानामपि श्रद्धाऽतीव क्षीणाऽनुभूयते। अद्यत्त्वे प्रायस् सर्वेऽपि द्विजा* देहात्मवादिनो भोगलिप्सा-दासीभूता: प्रतीयन्ते। स्वाद्ध्यायात् प्रमादस् सर्वत्त्र प्रसृत:। पुराऽपि अशक्त्या वेदमन्त्रसंहिताया: कल्पशास्त्रस्स्य च सम्पूर्णरूपेणाऽद्ध्ययनवँ विरला एव द्विजा: कुर्वते स्म। अद्यत्त्वे तु अज्ञानेन, श्रद्धाह्रासेन, अशक्तत्त्वेन, परचक्क्राक्क्रान्तिपीडनेन च द्विजा वेदमन्त्रसंहिता-कल्पशास्त्राद्यद्ध्ययने सर्वथोदासते। एतस्स्या महत्त्या: क्षतेर् वैदिकराष्ट्र-विनाशस्स्य चेतनया युक्तो वैदिकराष्ट्रनेताऽपि अद्यत्त्वे कोऽपि न दृग्गोचरीभवति। एतादृशी स्थितिरतीव शोचनीयाऽस्ति। एतादृश्श्यास् स्थिते: परिहाराय सम्पूर्ण-वेदमन्त्र-संहिताया अद्ध्ययने अशक्तानामप्प्युद्धरणाय वैदिकराष्ट्र-रक्क्षणाय च अस्मदीयै: पूर्वजै: कोऽप्प्युपाय: पूर्वमेवोद्भावित:। तदनुसारमेव चाऽस्माकन् देशे सम्पूर्णस्स्य स्वशाखावेदमन्त्र-संहिताग्रन्थस्स्य कल्पशास्त्रस्स्य चाऽद्ध्ययनेऽसम्भविनि सति द्विजास् समन्त्रान् अग्नि-स्थापनापद्धत्त्यादि-पद्धति-ग्ग्रन्थानेव गुरोरधीत्त्य नित्त्यसदाचारकर्म-संस्कारकर्म-

श्राद्धकर्मादि-धार्मिकक्रियाकलापान् निर्वहन्ति स्म। के चन तु नित्त्य-सदाचारकर्म-संस्कारकर्म-श्राद्धकर्मादि-वैदिक-धार्मिक-क्रिया-कलाप-सम्पादनाय आवश्यकान् वैदिक-मन्त्रान् सङ्गृह्य नियमेन पुत्त्रान् शिष्य्याँश् चाऽद्ध्यापयन्ति स्म। गण्डकीप्रदेशस्थे त्रितुङ्गाचलाङ्कितजनपदे पुराकाले प्रचलितधर्मकर्मसु अत्त्यन्तमपेक्षितानावँ वैदिकानाम् मन्त्राणान् द्वादशानावँ विंशतीनां सङ्ग्रहः अष्टादशानावँ विंशतीनां सङ्ग्रहश्चेति द्वौ सङ्ग्रहौ प्रचलितावास्तामिति अस्माभिस् तातपादेब्भ्यश् श्रुतम्। किन्तु तौ सङ्ग्रहौ कालकवलिता-वद्यत्त्वे न दृष्टिगोचरीभवतः। पण्डितदामोदरकोइरालामुखाच् च नेपालपुरेऽपि गृह्य्य-कण्डिकानामको मन्त्रसङ्ग्रहः प्रचलित आसीत्, तस्य प्रथमो मन्त्रश् च एष वस्तोम इत्यादिक आसीदिति श्श्रुतम्। पण्डितसोमनाथघिमिरेव्यासमहोदयाच् च नैपालौखलढुङ्गा-जनपदा-ऽन्तर्गत-कातिग्ग्राम-वास्तव्व्येन ज्योतिषिणा इन्द्रलाल-घिमिरे- महोदयेन लिखित्त्वा १९८२तमे वैक्क्रमेऽब्दे श्रावणस्य तृतीये दिने समापितो भूरस्यादिको वैश्श्वानरायद्-द्वादशकपालोनुमत्त्याऽअष्टाकपाल इत्त्यन्तः कण्डिकानान् त्र्युत्तरैश् चतुर्भिश् शतैर् युक्तो मन्त्रसङ्ग्रहश् च च्छायाप्रतिलिपिग्ग्रहणार्थम् प्राप्तः। भारतस्याऽन्न्येषु प्प्रान्तेष्ष्वपि एतादृशा मन्त्रसङ्ग्रहाः पुराकालेऽपि प्प्रचलिता आसन्निति महाभारतोल्लिखित-सुशर्मनृप-वंशधर-भूप-धर्मचन्द्राऽऽदिष्ट-शत्तुघ्नमिश्श्रकृत-मन्त्रार्थदीपिकाक्ख्यव्याक्ख्यायुत-मन्त्रसङ्ग्रहस्य दर्शनात् श्रीकृष्णदासात्मजविष्णुश्रेष्ठिना मुद्द्रितस्य दण्डकस्य दर्शनाच् च ज्ञायते। उद्भाव्यन्ते हि समयेसमये तत्तत्परिस्थित्त्यनुकूलास् स्वधर्मरक्क्षोपाया मनीषिभिः। मनीषिणान् तदेव पथप्प्रदर्शनम् अनुसृत्त्य एषोऽस्माभिर् माद्ध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शाखाद्ध्या-यिनान् निरग्निकाणाम् ब्राह्म्मणानाङ् कृते नित्त्य-सदाचारकर्म-संस्कारकर्म-श्राद्धकर्मसु आवश्श्यकानावँ वैदिकमन्त्राणां सङ्ग्रहः कृतोऽस्ति। एतस्स्य सङ्ग्रहस्य मन्त्राणाम् अधिकारसम्पन्नाद् गुरुमुखोच्चारणा-ऽनूच्चारणरूप-वेदमन्त्राद्ध्यद्ध्ययन-सम्पन्नाद् गृहस्थाच् शुद्धकुलीनाद् ब्राह्म्मणाद् गुरोर् यथाविधि अद्ध्ययनङ् कृत्त्वा अत्त्यावश्श्यक-धर्मकर्माणि अदृष्टोत्पादन-समर्थरूपेण सम्पाद्द्य स्वधर्म-रक्क्षां स्वकल्ल्याणसाधनं स्वराष्ट्ररक्क्षाञ् च कुर्वतान् द्विजवरा इति कामयते एष जनः। कतिपया-ऽत्त्यावश्श्यक-नित्त्य-नैमित्तिक-वार्षिककृत्त्य-तीर्थयात्रा-स्नानादि-सम्बद्धाः प्रायेण पौराणा मन्त्राश् चैतस्य सङ्ग्रहस्य परिशिष्टे सङ्ग्रहीष्य्यन्ते।

अस्य सङ्ग्रहस्य परिचयो नाम्ना विषयानुक्क्रमणिकया चैव सुखेन लब्धुं शक्क्योऽस्ति। एतस्मिन् सङ्ग्रहे मन्त्राणाम् प्रयोगस्य स्थलानाम् प्रतिपादने वर्तमानकाले वणिग्भिः पुस्तकप्प्रकाशकैः प्रचारितासु नैपालेषु कान्यकुब्जेषु कौर्माचलेषु च ब्राह्म्मणेषु प्रचलितासु नित्त्यकर्म-संस्कारकर्म-श्राद्धकर्मादि-पद्धतिषु दृश्श्यमानानाम् माद्ध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखा-श्रुतिसूत्त्राऽननूकूलपदार्थानान् निरसनेन तासु पद्धतिषु स्वशाखानुकूलपदार्थानां समावेशने सङ्केतश् च स्थानेस्थाने कृतो वर्तते। तदनुसार-मुद्बुद्धा जनाः केनाऽप्य्यंशेन पद्धतेः कार्यमपि अस्मात् सङ्ग्रहात् कर्तुं शक्नुयु-रित्त्यस्माकन् धारणाऽस्ति। स्वकर्मकाण्डस्य शास्त्रसम्मतं सङ्क्षिप्तीकरणङ् कर्तुयँ ये वाञ्छन्ति तेऽप्य्यत्र मार्गनिर्देशनम् प्राप्नुयुरिति; हेमाद्द्र्याद्द्युक्त-प्प्रकारक-सर्वशाखा-विद्ध्युपसंहार-वाचोयुक्तेरसङ्गतत्त्वम् बोद्धुङ् क्षमाः, *"न जातु परशाखोक्तम् बुधः कर्म समाचरेत्। आचरन् परशाखोक्तं शाखारण्डः स उच्च्यते। यः स्वशाखोक्तमुत्सृज्ज्य परशाखोक्तमाचरेत्। अप्प्रमाणमृषिङ् कृत्त्वा सोऽन्धे तमसि मज्जति"* इति संस्कार-गणपति-धृतवँ वसिष्ठवचनम् (पृ. १०), *"सर्वेषामपि पक्क्षाणां स्वगृह्य्योक्तवँ विधीयते। स्वगृह्य्योक्तस्य चाऽभावे ग्रहणं स्वेच्छया भवेत्"* इति श्राद्धकाशिकाधृतवँ वचनम् (पृ. ४८३), *"बह्व्वल्पवँ वा स्वगृह्य्योक्तयँ यस्य यावत् प्रकीर्तितम्। तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत्"* इति हरिहरकृत-स्नानसूत्त्र-भाष्य्यादिधृतवँ वचनम्

(पृ. ४१७), "ऊनो वाऽप्यतिरिक्तो वा यः स्वशाखोदितो विधिः । तेन सन्तनुयाद यज्ञन् न कुर्यात् पारतन्त्रिकम्" इति हेमाद्द्रिकृत-श्राद्धखण्ड-धृतलं लौगाक्षिवचनम् (पृ. ७५८), "तस्माद् विद्वान् सूत्रवेदविहितयँ यावदेव वै ताबदेव प्रकुर्वीत सर्वसौक्ख्याय केवलम्" इत्यादिकं स्मृतिवचनम् (आङ्गिरसस्मृतौ श्लो. ८४८, स्मृतिसन्दर्भे पृ. ३०३७), "श्रुति-स्मृत्युदितङ् कर्म विहितवँ वैदिकस्स्य यत्। तदुक्तेनैव मार्गेण कर्तव्यन् नाऽन्यथाऽऽचरेत्" इति स्मृति-वचनम् (कण्वस्मृतौ श्लो. ६८, स्मृतिसन्दर्भे, पृ. २८६६), "शास्त्रप्रमाण-सूक्ष्मन् तु विधिम् पिण्डस्स्य संस्मरन् । ततो दर्भेषु तत् सर्वमददम् भरतर्षभ" इत्यनुशासनपर्वणि भीष्मवचनम् (८४।२०), "पूर्वैराचरितङ् कार्यम् पूर्वे पितृपितामहाः । प्रपितामहाद्यास् स्युस् ते तैरशास्त्रङ् कृतन् तु चेत् । तत् त्याज्ज्यमेव सुतरां शाखीययँ यत् तदाचरेत् । स्वसूत्रोक्तप्रकारेण स्मार्तङ् कर्म श्रुतीरितम्" इत्यादिकम् मार्कण्डेयादिवचनजातम् (स्मृतिसन्दर्भे षष्ठे भागे, पृ. ७४), "तस्मात् तु धर्मशास्त्रादि-प्रोक्तानि निखिलान्यपि । कर्माणि करणे नित्त्याभ्युदयादिप्रदानि हि । त्यागे तु प्रत्त्यवायैकप्रदानि न भवन्ति हि । तस्मात् तु दर्शिता वेदाः प्रमाणान्यखिलाः पराः" इति लौगाक्षिवचनम् (स्मृतिसन्दर्भे षष्ठे भागे, पृ. २७६), "न वैदिकः पुराणोक्तैः कर्माणि मनुभिश् चरेत् । वेदोक्तैरेव तैर् मन्त्रैर् निखिलानि समाचरेत् ॥ कर्ममद्ध्ये पुराणोक्तमन्त्रो च्चारणमात्रतः । नश्श्येत् तु वैदिकङ् कर्म तस्मात् तु न तथाऽऽचरेत्" इति पूर्वाङ्गिरस-वचनम् (स्मृतिसन्दर्भे, पृ. २९४९, द्र. देवीभाग. ११।३।१२), "सर्वन् तु समवेक्ष्येदन् निखिलन् ज्ञानचक्षुषा । श्रुतिप्रामाण्यतो विद्वान् स्वधर्मे निविशेत वै" इति मनुस्मृतिवचनञ् च(२।८) विमृशन्तः, "कक्षावलम्बिनन् नित्त्यङ् को नाम करकवँ वहन् । तदनादृत्य शौचार्थमन्यतः कर्तुमर्हति" इति कुमारिल-भट्टवचनस्स्य (तन्त्रवार्तिके पृ. १९५) वेदशास्त्राविरोधितर्कोपवृंहितत्त्वञ् चाऽऽकलयितुं समर्था माद्ध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाद्ध्यायिनो ये जनाः प्रचलितासु पद्धतिषु स्थितम् माद्ध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शतपथब्राह्मण-कात्त्यायनत्रिकण्डिकस्नानसूत्र-पारस्करगृह्यसूत्र-कात्त्यायनश्रौतसूत्र-कात्त्यायनश्राद्धकल्पसूत्र-यज्ञपार्श्व-मन्त्रभ्रान्तिहरसूत्रादि-स्वशाखा-श्रुति-सूत्रादि-ग्रन्थ-प्रातिकूल्यम् परिहर्तुं सर्वथा समीहन्ते तेऽप्प्यस्मात् सङ्ग्रहाच् चेतनामवाप्नुयुरिति चाऽस्माकमिच्छाऽस्ति । स्वशाखा-श्रुति-सूत्रानुकूलानान् नित्त्यसदाचारकर्मादिपद्धतीनामचिरादेव प्रकाशने चाऽस्माभिः प्रयत्नः क्रियमाणो वर्तते । परमात्मलीलानुग्रहेणैतत् कार्यं सम्पन्नं स्यादित्त्याशाऽस्ति ।

निकटे भूतकालेऽपि भारतवर्षे नेपालप्रदेशेऽपि माद्ध्यन्दिनीय-वाजसनेयि-शुक्ल-यजुर्वेदशाखाद्ध्यायिकुलजा अनेके महान्तः पण्डिताः, पण्डितराजाः, गुरुराजाः, महाराजगुरवः, विद्वच्छिरोमणयः, महामहोपाद्ध्यायाः, महोपाद्ध्यायाः, वेदमणि-वेदविद्यापारावारीण-कर्मकाण्डसागर-कर्मकाण्डोद्धारक-साहित्त्यसुधाकर-विद्याभूषण-न्यायरत्न-दर्शनालङ्कार-वेदाचार्य-धर्ममीमांसाचार्य-धर्मशास्त्राचार्य - धर्मशास्त्रमनीषि - धर्मशास्त्रधुरीणा-ऽग्निहोत्रि-प्रभृतयः के चन प्रतिगृहीत-परस्सहस्र-स्वर्ण-निष्कमितसुवर्णतुलादानद्रव्याः के चन स्वीकृत-परस्सहस्र-स्वर्णनिष्क-मितहिरण्यगर्भ-प्रतिग्रहाः के चन प्रतिगृहीत-परश्शत-स्वर्णनिष्क-मित-नानादान-द्रव्याः , के चन प्रतिगृहीतद्रव्य-सम्पादित-कुलीनताऽऽढ्यता-विशेषाश् चेत्त्येतादृशा जना बहवः स्थिताः इति श्रूयते; तैरपि स्नानसन्ध्योपासनादिकानि सुताद्युपनयनविवाहादीनि पित्रेकोद्दिष्ट-पार्वणश्राद्धादीनि च धर्मकर्माणि कृतानि कारितानि चैव स्युः; तैरेतादृशीनाम् पद्धतीनावँ विरचनस्स्य प्रचारणस्स्य चाऽऽवश्श्यकता कथन् नाऽनुभूता, वणिग्भिः प्रकाशिताभिरल्पज्ञैस् सम्पादिताभिरेव पद्धतिभिः कथन् तैरपि तानि कर्माणि कृतानि कारितानि च, यदि तैः स्वगृहे स्थिताभिश् शुद्धाभिः पद्धतिभिस् तानि कर्माणि कृतानि कारितानि वा तर्हि कथन् तैस् तासाम् पद्धतीनावँ विषये तत्थ्यम् प्रकाश्श्य आस्तिका वैदिकधर्मानुयायिनो जना नाऽनुगृहीताः, कथवँ वा प्रतिग्रहाधिकारो

वेदविद्याधर्मरक्षायै एव प्रजापतिना ब्राह्म्मणेभ्यो दत्तोऽस्तीति प्रतिपादकानि "तपस तप्त्वाऽसृजद ब्रह्म्मा ब्राह्म्मणान् वेदगुप्तये। तृप्त्यर्थम् पितृदेवानान् धर्मसंरक्षणाय च" (याज्ञ. १।१९८), "सर्वस्यास्य तु सर्गस्य गुप्त्यर्थं स महाद्युतिः। मुखबाहूरुपज्जानाम् पृथक् कर्माण्यकल्पयत" "अद्ध्यापनमद्ध्ययनयँ यजनयँ याजनन् तथा। दानम् प्रतिग्ग्रहञ् चैव ब्राह्म्मणानामकल्पयत" (मनु. १।८७, ८८), "ब्राह्म्मणो जायमानो हि पृथिव्यामधिजायते। ईश्वरः सर्वभूतानान् धर्मकोशस्स्य गुप्तये" (मनु. १।९९), "ब्रह्म्म वै स्वम् महिमानम् ब्राह्म्मणेष्व्वदधाद् अदध्ययना-ऽद्ध्यापन-यजन-याजन-दान-प्रतिग्ग्रहसयुँ-युक्तवँ वेदानाङ् गुप्त्यै" (वौधायन. १।१८।२) इत्त्यादीनि याज्ञवल्क्य-मनु-वौधायानादि-वचनानि तैर् न स्मृतानि विचारितानि वा; कथञ् च तैष् टिड्ढाणञादिघोषणेनैव, रासभादिचिन्तनादिनैव, लाटीनेत्रपुटीपयोधरघटीक्रीडाकुटीदोस्तटी-पाटीर-द्रुम-वर्णनेनैव वाऽपि वयो नीतम्, कथन् तर्ककर्कशविचारचातुरीप्रदर्शने एव चाऽऽतुरीभूय ते गताः, कथं स्वशाखाश्रुतिसूत्रादिकन् तैर् न परिशीलितम् , कथयँ "यद्द्यपि शुद्धलँ लोकविरुद्धन् नाऽऽचरणीयम्" इत्त्युक्त्यैव प्रवाहिता धनि-वलि-मूर्ख-राज-पूजिता धनि-वलि-मूर्ख-शासकानुगृहीता वा, धनि-वलि-मूर्ख-राजनियन्त्रिता धनि-वलि-मूर्ख-शासक-यन्त्रित-निकाय-समुद्गक-सम्पुटिता वा सेवकीभूता गमितस्वातन्त्र्या ब्राह्म्मणा ब्रुवाणास् ते शास्त्रधर्मम् परित्त्यज्ज्य लोकधर्मे गताः, स्वाद्ध्यायाद्ध्ययन-प्प्रवचनविशेषरूपस् स्वकर्तव्यविशेषश् कथन् तैर् नाऽनुभूतः, श्राद्धे विडालवन्धनस्स्य कथा कथन् तैश् चरितार्थीकृतेति च विचारयन्तो वयञ् चकिता भवामः। मन्न्यामहे ऐहलौकिकेऽर्थे सम्मानलाभे च लोलुभ्यमाना हृदयेन व्यवहारेण च विद्या-धर्म-सत्त्य-न्यायविरोधिनोऽपि धर्मद्ध्वजित्त्वेनैव वाऽपि समन्ततो यशोभिकामा अपि वा ते तत्प्रत्त्याशारहिते स्वधर्मस्स्य स्वशाखा-श्रुति-सूत्रादि-विहितस्स्य वेदशास्त्राविरोधिना तर्केणाऽनुसन्धाने सर्वथोदासतेति। अस्तु, विधिनाऽयम् भारो-ऽस्मच्छिरसि समारोपित इतीमम् भारयँ यथाशक्ति वोढुवँ वयम् प्रयतमानाः स्मः।

माद्ध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शाखाद्ध्यायिभिर् वैदिकैश् शुद्धत्त्वेनोच्च्यमानाया जामनगर-निवासिनाऽमृतलाल-शास्त्रिणा संशोधिताया मोहमयी-(मुम्वइ)-नगरे निर्णयसागरयन्त्रालये मुद्रिातायाः शुक्लयजुर्वेदमाद्ध्यन्दिनीयसंहितायाः ; काशीस्थ-साङ्गवेद-विद्यालय-शुक्लयजुर्वेद-प्रधानाद्ध्यापक-दाऊजिभट्टोपाह्व-दीक्षित-गणपतिशर्म-संशोधितायाः काशी-रामघट्टस्थ-हितचिन्तकमुद्द्रणालये मुद्रितायाः शुक्लयजुर्वेदमाद्ध्यन्दिनीय-संहितायाः, दौलतरामगौडसम्पादितत्त्वेन प्रचारितायाः शुक्लयजुर्वेद-संहिता-गुटिकायाः, वेणीरामगौडप्रस्तुतायाः शुक्लयजुर्वेद-संहिता-गुटिकायाः, खेमराज-श्रीकृष्णदास-प्रकाशितायाः, वावूमाधवप्रसादप्रकाशितायाश्च शुक्लयजुर्वेद-माद्ध्यन्दिनीय-संहितायाश्चापि मुद्द्रणे उपलभ्यमाना वह्व्वीरशुद्धीर् दृष्ट्वा, तासान् निराकरणेन स्वशाखावेद-मन्त्रसंहितायाः शुद्धस्स्य पुस्तकस्स्य मुद्द्रापणे प्रचारणे च वैदिकानामौदासीन्न्यञ् चोपलभ्य प्रथमं शुद्धायाः सुलभायाश्च माद्ध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-मन्त्र-ब्रह्म्मयज्ञ-संहितायाः प्रकाशनङ् कर्तुमीहमानैः प्रयतमानैश्चाऽपि अस्म्माभिस् तथा कर्तुमर्थकार्श्यादि-वशादपारयद्भिः गृह्म्यकर्मार्थमावश्श्यकानां सर्व्वेषाम् मन्त्राणाम् मा वा शुक्लयजुर्वेद-शाखा-मन्त्र-ब्रह्म्मयज्ञ-संहितायामनुपलभ्यमानताञ् च पश्श्यद्भिश् चैतस्स्य मन्त्रसङ्ग्रहस्स्य सङ्ग्रहे शुद्धरूपेण मुद्द्रापणे च प्रयत्नः कृतोऽस्ति। अत्र कश् चन दोषोऽवशिष्टश् चेत् सोऽनूचानतरैर् माद्ध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शाखाद्ध्यायिभिर् भूसुरवरैश् शास्त्र-प्रमाणम् प्रस्तुत्त्य निराकरणीयः। एतस्मिन् मन्त्रसङ्ग्रहे वैदिकमन्त्राः अतीर्थोषितानाम् अलसानाम् अश्श्रुत-षडङ्गानां सर्ववर्णान्न्यथात्त्व-जनयितृणाम् अपभ्रंशीकृत-वेदमन्त्राणाम् उच्चारण-प्रथामवधीर्य स्वशाखा-प्रातिशाख्यशिक्षादि-ग्रन्थान्वाख्यात-गुरुपरम्पराऽऽ-

गतोच्चारणानुरूपतया शुद्धरूपेण महता यत्नेन मुद्रापितास् सन्ति । हवनादिमन्त्रेषु मन्त्रेण सह क्व चित् कोष्ठकेषु मुद्रितानि त्यागवाक्यानि अस्माकम् मतेऽनावश्श्यकानि, मन्त्रेष्वेव त्यागार्थस्याऽपि गर्भितत्त्वात् । मन्त्रेषु जकारीभूतयकारस्य कृते य इति लिपिः, सुस्पृष्टवकारस्य कृते ब इति लिपिश्च प्रयुक्ताऽस्ति । उच्चारणगताक्षर-विभागानुकूलया रीत्या पदानावँ व्यञ्जनवर्णा मुद्रिताः सन्ति । पूर्वपदान्तस्थ-व्यञ्जनस्य द्वित्त्वे तत्र द्वितीयो वर्णोऽस्पर्शे परे परपदाद्यक्षरेण सहोच्चार्यते, परपदादिस्थव्यञ्जनस्य द्वित्त्वे तत्र प्रथमो वर्णᳵ पूर्वपदान्तस्थाक्षरेण सहोच्चार्यते, ऊष्मान्तस्थाभ्यᳵ परस्य स्पर्शस्य द्वित्त्वे ऊष्मा ऽन्तस्था वा द्विर्भूतस्पर्शयोर् मद्ध्ये प्रथमेन स्पर्शेन सह पूर्वाक्षरेण सहोच्चार्यते, स्पर्शे परे द्विर्भूतादुत्तरो वर्णोऽपि पूर्वाक्षरेण सहोच्चार्यते इत्त्येतादृशमुच्चारण-गतवैशिष्ट्यञ् च विचार्य पदगतानि व्यञ्जनानि मुद्रितानि सन्ति । एतत् सर्ववँ विचार्य *"यद् ध वाऽ अत्राऽग्गँनिहोत्त्रञ् जुह्वद् द्वाद्येन वा कर्म्मणा वा मित्थ्या करोतत्यात्तँमनसत् तदवद्यतत्यायुषो वा वर्च्चसो वाप् प्रजायै वा"* (मा.वा.शतपथ. २।३।४।१८), *"मन्त्रो हीनस् स्वरतो वर्णतो वा मित्थ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्त्रुस् स्वरतोऽपराधात्"* (पाणिनीय-शिक्षायाम् , श्लो. ५२), *"प्रहीणस् स्वरवर्णाभ्यायँ यो विमन्त्रः प्रयुज्ज्यते । यज्ञेषु यजमानस्य रुषत्त्यायुः प्रजाम् पशून्"* (नारदीयशिक्षायाम् १।१।६), *"मन्त्रास्त्वविधिना प्रोक्ता हीना वा स्वरवर्णतः । यस्मान् न सिद्धिमायान्ति तस्माद् योंज्ज्योऽगदक्क्रमः"* (सुश्श्रुतसंहितायाम् , कल्पस्थाने ५।१३), *"गृह्यकर्मणि ये मन्त्रा ज्ञेयास् स्वाद्ध्यायपाठतः । किञ्च मद्ध्यमवृत्त्या ते न द्रुता न विलम्बिताः"* (रेणुदीक्षितकारिकायाम्), *"स्वरतो वर्णतस् सम्म्यक् सन्ध्यास्नानजपादिषु । सर्वे मन्त्राः प्रयोक्तव्या हीनास् स्युरफला नृणाम्"* (वृहत्पराशरस्मृतौ, २।१५५, स्मृतिसन्दर्भे, पृ. ७०३), *"स्वरवर्णपदैर् वाक्क्यं शुद्धमावर्तयेज् जपन् । न कम्पयेच् शिरो ग्रीवान् दन्तान् नैव प्प्रदर्शयेत्"* (शङ्खस्मृतिवचनं स्मृतिचन्द्रिकायाम् १।१४९), *"नाम्ना वै सोमशर्माऽहं चरको ब्रह्म्मयोनिजः । सूत्त्रमन्त्रपरिब्भ्रष्टो यज्ञकर्मसु निष्ठितः ॥ ततोऽहयँ याजयाम्य-ज्ञालँ लोभमोहप्प्रपीडितः । प्रवर्तमाने यज्ञे तु कदा चिद् दैवयोगतः ॥ उदरे जातशूलोऽहन् तेन पञ्चत्त्वमागतः । अथ पञ्चमहारात्त्रे ह्यसमाप्ते क्रतौ तथा ॥ अस्य यज्ञस्य दोषेण मातङ्ग शृणु मे वचः । राक्षसत्त्वमनुप्प्राप्तस् तेन दुष्टेन कर्मणा ॥ मन्त्रहीनम् मया तत्र स्वरहीनञ् च तत् कृतम् । सूत्त्रहीनन् तथा तत्र प्राग्वंशादि कृतम् मया ॥ परिमाणञ् च रूपञ् च मया तत्त्रोपलक्षितम् । कृतस्य तस्य दोषेण योनिम् प्राप्तोऽस्मि राक्षसीम्"* (वाराहपुराणे १३९।८९-९५) इत्त्यादीनि वचनानि च स्मृत्त्वा एतान् मन्त्रान् शुद्धरूपेण अद्ध्यापयितुम् अध्येतुम् प्रयोक्तुञ् च वैदिक-सनातन-वर्णाश्श्रम-धर्मानुपालनपरैर् भूसुरवरैस् सम्म्यक् प्रयासः कर्तव्य इत्त्यस्मदीया प्रार्थना । यद्यपि के चन *"माद्ध्यन्दिनीय-शाखायान् द्वित्त्वाद्याः सन्ति के चन । धर्मास् ते जपहोमादौ प्रयोज्ज्या वा न वेति चेत् ॥ मन्त्रोच्चारणधर्मत्त्वात् प्रयोज्ज्याः, नैवमर्थयुक् । पाठः प्रशस्तस् तत्त्रास्ति तेनोक्तिर् लोकवद् भवेत्"* (याज्ञिकन्यायमालायाम् (१।३४, ३५) इति वदन्ति, तथापि वयन् तु प्रतिज्ञापरिशिष्टे *"अद्ध्ययनादिकर्म्मसु, अर्थवेलायाम् प्रकृत्त्या"* (३।१२,१३) इत्त्युक्तत्त्वात्, तत्र *"यजन-याजन-जपादि-सङ्ग्रहार्थमादिपदम्"* इति अनन्तदेवयाज्ञिक-रामचन्द्र-नित्त्यानन्दपर्वतीयादिभिर् व्याक्ख्यातत्त्वात्, स्मृत्यन्तरेऽपि वेदमन्त्रास् स्वस्व-शाखाद्ध्ययनधर्मानुसारम् प्रयोज्ज्या इति *"जपङ् कुर्याद् विधानेन मन्त्रन् तत्तत्स्वरान्वितम् । तत्तद्वेदी जपेद् भक्त्या तद्वेदस्स्वरभिन्नतः"* इति वचनेन (कण्ववस्मृतौ श्लो. २५७-२५८, स्मृतिसन्दर्भे पृ. २८८३) ध्वनितत्त्वात् , रेणुदीक्षितेनाऽपि *"गृह्यकर्मणि ये मन्त्रा ज्ञेयास् स्वाद्ध्यायपाठतः । किञ्च मद्ध्यमवृत्त्या ते न द्रुता न विलम्बिताः"* इत्त्युक्तत्त्वात्, वैदिकमन्त्राणावँ व्यञ्जनद्वित्त्वादि-धर्मवत्तयैवोत्पन्नत्वात् , *"मन्त्रा यथोत्पन्नास् तथाविधा एव प्रयोक्तव्याः"* इति जैमिनीय-

धर्ममीमांसायान् द्वादशेऽद्ध्याये (१२।३।२४) निर्णीतत्त्वाच् च स्वसूत्र-स्मृत्त्यपोदित-कण्ठस्स्वर-हस्तस्स्वरवर्ज्जं सर्वेऽद्ध्ययनधर्मा मन्त्रप्प्रयोगेऽवलम्वनीयाः, अर्थनिर्णयवेलायामेव व्याकरणाऽऽगमप्प्रकल्पित-धात्त्वादिरूप-प्रकृतिविचारेणार्थनिर्णयः कार्य इति मन्न्यामहे । अत्त्र मन्त्र-संहितायामागता मन्त्रा स्वराङ्कनयुततया मुद्द्रिताः, शतपथव्राह्म्मणोत्पन्ना भाषिकस्स्वर-वन्तोऽपि मन्त्रा स्वराङ्कनरहिततयैव मुद्द्रिताः, सौत्त्रमन्त्रास्तु तानेनोपदिष्टत्त्वात् स्वराङ्कननिरपेक्षा इति तेऽपि स्वराङ्कनरहिततयैव मुद्द्रिताः । तत्त्र त्रैस्स्वर्य्ययुता मन्त्रा जपवेलायाम् त्रैस्स्वर्यवन्त एव प्रयोज्ज्याः यज्ज्ञकर्मणि तु ऐकश्श्रुत्त्येनैव प्रयोज्ज्याः । "यजतिचोदनाचोदितानामेव यज्ज्ञशव्देन ग्ग्रहणमिति स्मार्तस्थालीपाकोपाकर्मादिप्प्रयोगेष्ष्वपि नैकश्श्रुत्त्यम्" इति के चिन् मन्न्यन्ते (लघुशव्देन्दुशेखरे १।२।३४) । अधिकङ् कौण्डिन्न्यायन-शिक्क्षास्वराद्ध्याये द्रष्टव्व्यम् ।

माद्ध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शाखामन्त्रोच्चारणविषये काऽपि शङ्का उत्पद्द्यते तर्हि तत्समाधानाय अस्मत्प्रणीता कौण्डिन्न्यायनशिक्क्षा तत्त्र स्थानेस्थाने उल्लिखिता आकरग्रन्थाश् चाऽवलोकनीया विवेचकैरिति चाऽस्मदीया विज्ज्ञापना ।

भूमण्डले स्वकीयसैनिकार्थिकवलश्श्रेष्ठतया सह स्वकीयान् धार्मिक-सांस्कृतिक-श्रेष्ठतामपि निरावाधतया स्थापयितुमिच्छुकैꣳ परचक्क्रिभिस् तत्कृपा-भाजनताल्ँ लब्धवद्भिस् तदनुजीविभिरस्मदीयैश् च कैश् चिद् विवेकशिथिलैर् जनैर् भारतवर्षीय-वैदिकसनातनवर्णाश्श्रमधर्मस्स्य तन्मूलभूताया वेदवेदाङ्गादिशिक्क्षायाश् चोन्मूलने क्रियमाणे तत्प्रतीकाराय यथाशक्ति चेष्टमानैरस्माभिर् वैदिकशिक्क्षायाꣳ प्रचाराय वैदिक-सनातनवर्णाश्श्रमधर्मस्स्य रक्क्षणाय चाऽपि प्रयत्नोऽयवँ विशेषतश् च प्प्रारव्धोऽस्ति ।

तत्त्र यास्क-पाणिनि-कात्त्यायन-पतञ्जलि-वररुचि-भर्तृहरिप्प्रभृतिभिश् श्रेष्ठैर् भारतवर्षीयैर् भाषाव्याकरणविद्भिराविष्कृतस्स्य व्याक्ख्यातस्स्य च शाश्श्वतस्स्य भाषाव्याकरणसिद्धान्तस्स्य तिरस्कारङ् कृत्त्वा पाश्चात्त्यगतानुगतिकतया कृतस्स्य नैपालीयभाषाव्याकरणस्स्य राजाज्ज्ञावलेन कृतस्स्य क्रियमाणस्स्य च प्प्रचारस्स्य विरोधे ग्रन्थानावँ विरचनप्प्रकाशनप्प्रचारणैः, नेपालदेशे २०११तमाद् वैक्क्रमाव्दात् प्रभृति शासकैꣳ प्रारव्धस्स्य वेदवेदाङ्गादिसंस्कृतशिक्क्षामूलोन्मूलनकार्यस्स्य प्रतिरोधस्स्य प्प्रयासेन; वैदिक-धर्मदर्शन-वेदवेदाङ्ग-स्मृति-पुराणादिशास्त्र-ज्योतिषाऽऽयुर्वेदादि-प्राच्च्यविज्ज्ञान-वैदिकराष्ट्र-नीत्त्यादिसार्वलौकिकज्ज्ञान-संरक्क्षणप्रचारणपर-वहुमुखसंस्कृतविद्द्यालय-संस्थापनसञ्चालन-प्प्रयासेन; स्वपुत्त्राणावँ वैदिक-सनातन-वर्णाश्श्रमधर्मानुसारिण्ण्यां शिक्क्षायाम् प्रवर्तनेन, वैदिकसदाचारे स्थिरीकरणेन; स्वस्स्य कुले समाजे ग्रामे देशे सम्पूर्णे भारतवर्षे च वैदिक-सनातनवर्णाश्श्रमधर्मस्स्य तदनुकूल-शिक्क्षायाश् च प्प्रचारे यथाशक्ति क्क्रियमाणेन प्प्रयासेन चाऽयम् प्रयत्नो-ऽस्माभिꣳ प्रवर्त्यमानोऽस्ति ।

अयम् प्रयत्नो वैदिकसनातनवर्णाश्श्रमधर्मानुयायिभिर् भारतवर्षवासिभिस् सर्वैर् जनैस् तदनुकूलैरन्न्यैश् च साहाय्यकरणेन सफलीकरणीय इति प्प्रार्थ्यते-

शिवराज आचार्यः कौण्डिन्न्यायनः

माघशुक्लषष्ठ्याम्, २०५१तमे वैक्क्रमेऽव्दे
स्वस्स्य पञ्चपञ्चाशत्तम्म्यान् जन्मतिथौ
भारतवर्षान्तर्गते हिमवत्खण्डस्थे नेपाल–देशे काष्ठमण्डपनगरे ॥

विषयानुक्क्रमणिका

सदाचारकाण्डे

संस्कारकाण्डे

श्राद्धकाण्डे

विप्प्रो वृक्क्षस् तस्स्य मूलन् च सन्ध्या
वेदाश् शाखा धर्मकर्माणि पत्त्रम् ।
तस्मान् मूलयँ यत्नतो रक्क्षणीयन्
छिन्ने मूले नैव शाखा न पत्त्रम् ॥

(द्र. देवीभागवते ११।१६।६)

अथ

माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिनिरग्निकद्विज-

सदाचारकर्म-संस्कारकर्म-श्राद्धकर्मादि-

वैदिक-मन्त्र-सङ्ग्रहः

तत्रादौ सदाचारकाण्डम्

(आचमने मन्त्रः [पारस्क्करोक्तः १।३।१५])

१. ओ३म्[1] । आ मा गन् न्यशसा सᳬ सृज बर्च्चसा[2] ।
तम् मा कुरुप् प्रियम् प्रजानामधिपतिम् पशूनामरिष्ट्टिन् तनूनाम् ॥

(आचमनान्ते प्राणसम्मर्शने मन्त्राः [पार. १।३।२५])

२. वाङ्ङ् मऽ आसस्ये असत्तु[3] । ३. नसोर्म् मेप् प्राणः असत्तु ।
४. अक्ष्णोर्म् मे चक्क्षुः असत्तु । ५. कर्ण्णयोर्म् मेश् श्रोत्त्रम् असत्तु ।
६. बाहब्बोर्म् मे बलम् असत्तु । ७. ऊरब्बोर्म् मऽ ओजः असत्तु ।
८. अरिष्ट्टानि मेऽङ्गानि सन्तु । ९. तनूस्त् तन्न्वा मे सह असत्तु[4] ।

(दन्तकाष्ठेन दन्तानान् धावने मन्त्रः [पार. २।६।१७])

१०. अन्नाद्द्यायब् ब्व्यूहद्ध्वᳬ सोमो राजाऽयमागमत् ।
स मे मुखम् प्रमार्क्क्ष्यते यशसा च भगेन च ॥

---

१. शौचान्तेऽन्यदा च कर्तव्यस्याऽऽचमनस्य विषये "तदोङ्कारेणाऽऽचमनयँ यद् वा व्याहृतिभिर् भवेत् । सावित्त्र्या वाऽपि कर्तव्व्ययँ यद् वा कार्यममन्त्रकम्" इति (स्मृत्यर्थसारे इति वीरमित्त्रोदये आह्निकप्रकाशे, पृ. ९७), "तद् द्विष्ण्णोरिति मन्त्रोऽयं स्मर्तव्व्यः सर्वकर्मसु । आवर्त्यः प्रणवो वाऽपि सर्वस्स्यादिर् यतो हि सः" (बृहत्पराशरस्मृतौ ४।१०४, स्मृतिसन्दर्भे, पृ. ७२३) इत्त्यादीनि वचनानि च द्रष्टव्व्यानि । अस्माभिस्तु मधुपर्कप्रकरणे पारस्क्करेणाचमने प्रोक्तो मन्त्र उपात्तः । (ओङ्कारस्स्य उपर्युल्लिखिता लिपिरमान्न्येति के चन मन्न्यन्ते, किन्तु वेदेऽपि "बिश्श्वे देवासऽ इह मादयन्तामो३म् प्रतिष्ट्ठ" इति रूपेणैव (मासं. २।१३) परम्परागतरूपेण लिक्ख्यमानत्त्वात्, ओङ्कारादिपदेष्ष्वपि एतेनैव प्रकारेण लेखितुमावश्श्यकत्त्वात्, वैदिकानामुच्चारणे अन्न्यस्स्य ओकारस्स्य ओङ्कारस्थस्स्य ओकारस्स्य च विशिष्टस्स्य भेदस्स्याऽभावात्, शिवायोन्नमः इत्त्यादौ सन्धिस्स्थले एतेनैव प्प्रकारेण लेखितुमावश्श्यकत्त्वाच् च ओङ्कारस्स्य वैदिकवाङ्मये एवमाकारेणैव लेखनमुचिततरम् बोद्ध्यम्) । प्रयोगे सर्वेषु मन्त्रेष्ष्वादौ ओङ्कारः प्रयोक्तव्व्य इत्त्युत्सर्गस् सर्वानुक्क्रमसूत्त्रोक्तोऽवगन्तव्व्यः (४।९) ।

२. जलतुम्बिकान्यायेन रेफस्स्योर्ध्वगमनमिति वचनलँ लिपिविषयकन् नोच्चारणीयवर्णविषयकमिति तस्स्योपेक्क्षितुं शक्क्यत्त्वाद् वर्च्चसेत्त्यादिरूपेणोच्चारणीयवर्णक्रमानुसारलँ लेखने मुद्द्रणेऽपि च बाधाभावो बोद्ध्यः ।

३. अद्ध्याहारस्स्याऽपि लौकिकत्त्वान् मन्त्रेण सह सन्ध्यभावः इति कर्कोपाद्ध्यायसम्मतम् (द्रष्टव्व्या कात्त्यायन-श्रौतसूत्त्र-व्याक्ख्या ६।४।२) ।

४. मे-पदस्स्य पुनरुपादानादयम् मन्त्रः पृथगवगम्म्यते । पूर्वमन्त्रेण हृदयदेशस्स्य सम्मर्शनम्, एतेन मन्त्रेण शिरसस् सम्मर्शनङ् कर्तव्व्यम् ।

(गृहेऽङ्गनेऽन्यत्र वा कर्तव्ये प्रातस्स्नानादिके सङ्क्षिप्ते स्नाने मन्त्राः[१])

११. द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव ।
पूतम् पवित्त्रेणेवाज्ज्यमापः शुन्धन्तु मैनसः ॥ मासं. २०।२०॥

१२. आपो हिष्ट्ठा मयोभुवस्त् ता न ऊर्ज्जे दधातन ।
महे रणाय चक्क्षसे ॥ मासं. ११।५०॥

१३. यो वः शिवतमो रसस्त् तस्स्य भाजयतेह नः ।
उशतीरिव मातरः ॥ मासं. ११।५१॥

१४. तस्म्माऽ अरङ्ग मगाम वो यस्स्यक्क्षयाय जिन्न्वथ ।
आपो जनयथा च नः ॥ मासं. ११।५२॥

१५. आपोऽ अस्म्मान् मातरः शुन्धयन्तु घृतेन नो घृतप्प्वः पुनन्तु ।
विश्श्वꣳ हि रिप्प्रम् प्रवहन्ति देवीरुदिदाब्भ्यः शुचिरापूतऽ एमि॥मासं. ४।२॥

(नासिकयोर् मुखस्स्य चाऽनुलेपनस्स्योपग्रहणे मन्त्रः [पार. २।६।१८])

१६. प्राणापानौ मे तर्प्पय चक्क्षुर्म् मे तर्प्पयश् श्रोत्त्रम् मे तर्प्पय ।

(पाण्ण्योरवनेजनस्स्य दक्षिणा निषेचने मन्त्रः [पार. २।६।१९])

१७. पितरः शुन्धद्ध्वम् ।

(अनुलिप्प्य जपनीयो मन्त्रः[२] [पार. २।६।१९])

१८. सुचक्क्षाऽ अहमक्क्षीब्भ्याम् भूयासꣳ सुवर्च्चा मुखेन ।
सुश्श्रुत्त् कर्ण्णाब्भ्याम् भूयासम् ॥

---

१. "(सन्ध्यास्नानमृगन्तेनेति दक्षवाक्क्ये) ऋगन्तेन द्रुपदाद्द्यघमर्षणादिकाब्दैवत्त्यमन्त्र-मात्त्रेणेति तत्त्र (ब्राह्म्मणसर्वस्स्वे) व्याक्ख्यातम्" इति वीरमित्त्रोदये आह्न्निकप्रकाशे (पृ. १३७); "कल्पतरुप्रभृतिधृतस्नानप्रकरणस्थवृहस्पति-वाक्क्यादपरोऽपि सङ्क्षेपः प्रतीयते, यथा- द्रुपदादिव यो मन्त्रो वेदे वाजसनेयके । अन्तर्जले त्रिरावर्त्य सर्वपापैः प्रमुच्च्यते ॥ अस्स्य स्नानप्रकरणेऽभिधानाद् वृहस्पतिना चाऽङ्गान्तरानभिधानादेतावतैव स्नानाङ्गं सिद्ध्यतीति प्रतीयते" इति च तत्त्रैव । "स्नानमब्दैवतैर् मन्त्रैः" इति याज्ञवल्क्यस्मृतौ (१।२२); "वारुणानथवा मन्त्रान् कामतः सम्प्रयोजयेत्" इति च वृहद्योगियाज्ञवल्क्यस्मृतौ (७।१७१); "गृहस्नाने न तु प्प्रोक्तम् मार्जनन् तर्पणादिकम् । नाऽन्तराऽऽचमनम् प्रोक्तम् पश्चादाचम्म्य शुद्ध्यति" इति बोधायन इति आह्न्निकसूत्त्रावल्ल्याम् (पृ. २५) ।

२. "ऊर्ध्वपुण्ड्रन् त्रिशूलꣳ वा वर्तुलन् चतुरस्स्रकम् । अर्धचन्द्रादिकल्ँ लिङ्गꣳ वेदनिष्ठो न धारयेत्" (शूद्द्रकमलाकरे पराशरपुराणवचनम्;द्र.देवीभागवते ११।१५।१०६-११९) इत्त्यादिना, "वेणुपत्त्रदलाकारꣳ वैष्णवन् तिलकं स्मृतम् । अर्धचन्द्रन् तथा शैवं शाक्तेयन् तिर्यगुच्च्यते" (ब्रह्म्मोक्तयाज्ञवल्क्य-संहितायाम् २।३१, स्मृतिसन्दर्भे, पृ. २३४६), इत्त्यादिना, "सन्ध्यात्त्रयम् प्रकुर्वीत धार्यन् चन्दनमेव वै। नाऽन्न्येन पुण्ड्रꣳ कुर्वीत कुङ्कुमाक्तस् सदा भवेत्" (कण्ण्वस्मृतौ श्लो. ५६१, स्मृतिसन्दर्भे, पृ. २९११) इत्त्यादिना च वैदिकानाङ् कृते निषिद्धस् तिलकविधिराह्न्निकाचारनिबन्धिभिः प्रदर्शितः, "दन्तप्प्रक्षालनादीनि नित्त्यमपि" इति पारस्क्करेण (२।६।३२) विहितो भालाद्द्यनुलेपनविधिस् तु तैर् नोल्लिखितः; तथापि पारस्क्करेणोपदिष्टत्त्वात् , "स्नातको नित्यं शुचिः सुगन्धिः स्नानशीलः" इति गौतमेन (१।९।२-३), "ब्राह्म्मणाय बुभुक्षितायौदनन् देहि स्नातायानुलेपनम्" इति यास्केन (७।३।६), "स्नातस्स्य वर्णकन् नित्त्यमार्द्रन् दद्द्याद् विशाम्पते" इति महाभारतकारेण (१३।१०४।८५) चोक्तत्त्वात्, याज्ञवल्क्यस्मृतिवचन-व्याक्ख्याने मिताक्क्षराकारेण च "शुचिरन्तर्बहिश्च स्नानानुलेपनधूपस्रगादिभिः सुगन्धी च भवेत्" इति (१।१३१) व्याख्यातत्त्वाच् च स्नातेन वैदिकेन ब्राह्म्मणेन चन्दनादिनाऽनुलेपनङ् कार्यन् न तु तिलकम् पुण्ड्रꣳ वेति अनुलिप्प्य जपनीयो मन्त्रोऽयमत्त्र सङ्गृहीतो बोद्ध्यः ।

(अपूर्वान्तरीयवासआच्छादने मन्त्रः [पार. २।६।२०])

१९. परिधास्स्यै यशो धास्स्यै दीर्ग्घायुत्त्वाय जरदष्ट्टिरस्म्मि ।
शतञ् च जीवामि शरदः पुरूची रायस्प्पोषमभिसव्व्ययिष्ष्ये ॥

(अपूर्वोत्तरीयवासःप्रच्छादने मन्त्रः [पार. २।६।२१])

२०. यशसा माद् द्यावापृथिवी यशसेन्द्राबृहस्प्पती ।
यशो भगश्च् च मा बिन्दद् द्यशो माप् प्रतिपद्यताम् ॥

(ग्रथितानां सुमनसाम् [मालायाः] प्रतिग्ग्रहणे मन्त्रः [पार. २।६।२३])

२१. याऽ आहरज् जमदग्ग्निः श्रद्धायै मेधायै कामायेन्द्रियाय ।
ताऽ अहम् प्रतिगृह्ण्णामि यशसा च भगेन च ॥

(ग्रथितानां सुमनसाम् [मालायाः] शिरसि आबन्धने मन्त्रः [पार. २।६।२४])

२२. यद् द्यशोऽप्प्सरसामिन्द्रश्च् चकार बिपुलम् पृथु ।
तेन सङ्ग्रथिताः सुमनसऽ आबद्ध्नामि यशो मयि ॥

(सन्ध्योपासने[1] सूर्योपस्थानमन्त्राः कात्त्यायनत्रिकण्डिकस्नानसूत्त्रोक्ताः)

२३. उद् द्वयन् तमसस्प् परिस् स्वः पशश्यन्तऽ उत्तरम् ।
देवन् देवत्त्रा सूर्य्यमगन्न्मज् ज्योतिरुत्तमम् ॥ मासं. २०।२१॥

२४. उदुत् त्यञ् जातवेदसन् देवव्ँ वहन्ति केतवः ।
दृशे बिश्श्वाय सूर्य्यम् ॥ मासं. ७।४१॥

२५. चित्रन् देवानामुदगादनीकञ्
चक्क्षुर्म् मित्त्रस्स्य बरुणस्स्याग्ग्नेः ।
आप् प्राद् द्यावापृथिवीऽ अन्तरिक्क्षꣳ
सूर्य्यऽ आत्त्मा जगतस्त् तस्त्थुषश्च् च ॥ मासं. ७।४२॥

२६. तच् चक्क्षुर्द् देवहितम् पुरस्त्ताच् छुक्क्रमुच्चरत् ।
पशश्येम शरदः शतञ् जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्
प्रब्ब्रवाम शरदः शतमदीनाः स्याम शरदः शतम् भूयश्च् च
शरदः शतात् ॥ मासं. ३६।२४॥

---

१. सन्ध्योपासनात् पूर्वङ् कर्तव्व्यम् असूनान् त्रिरायमनमपि अमन्त्रकमेव मन्त्रानुपदेशात् , याज्ञवल्क्यस्मृत्त्यादीनामपि बैजवापादिकल्पान्तरानुसारित्त्वात् , आश्श्वलायनपरिशिष्टे "समन्त्रः प्राणायामः" इति विशेषितत्त्वादमन्त्रस्स्य प्प्राणायामस्स्याऽपि क्व चिच् छाखाविशेषे प्रसिद्धताया अवगम्म्यमानत्त्वात् , कात्त्यायनत्रिकण्डिकस्नानसूत्त्रे "प्राणायामव्ँ वासशिरसम्" इत्त्यत्र स्वशाखायाम् प्राणायाममन्त्रस्स्याऽनुपदिष्टत्त्वाद् वा असशिरसम् इति च्छेदेन शिरस्सहितमन्त्र-रहितम् इत्त्यर्थस्स्याऽऽश्श्रयितुमावश्श्यकत्त्वात् , 'वा सशिरसम्' इतिच्छेदे तस्स्याऽनेकवेदाद्ध्यायि-वाजसनेयिविषयताया आश्श्रयितुमावश्श्यकत्त्वाच् च; प्रणवमन्त्रकव्ँ वा बृहद्योगियाज्ञवल्क्य-स्मृतौ प्राणायामेऽपि प्रणवप्प्रयोगस्स्य विहितत्त्वात् (२।१४७-१४८); प्रणवस्स्य सर्वकर्ममन्त्रत्त्वाच्च । सूर्यम् प्रति अम्बुमिश्श्रपुष्प-क्क्षेपणमपि अमन्त्रकमेव, मन्त्रानुपदेशात् , षड्विंशब्राह्म्मणे क्षेपणीयानामपामभिमन्त्रणस्स्याऽनुक्तत्त्वादस्स्य पक्क्षस्स्याऽपि समूलतायाः प्रतीयमानत्त्वात् , प्रणवमन्त्रकव्ँ वा तस्स्य सर्वकर्मसु विनियोगस्स्य सर्वानुक्क्रमसूत्त्रे प्रोक्तत्त्वात् । ओङ्कारमन्त्रस्तु पूर्वं सङ्गृहीत एव ।

२७. तत् त्सवितुर्ब् बरेण्ण्यम्[1] भर्ग्गो देवस्स्य धीमहि ।
धियो यो नःप् प्रचोदयात्[2] ॥ मासं. ३।३५, २२।९, ३०।२॥

(स्मृतिपुराणाद्युक्तपवित्रजपयज्ञमन्त्रः[3])

२८. ओ३म् । (भूर्ब् भुवः स्वः) । तत् त्सवितुर्ब् बरेण्ण्यम् भर्ग्गो देवस्स्य धीमहि ।
धियो यो नःप् प्रचोदयात्[4] ॥ मासं. ३६।३ ॥

(उष्णीषेण शिरसो वेष्टने मन्त्रः [पार. २।६।२५])

२९. युवा सुवासाः परिवीत आगात् त्सऽ उश् श्रेयान्त् भवति जायमानः ।
तन् धीरासः कवयऽ उन्नयन्तिस् स्वाद्ध्यो मनसा देवयन्तः ॥ पार. २।२।९ ॥

(कर्णवेष्टकावन्धने मन्त्रः [पार. २।६।२६])

३०. अलङ्करणमसि भूयोऽलङ्करणम् भूयात् ।

(अक्क्ष्णोरञ्जने मन्त्रः [पार. २।६।२७])

३१. बृत्रस्स्यासि कनीनकश्च् चक्क्षुर्द्दाऽअसि चक्क्षुर्म् मे देहि॥मासं. ४।३॥

(आत्मन आदर्शे प्रेक्षणे मन्त्रः [पार. २।६।२८])

३२. रोचिष्ण्णुरसि ।

(कृष्णाजिनादाने मन्त्रः [उञ्छशास्त्रोक्तः[5]])

३३. शर्म्मासि ॥ मासं. १।१४॥

---

१. जपादिषु विधिविशेषानुसरणेन महाव्याहृतीनाम् प्रयोज्ज्यत्त्वेऽपि अत्र स्वसूत्रस्स्वरसात् तासामप्प्रयोगः ।

२. विभ्राडित्त्यनुवाक-पुरुपसूक्त-शिवसङ्कल्प-मण्डलब्राह्म्मणानाम् प्रयोगो मद्ध्याह्न्नसन्ध्या-विषयः शक्तानामेव ऐच्छिकश्चेति तान्यत्र न सङ्गृहीतानि ।

३. सन्ध्योपासनोत्तरकाले कर्तव्व्यः पवित्रजपयज्ञो मनुस्मृतौ [२।७८, २।२२२], याज्ञवल्क्यस्मृतौ [१।१०१], बृहद्योगियाज्ञवल्क्यस्मृतौ [७५५] चोक्तो दृश्श्यते । मनुस्मृतौ याज्ञवल्क्यस्मृतौ च सन्ध्योपासनस्स्य पृथगुल्लिखितत्त्वमपि द्रष्टव्व्यम् [मनु. २।१०१-१०३, याज्ञ. १।२२, १।९८], स्वाद्ध्यायाद्ध्ययनमपि पृथगेवोल्लिखितम् मनुना [२।१०४, ३।७५, ८१], याज्ञवल्क्येन [१।१०२, १०४] चेति च न विस्मरणीयम् । अन्न्यासु च स्मृतिषु एष विषयः प्राप्प्यते [विष्णुस्मृतौ ६४।३६,३७, शङ्खस्मृतौ १०।२०,२१; विश्श्वामित्रस्मृतौ १।१६, लघुव्यास-संहितायाम् २।२८, वाधूलस्मृतौ श्लो. १२६-२७]। वीरमित्त्रोदये आह्न्निकप्रकाशेऽपि जपयज्ञः प्रतिपादितोऽस्ति (पृ. ३११)।

४. पवित्रजपयज्ञानन्तरम् पठनीयाः परम्परागताः के चन श्लोकाः -

गुरुर् ब्रह्म्मा गुरुर् विष्णुर् गुरुर् देवो महेश्श्वरः ।
गुरुरेव परम् ब्रह्म्म तस्मै श्रीगुरवे नमः ॥
अज्ञानतिमिरान्धस्स्य ज्ञानाञ्जनशलाकया ।
चक्क्षुरुन्मीलितयँ येन तस्मै श्रीगुरवे नमः ॥
अखण्डमण्डलाकारवँ व्याप्तयँ येन चराचरम् ।
तत् पदन् दर्शितयँ येन तस्मै श्रीगुरवे नमः ॥

५ उञ्छशास्त्रोक्ता मन्त्रा इदानीवँ व्यवहारे अप्प्रचलिता अपि याज्ञवल्क्यस्मृतिमनुस्मृतिपराशर-स्मृत्यादिषु विश्श्वरूप-मेधातिथि-विज्ञानेश्वर-लक्ष्मीधरादिकृतधर्मशास्त्रनिवन्धेषु चाऽचर्चिते स्वशाखाग्रन्थोक्ते सम्वद्धे विषये विदुषान् ध्यानमाक्रष्टुमत्त्रोल्लिखिता वोद्ध्याः । एवमेवाऽन्न्येऽपि के चन मन्त्राः । प्रातस्स्नान-सन्ध्योपासन-पवित्रजपयज्ञानन्तरयँ यायावरेण घोराचारिकेण वा गृहस्थेन ब्राह्म्मणेन उञ्छार्थं निष्क्रमणे कर्तव्व्ये आवश्श्यकोऽन्न्योऽपि विधिस्तादृश एव वोद्ध्यः ।

(समाहारादाने[1] मन्त्रः [उञ्छशास्त्रोक्तः])

३४. देवस्स्यंत् त्वा सवितुःप्प् प्रसुवेशश्विनोर्ब्बाहुब्भ्याम् पूष्ण्णो
हस्त्ताब्भ्याम् । आददे ॥ मासं. १।२४॥

(उञ्छपात्रादाने मन्त्रः [उञ्छशास्त्रोक्तः])

३५. देवस्त् त्वा सविता पुनातु बसोः पवित्त्रेण शतधारेण सुप्प्वा ॥मासं.१।३॥

(अपूर्वच्छत्त्रप्रतिग्ग्रहणे मन्त्रः [पार. २।६।२९])

३६. बृहस्प्पतेश्च् छदिरसि पाप्प्ँमनो मामन्तर्द्धेहि तेजसो यशसो माऽन्तर्द्धेहि ।

(अपूर्वोपानत्प्रतिमोचने मन्त्रः [पार. २।६।३०])

३७. प्रतिष्ट्ठेस्त् थो बिश्श्वतो मा पातम् ।

(वैणवदण्डादाने मन्त्रः [पार. २।६।३१])

३८. बिश्श्वाब्भ्यो मा नाष्ट्ट्राब्भ्यस्प् परिपाहि सर्ब्बतः।

(दिशामुपस्थाने मन्त्राः [उञ्छशास्त्रोक्ताः])

३९. दिशःप्प् प्रदिशऽ आदिशो बिदिशऽ उद्दिशो दिग्ग्भ्यः स्वाहा ॥ मासं. ६।१९॥

(वर्षत्यप्रावृतस्य व्रजने मन्त्रः [पार. २।७।७])

३९ (ख). अयम् मे बज्ज्रः पाप्प्ँमानमपहन्नत् ।

(ब्राह्म्मणमब्भ्येत्त्य तम् प्रदक्षिणीकृत्त्य जपनीयो मन्त्रः [उञ्छ.])

४०. नमोऽस्त्तु भुविदेवताब्भ्यः ।

(अश्श्वत्थमब्भ्येत्त्य तम् प्रदक्षिणीकृत्त्य जपनीयो मन्त्रः [उञ्छ.])

४१. अश्श्वत्थे वो निषदनम् पर्ण्णे वो बसतिष् कृता ।
गोभाज इत्त् किलासथ यत् त्सनवथ पूरुषम् ॥ मासं. १२।७९,३५।४॥

(समानवृत्तिकमब्भ्येत्त्य तम् प्रदक्षिणीकृत्त्य जपनीयो मन्त्रः [उञ्छ.])

४२. नमोऽस्त्तु सप्प्तर्षिब्भ्यः ।

(सिचाऽवधूतस्स्य सिगभिमन्त्रणे मन्त्रः [पार. ३।१५।१६])

४३. सिगसि न बज्ज्रोऽसि नमस्त् तेऽ अस्त्तु मा मा हिꣳसीः ।

(स्तनयित्त्वभिमन्त्रणे मन्त्रः [पार. ३।१५।१७])

४४. शिवा नो बर्षाः सन्तु शिवा नः सन्तु हेतयः ।
शिवा नस्त् ताः सन्तु यास्त् त्वꣳसृजसि बृत्रहन् ॥

(वाश्श्यमानायाश् शिवाया अभिमन्त्रणे मन्त्रः [पार. ३।१५।१८])

४५. शिवो नामाऽसिस् स्वधितिस्त् ते पिता नमस्त्तेऽअस्त्तु मा मा हिꣳसीः ॥३।६३॥

(वाश्श्यमानस्स्य कृष्णशकुनेरभिमन्त्रणे मन्त्रः [पार. ३।१५।१९])

४६. हिरण्ण्यपर्ण्ण शकुने देवानाम् प्रहितङ्गम ।
यमदूत नमस्त् तेऽस्त्तु किन् त्वा कार्क्कारिणोऽब्ब्रवीत् ॥

(मार्गे लक्षण्ण्ये वृक्षे दृष्टे तस्स्याऽभिमन्त्रणे मन्त्रः [पार. ३।१५।२०])

४७. मात् त्वाऽशनिर्म् मा परशुर्म् मा बातो मा राजप्प्रेषितो दण्डः ।
अङ्कुरास्त् तेप् प्ररोहन्तु निवातेत् त्वाऽभिवर्षतु ॥
अग्ग्रँनिष्ट् टे मूलम् मा हिꣳसीत्
त्स्वस्त्ति तेऽस्त्तु बनस्प्पतेस् स्वस्त्ति मेऽस्त्तु बनस्प्पते ॥

---

१. समाहारो झोलिका, न तु दण्डस् तस्स्य एतत्प्रकरणे पृथगुपादानात् ।

(चतुष्पथप्राप्तौ तदभिमन्त्रणे मन्त्रः [पार. ३।१५।७])

४८. नमो रुद्द्राय पथिषदे स्वस्त्ति मा सम्पारय ।

(उञ्छदानाय सम्बोधने मन्त्रः [उञ्छशास्त्रोक्तः])

४९. स्वस्त्ति ।

(आमान्नादिसर्वद्रव्यप्रतिग्रहे मन्त्रः [पार. ३।१५।२१,२२])

५०. द्यौस्त् त्वा ददातु पृथिवीत् त्वाप् प्रतिगृह्ण्णातु ।

(प्रतिगृहीतस्स्यौदनस्स्य द्विः प्राशने मन्त्रौ [पार. ३।१५।२१])

५१. ब्रह्म्मात् त्वाऽश्न्नातु । ब्रह्म्मात् त्वाप् प्राश्न्नातु ।

(प्रतिगृहीतस्स्य मन्थस्स्य त्रिः प्राशने मन्त्राः [पार. ३।१५।२२])

५२. ब्रह्म्मात् त्वाऽश्न्नातु । ब्रह्म्मात् त्वाप् प्राश्न्नातु । ब्रह्म्मात् त्वा पिबतु ।

(उञ्छङ् कृत्त्वा गृहोपगमने मन्त्रः [उञ्छशास्त्रोक्तः])

५३. गृहानुपह्ब्बयामः ।

(उञ्छान्नादीनाम् पत्न्यै दाने मन्त्रः [उञ्छ.])

५४. इयवँ वृत्तिः ।

(उञ्छान्नादीनां स्वीकारे पत्न्या प्रयोज्ज्यो मन्त्रः [उञ्छ.])

५५. सुवृत्तिः ।

(उञ्छान्नादीनावँ वैश्श्वदेवान्नसाधने उपयोगङ् कर्तुम् पत्न्याः प्रवोधने मन्त्रः [उञ्छ.])

५६. वैश्श्वदेवान्नम् पचस्स्व ।

(नद्द्यादिषु माद्ध्याह्न्निकस्नानादिके स्नाने मन्त्राः [कात्त्यायनत्रिकण्डिकस्नानसूत्त्रोक्ताः])

(तोयामन्त्रणमन्त्रः)

५७. उ॒रुꣳ हि राजा॒ वरु॑णश्च् चु॒कार॒ सूर्य्या॑य॒ पन्था॒मन्न्वे॑त॒वाऽ उं ।
अ॒पदे॒ पादा॒प् प्रति॑धातवे करु॒तापवक्क॒ता हृ॑दया॒विध॑श्च् चित् ॥मासं. ८।२३॥

(तोयावर्तनमन्त्रः [काश्रौ. २५।१।११])

५८. ये ते शतवँ वरुण ये सहस्स्रयँ यज्ज्ञियाः पाशा वितता महान्तः ।
तेभिर्न् नो अद्द्य सवितोत विष्ण्णुर्ब्ब् बिश्श्वे मुञ्चन्तु मरुतः स्वर्क्काः ॥

(अञ्जलिनाऽपामादाने मन्त्रः)

५९. सु॒मि॒त्त्रि॒या न॒ऽ आप॒ऽ ओष॑धयः सन्तु॒ ॥ मासं. ६।२२ ॥

(द्वेष्य्यम् प्रति अपान् निषेचने मन्त्रः)

६०. दु॒र्म्मि॒त्त्रि॒यास्त् तस्म्मै सन्तु॒ यो॒ऽस्म्मान् द्वेष्ट्टि॒ यञ्च॑ व॒यन् द्वि॒ष्म्मः ॥६।२२॥

(मृदाऽङ्गानामालम्भने मन्त्रः)

६१. इ॒दवँ विष्ण्णु॒र्ब्बि॒ बिच॑क्क्रमेत् त्रे॒धा निद॑धे प॒दम् ।
समू॑ढमस्स्य पाꣳ सु॒रे[१] ॥ मासं. ५।१५ ॥

(सूर्याभिमुखतया निमज्जने मन्त्रः)

६२. आपो॑ऽ अ॒स्म्मान्न् मा॒तरः॑ शुन्धयन्तु घृ॒तेन॑ नो घृत॒प्प्वः॑ पुनन्तु ।
बिश्श्व॒ꣳ हि रि॒प्प्रम् प्र॒वह॑न्ति दे॒वीः ॥ मासं. ४।२ ॥

१. अत्र मन्त्रसंहितायावँ वर्तमानमपि "स्वाहा" इति यजुर् नैव मृदाऽङ्गालम्भने प्रयोज्ज्यम् प्रकृते तस्स्यार्थस्स्याभावात् , ऋच एव ग्राह्य्यतायाः प्रतीतेश् च ।

(निमग्नस्योन्मज्जने मन्त्रः)

६३. उदिदाभ्यः शुचिरापूत ऐमि ॥ मासं. ४।२॥

(गोमयेनाऽङ्गानां विलेपने मन्त्रः [मासं. १६।१६])

६४. मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः।
मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित् त्वा हवामहे ॥

(अभिषेचने मन्त्राः[1])

६५. इमम् मे वरुणश् श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥ २१।१ ॥

६६. तत् त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्र मोषीः ॥ मासं. २१।२ ॥

६७. त्वन् नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अव यासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्र मुमुग्ध्यस्मत् २१।३

६८. स त्वन् नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अव यक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि ॥ २१।४ ॥

६९. मापो मौषधीर् हिंसीर्द्धाम्नोधाम्नो राजंस् ततो वरुण नो मुञ्च ।
यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च ॥ मासं. ६।२२॥

७०. उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ मासं.१२।१२॥

७१. मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत ।
अथो यमस्य पड्वीशात् सर्वस्माद् देवकिल्बिषात् ॥ १२।९० ॥

७२. अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः ।
अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतम्
पुरुराव्णो देव रिषस्पाहि ॥ मासं. ३।४८॥

(निमज्ज्योन्मज्ज्याचम्य दर्भैः पावने मन्त्राः)

७३. ओ३म् ॥ मासं. ४०।१५॥

७४. भूर्भुवः स्वः ॥ मासं. ३।५, ३७ ; ३६।३॥

७५. तत् सवितुर्वरेण्यम् भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥ मासं. ३।३५, २२।९, ३०।२, ३६।३॥

७६. आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ।
महे रणाय चक्षसे ॥ मासं. ११।५०॥

७७. यो वः शिवतमो रसस्तस्य भाजयतेह नः ।
उशतीरिव मातरः ॥ मासं. ॥ ११।५१॥

७८. तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ ।
आपो जनयथा च नः ॥ मासं. ११।५२॥

७९. इदमापः प्र वहतावद्यं च मलं च यत् ।
यच्चाभिदुद्रोहानृतं यच्च शेपे अभीरुणम् ।
आपो मा तस्मादेनसः पवमानश्च मुञ्चतु ॥ मासं. ६।१७ ॥

---

१. पावनान्ते पुनरभिषेचनेऽपि एत एव मन्त्राः प्रयुज्यन्ते ।

८०. हविष्मतीरिमाऽ आपो हविष्मा२ँऽ आ विवासति ।
हविष्मान् देवोऽ अध्वरो हविष्मा२ँऽ अस्तु सूर्य्यः ॥ मासं. ६।२३॥
८१. देवीरापोऽअपान्नपाद् यो वऽऊर्मिर् हविष्य्ऽइन्द्रियावान् मदिन्तमः ।
तन् देवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषाम् भागस्त् थ ॥ ६।२७ ॥
८२. कार्षिरसि समुद्रस्य्त्वाक्षित्याऽ उन् नयामि ।
समापोऽ अद्भिरग्मत समोषधीभिरोषधीः ॥ मासं. ६।२८॥
८३. अपो देवा मधुमतीरगृभ्णन् नूर्जस्वती राजस्वश्च् चितानाः ।
याभिर्म् मित्त्रावरुणावभ्यषिञ्चन् न्याभिरिन्द्रमनयन् नत्यरातीः ॥१०।१॥
८४. द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव ।
पूतम् पवित्त्रेणेवाऽऽज्यमापः शुन्धन्तु मैनसः ॥ मासं. २०।२०॥
८५. शन् नो देवीरभिष्ट्टयऽ आपो भवन्तु पीतये ।
शय्ँ योरभिस्स्रवन्तु नः ॥ मासं. ३६।१२॥
८६. अपाꣳ रसमुद्वयसꣳ सूर्य्ये सन्तꣳ समाहितम् ।
अपाꣳ रसस्स्य यो रसस्त् तवँ वो गृह्ण्णाम्म्युत्तमम् ॥ मासं. ९।३॥
८७. अपो देवीरुप सृज मधुमतीरयक्ष्मायप् प्रजाभ्भ्यः ।
तासामास्त्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥ मासं. ११।३८॥
८८. पुनन्तु मा पितरः सोम्म्यासः पुनन्तु मा पितामहाः
पुनन्तुप् प्रपितामहाः । पवित्त्रेण शतायुषा ॥ मासं. १९।३७ ॥
८९. पुनन्तु मा पितामहाः पुनन्तुप् प्रपितामहाः ।
पवित्त्रेण शतायुषा बिश्श्वमायुर्ब् व्यश्नवै ॥ मासं. १९।३७ ॥
९०. अग्ग्नऽआयूꣳषि पवसऽ आ सुवोर्ज्जमिषञ् च नः ।
आरे बाधस्स्व दुच्छुनाम् ॥ मासं. १९।३८ ॥
९१. पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु बिश्श्वा भूतानि जातवेदः पुनीहि मा ॥ मासं. १९।३९॥
९२. पवित्त्रेण पुनीहि मा शुक्क्रेण देव दीद्यत् ।
अग्ग्ने क्क्रत्त्वा क्क्रतूꣳरनु ॥ मासं. १९।४०॥
९३. यत् ते पवित्त्रमर्च्चिष्ष्यग्ग्ने बिततमन्तरा ।
ब्रह्मम् तेन पुनातु मा ॥ मासं. १९।४१ ॥
९४. पवमानः सोऽ अद्द्य नः पवित्त्रेण बिचर्षणिः ।
यः पोता स पुनातु मा ॥ मासं. १९।४२ ॥
९५. उभाभ्भ्यान् देव सवितः पवित्त्रेण सवेन च ।
माम् पुनीहि बिश्श्वतः ॥ मासं. १९।४३॥

९६. वैश्श्वदेवी पुनती देव्व्यागाद् यस्स्यामिमा वह्व्व्यस्त् तन्न्वो वीतपृष्ट्ठः ।
तया मदन्तः सधमादेषु वय[६] स्याम पतयो रयीणाम् ॥ मासं. १९।४४॥

९७. चित्त्पतिर्म् मा पुनात्त्वच्छिद्द्रेण पवित्त्रेण सूर्य्यस्स्य रश्श्मिभिः ।
तस्स्य ते पवित्त्रपते पवित्त्रपूतस्स्य यत्त्कामः पुने तच् छकेयम् ॥४।४॥

९८. वाक्क्पतिर्म् मा पुनात्त्वच्छिद्द्रेण पवित्त्रेण सूर्य्यस्स्य रश्श्मिभिः ।
तस्स्य ते पवित्त्रपते पवित्त्रपूतस्स्य यत्त्कामः पुने तच् छकेयम् ॥४।४

९९. देवो मा सविता पुनात्त्वच्छिद्द्रेण पवित्त्रेण सूर्य्यस्स्य रश्श्मिभिः
तस्स्य ते पवित्त्रपते पवित्त्रपूतस्स्य यत्त्कामः पुने तच् छकेयम् ॥४।४

१००. ओ३म् ॥ मासं. ४०।१५॥

१०१. भूर्व् भुवः स्वः ॥ मासं. ३।५, ३७ ; ३६।३ ॥

१०२. तत् त्सवितुर्व् वरेण्ण्यम् भर्ग्गो देवस्स्य धीमहि ।
धियो यो नः प्रचोदयात् ॥ मासं. ३।३५, २२।९, ३०।२, ३६।३ ॥

(पावनान्ते पुनरभिषेचनङ् कृत्त्वाऽन्तर्जले प्रयोज्ज्यो माद्ध्यन्दिनीय-
वाजसनेयिनामघमर्षणस्थानीयो मन्त्रः[१])

१०३. द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव ।
पूतम् पवित्त्रेणेवाऽऽज्ज्यमापः शुन्धन्तु मैनसः ॥ मासं. २०।२० ॥

(वैकल्पिकरूपेणान्तर्जले प्रयोज्ज्यम् माद्ध्यन्दिनीयवाजसेनेयिनामघमर्षणसूक्तस्थानीयं सूक्तम्)

१०४. आऽयङ् गौः पृश्श्निरक्क्रमीदसदन्न्मातरम् पुरः ।
पितरञ् च प्प्रयन् त्स्वः ॥ मासं. ३।६ ॥

१०५. अन्तश्श्च् चरति रोचनाऽस्स्यप् प्राणादपानती ।
व्यक्ख्यन्न् महिषो दिवम् ॥ मासं. ३।७ ॥

१०६. त्रि[६]शद् धाम वि राजति वाक्क् पतङ्गाय धीयते ।
प्रतिवस्त्तोरहद्द्युभिः ॥ मासं. ३।८ ॥

(अन्तर्जले प्रयोज्ज्यौ वैकल्पिकौ मन्त्रौ)

१०७. ओ३म् ॥ मासं. ४०।१५ ॥

१०८. तद् द्विष्ण्णोः परमम् पद[६] सदा पश्श्यन्ति सूरयः ।
दिवीव चक्क्षुराततम्[२] ॥ मासं. ६।५ ॥

---

१. "द्रुपदादिव यो मन्त्रो वेदे वाजसनेयके । अन्तर्जले त्रिरावर्त्य सर्वपापैः प्रमुच्च्यते" इति बृहस्पति-वचनादपि द्रुपदादिवेत्त्यादिमन्त्रस्स्याऽघमर्षणस्थानीयत्त्वम् प्रतीयते । आऽयङ्गौरित्त्यादिसूक्तस्स्य च तद्विकल्पत्त्वात् तस्स्याऽपि अघमर्षणस्थानीयत्त्वम् प्रतीयते ।

२. "तद्विष्णोरिति मन्त्रेण मज्जेदप्सु पुनःपुनः । गायत्री वैष्णवी ह्येषा विष्णोः संस्मरणाय वै" इति बृहद्योगियाज्ञवल्क्यस्मृति(७।३५)-वचनमप्प्यत्त्र स्मर्तव्व्यम् (द्र.वीरमित्त्रोदये आह्निकप्प्रकाशे, पृ.२२३)॥

(व्रह्म्मयज्ञपूर्वोत्तराङ्गमन्त्राः)

[व्रह्म्मयज्ञारम्भे कर्तव्ये न्यासे सर्वानुक्क्रमण्युक्ताः (४।१३) मन्त्राः[१]]

[छन्दःपुरुषस्यैनोनिर्णोदनस्स्य शरीरे न्यासे मन्त्रः]

१०९. छन्दःपुरुषमेनोनिर्ण्णोदन६ँ शरीरेन् न्यस्स्यामि ।

[स्वं शिरः स्पृष्ट्वा जपनीयो मन्त्रः]

११०. तिर्य्यगग्ग्बिलश्च् चमसऽ ऊर्द्ध्वबुद्धँन:[२] ।

[स्वे अक्षिणी स्पृष्ट्वा जपनीयो मन्त्रः]

१११. तस्स्याऽक्क्षिणी गोतमभरद्द्वाजौ ।

[स्वे श्रोत्रे स्पृष्ट्वा जपनीयो मन्त्रः]

११२. श्रोत्त्रे बिश्श्वामित्त्रजमदग्गँनी ।

[स्वे नासिके स्पृष्ट्वा जपनीयो मन्त्र :]

११३. नासिके बसिष्ट्ठकश्श्यपौ ।

[स्वम् मुखं स्पृष्ट्वा जपनीयो मन्त्रः]

११४. बागत्त्रिः ।

[स्वं शिरः स्पृष्ट्वा जपनीयो मन्त्रः]

११५. गायत्त्रीञ् छन्दोऽग्ग्ँनिन् देवता७ँ शिरसि विन्न्यस्स्यामि ।

[स्वा ग्रीवाः स्पृष्ट्वा जपनीयो मन्त्रः]

११६. उष्ण्णिहञ् छन्दः सवितारन् देवताङ् ग्रीवासु विन्न्यस्स्यामि ।

---

१. व्रह्म्मयज्ञ्ँञारम्भे यथाविधिस्न् नातत्वाच् छन्दःपुरुषमेनोनिर्ण्णोदन६ँ शरीरन् न्यसेत् तिर्य्यगग्ग्बिलश्च् चमसऽ ऊर्द्ध्वबुद्धँनस्त् तस्स्याक्क्षिणी गोतम-भरद्द्वाजौश् श्रोत्त्रे बिश्श्वामित्त्र-जमदग्गँनी नासिके बसिष्ट्ठ-कश्श्यपौ बागत्त्रिर्ग् गायत्त्रीञ् छन्दोऽग्गँनिर्द् देवता७ँ शिरसि बिन्न्यसेदेवमेवोष्ण्णिह६ँ सवितारङ् ग्रीवास्स्वनूके बृहतीम् वृहस्प्पतिम् बाहब्बोर् वृहद्द्रथन्तरेद् द्यावापृथिवी मद्ध्येत् त्रिष्ट्टुभमिन्द्र७ँ श्रोण्ण्योर्ज् जगतीमादित्त्यम् मेड्ढ्रेऽतिच्छन्दसम् प्रजापतिम् पायौ यज्ञ्ँञायज्ञ्ँञियवँ वैश्श्वानरमूर्ब्बोरनुष्ट्टुभवँ विश्श्वान् देवानष्ट्ठीवतोः पङ्क्तिम् मरुतः पादयोर्द् द्विपदा बिष्ण्णुम् प्राणेषु बिच्छन्दसवँ वायुन् न्यूनातिरिक्क्तेष्ष्वङ्गेषुन् न्यूनाक्क्षरञ् छन्दऽ आपो देवतेत्त्येव६ँ सर्ब्बाङ्गेषु योजयित्त्वा बेदमयः सम्पद्यते शापानुग्ग्रहसमर्त्थो भवतिब् ब्राह्म्मन् तेजश्च् च बर्द्धते न कुतश्च् चिद्द् भयवँ विन्दतेऽ ऋङ्ङ्मयो यजुर्म्मयः साममयस्त् तेजोमयोब् ब्रह्म्ममयोऽमृतमयः सम्भूयब् ब्रह्म्मैवाऽब्भ्येति तसम्मादेतन् नाऽब्ब्रह्म्मचारिणे नाऽतपस्स्विने नाऽसवँवत्त्सरोपिताय नाऽप्प्रवक्क्त्रेऽनुब्ब्रूयादनेनाऽधीतेन चान्द्रायणाब्ब्दफलमवाप्प्ँनोत्त्यनेन च सम्म्यग्ग् ज्ञातेनब् ब्रह्म्मणः सायुज्ज्य६ँ सलोकतामाप्प्ँनोत्त्याप्प्ँनोति ॥ कात्त्यायनकृता माद्ध्यन्दिनीय-वाजसनेयकसर्वानुक्क्रमणिका ४।१३।

२. "तत्त्र न्यासे प्रकारद्वयम् मुखं स्पृष्ट्वा तिर्य्यगग्ग्बिलश्च् चमस ऊर्द्ध्वबुद्धँन इति पठितव्व्यम् । अक्षिणी स्पृष्ट्वा गोतमभरद्द्वाजाविति । एकोऽयम् प्रकारः । मुखं स्पृष्ट्वा तिर्य्यगग्ग्बिलाय चमसायोर्द्ध्वबुद्धँनाय नमः । अक्षिणी स्पृष्ट्वा गोतमभरद्द्वाजाब्भ्यान् नम इति । ततश्च यथारुच्च्यनुष्ठेयम् । एववँ वक्क्ष्यमाणेष्ष्वपि प्रकारद्द्वयन् द्रष्टव्व्यम्" इति सर्वानुक्क्रमणिकाभाष्व्ये अनन्तः ।

[स्वम् पृष्ठवंशं स्पृष्ट्वा जपनीयो मन्त्रः]

११७. अनूके बृहतीञ् छन्दो बृहस्प्पतिन् देवतावँ विन्न्यस्स्यामि।

[स्वौ वाहू स्पृष्ट्वा जपनीयो मन्त्रः]

११८. बाह्ब्बोर् बृहद्द्रथन्तरेच् छन्दसीद् द्यावापृथिवी देवतावँ विन्न्यस्स्यामि ।

[स्वमुदरं स्पृष्ट्वा जपनीयो मन्त्रः]

११९. मद्ध्येत् त्रिष्ट्टुभञ् छन्द इन्द्रन् देवतावँ विन्न्यस्स्यामि ।

[स्वे श्रोणी स्पृष्ट्वा जपनीयो मन्त्रः]

१२०. श्रोण्ण्योर्ज् जगतीञ् छन्दऽ आदित्त्यन् देवतावँ विन्न्यस्स्यामि ।

[स्वम् मेढ्रं स्पृष्ट्वा जपनीयो मन्त्रः]

१२१. मेढ्रेऽतिच्छन्दसञ् छन्दःप् प्रजापतिन् देवतावँ विन्न्यस्स्यामि ।

[स्वम् पायुं स्पृष्ट्वा जपनीयो मन्त्रः]

१२२. पायौ यज्ज्ँञायज्ज्ँञियञ् छन्दो बैश्श्वानरन् देवतावँ विन्न्यस्स्यामि ।

[स्वावूरू स्पृष्ट्वा जपनीयो मन्त्रः]

१२३. ऊर्ब्बोरनुष्ट्टुभञ् छन्दो बिश्श्वान्-देवान् देवतावँ विन्न्यस्स्यामि ।

[स्वे जानुनी स्पृष्ट्वा जपनीयो मन्त्रः]

१२४. अष्ट्ठीवतोः पङ्क्तिञ् छन्दो मरुतो देवतावँ विन्न्यस्स्यामि ।

[स्वौ पादौ स्पृष्ट्वा जपनीयो मन्त्रः]

१२५. पादयोर्द् द्विपदाञ् छन्दो विष्ण्णुन् देवतावँ विन्न्यस्स्यामि ।

[स्वानि चक्षुश्श्रोत्त्रादीनीन्द्रियायतनानि स्पृष्ट्वा जपनीयो मन्त्रः]

१२६. प्राणेषु बिच्छन्दसञ् छन्दो बायुन् देवतावँ विन्न्यस्स्यामि ।

[स्वानि न्यूनातिरिक्तान्यङ्गानि स्पृष्ट्वा जपनीयो मन्त्रः]

१२७. न्यूनातिरिक्क्तेष्ष्वङ्गेषुन् न्यूनाक्क्षरञ् छन्दोऽपो देवतावँ विन्न्यस्स्यामि ।

[स्वाद्ध्यायाद्ध्ययनारम्भे स्वाद्ध्यायाद्ध्यापनारम्भे च पठनीयौ मन्त्रौ (पार. २।१०।१८)]

१२८. ओ३म् ॥ मासं. ४०।१५॥

१२९. तत् त्संवितुर्ब् बरेण्ण्यम् भर्ग्गो देवस्स्य धीमहि । धियो यो नःप्
प्रचोदयात् ॥ तत् त्संवितुर्ब् बरेण्ण्यम् भर्ग्गो देवस्स्य धीमहि ।
धियो यो नःप् प्रचोदयात् ॥ तत् त्संवितुर्ब् बरेण्ण्यम् भर्ग्गो
देवस्स्य धीमहि । धियो यो नःप् प्रचोदयात् ॥

[स्वाद्ध्यायाद्ध्यापनान्ते आचार्येण शिष्यैश् च
अनिराकरणमन्त्रजपात् पूर्वमेव जपनीयो मन्त्रः (पार. २।१०।२२)]

१३०. सह नोऽस्त्तु सह नोऽवतु सह नऽ इदवँ वीर्य्यवदस्त्तुब् ब्रह्म्म ।
इन्द्रस्त् तद् द्वेद येन यथा न बिद्द्विषामहे ॥

[स्वाद्ध्यायमधीत्त्याधीत्त्याऽनिराकरणे मन्त्रः (पार. ३।१५।२३)]

१३१. प्रतीकम् मे विचक्क्षणञ् जिह्ब्वा मे मधु यद् द्वचः । कर्ण्णाब्भ्याम्
भूरि शुश्श्रुवे मात् त्वँ हार्षीः श्रुतम् मयि । ब्रह्म्मणःप् प्रवचनमसिब्
ब्रह्म्मणःप् प्रतिष्ट्ठानमसिब् ब्रह्म्मकोशोऽसि सनिरसि शान्तिरस्स्य-

निराकरणमसिब् ब्रह्म्मकोशम् मे बिश । बाचात् त्वा पिदधामि बाचात् त्वा पिदधामि । तिष्ट्ठप् प्रतिष्ट्ठ । स्वरकरणकण्ठ्चौरसदन्त्यौष्ट्ठ्चग्ग्रहणधारणोच्चारणशक्क्तिर्म् मयि भवतु । आप्प्यायन्तु मेऽङ्गानि बाक्क् प्राणश्च् चक्क्षुः श्रोत्त्रयँ यशो बलम् । यन्न् मेश् श्रुतमधीतन् तन्न् मे मनसि तिष्ट्ठतुतिष्ट्ठतु ॥ ओ३म् ॥

(तर्पणमन्त्राः कात्त्यायनत्रिकण्डिकस्नानसूत्त्रोक्ताः)

[ब्रह्म्मादिदेवतर्पणमन्त्राः[1]]

१३२. ब्रह्म्मा तृप्प्यताम् ।
१३३. बिष्ण्णुस् तृप्प्यताम् ।
१३४. रुद्द्रस् तृप्प्यताम् ।
१३५. प्रजापतिस् तृप्प्यताम् ।
१३६. देवास् तृप्प्यन्ताम् ।
१३७. छन्दाँसि तृप्प्यन्ताम् ।
१३८. बेदास् तृप्प्यन्ताम् ।
१३९. ऋषयस् तृप्प्यन्ताम् ।
१४०. पुराणाचार्य्यास् तृप्प्यन्ताम् ।
१४१. गन्धर्ब्बास् तृप्प्यन्ताम् ।
१४२. इतराचार्य्यास् तृप्प्यन्ताम् ।
१४३. सवँवत्त्सरः सावयवस् तृप्प्यताम् ।
१४४. देब्ब्यस् तृप्प्यन्ताम् ।
१४५. अप्प्सरसस् तृप्प्यन्ताम् ।
१४६. देवानुगास् तृप्प्यन्ताम् ।
१४७. नागास् तृप्प्यन्ताम् ।
१४८. सागरास् तृप्प्यन्ताम् ।
१४९. पर्ब्बतास् तृप्प्यन्ताम् ।
१५०. सरितस् तृप्प्यन्ताम् ।
१५१. मनुष्ष्यास् तृप्प्यन्ताम् ।
१५२. यक्क्षास् तृप्प्यन्ताम् ।
१५३. रक्क्षाँसि तृप्प्यन्ताम् ।
१५४. पिशाचास् तृप्प्यन्ताम् ।
१५५. सुपर्ण्णास् तृप्प्यन्ताम् ।
१५६. भूतानि तृप्प्यन्ताम् ।
१५७. पशवस् तृप्प्यन्ताम् ।
१५८. बनस्प्पतयस् तृप्प्यन्ताम् ।
१५९. ओषधयस् तृप्प्यन्ताम् ।
१६०. भूतग्ग्रामश्च् चतुर्ब्बिधस् तृप्प्यताम् ।

[सनकादिदिव्व्यमनुष्ष्यतर्पणमन्त्राः[2]]

१६१. सनकस् तृप्प्यताम् ।
१६२. सनन्दनस् तृप्प्यताम् ।
१६३. सनातनस् तृप्प्यताम् ।
१६४. कपिलस् तृप्प्यताम् ।
१६५. आसुरिस् तृप्प्यताम् ।
१६६. बोढुस् तृप्प्यताम् ।
१६७. पञ्चशिखस् तृप्प्यताम् ।

---

१. तर्पणे आवाहनादीनां स्वर्पिणाऽविहितत्त्वादनावश्श्यकत्त्वम् बोद्ध्यम् । एकोद्दिष्टश्राद्धेऽपि आवाहनन् न भवतीति च स्मर्तव्व्यम् । शत्त्रुघ्नमिश्श्रेणाऽपि मन्त्रार्थदीपिकायान् तर्पणमन्त्रव्याक्ख्याने आवाहनमन्त्रा नैवोपात्ता इति च बोद्ध्यम् ।

२. सप्तर्पितर्पणं स्वर्पिणा पृथगनुक्तत्त्वादनावश्श्यकम् ।

[कव्व्यवाडनलादिदिव्यपितृतर्पणमन्त्राः]

१६८. कव्व्यवाडनलस् तृप्प्यतामेतत्[1] तस्म्मा उदकन् तिलमिश्श्रं[2] स्वधा[3] नमः[4] ।
१६९. सोमस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः।
१७०. यमस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।
१७१. अर्य्यमा तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।
१७२. पितरोऽग्ग्निष्ष्वात्तास् तृप्प्यन्तामेतत् तेब्भ्य उदकन् तिलमिश्श्रं स्वधा नमः ।
१७३. पितरो वर्ह्हिषदस्[5] तृप्प्यन्तामेतत् तेब्भ्य उदकन् तिलमिश्श्रं स्वधा नमः ।
१७४. पितरः सोमपास् तृप्प्यन्तामेतत् तेब्भ्य उदकन् तिलमिश्श्रं स्वधा नमः ।

[काम्म्ये यमतर्पणे मन्त्राः]

१७५. यमाय नमः । १७६. धर्म्मराजाय नमः । १७७. मृत्त्यवे नमः ।
१७८. अन्तकाय नमः । १७९. बैवस्स्वताय नमः । १८०. कालाय नमः ।
१८१. सर्व्वभूतक्क्षयाय नमः । १८२.औदुम्बराय नमः । १८३.दद्ध्नाय नमः ।
१८४. नीलाय नमः । १८५. परमेष्ट्ठिने नमः । १८६. बृकोदराय नमः ।
१८७. चित्राय नमः । १८८. चित्रगुप्प्ताय नमः ।

---

१. माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेद-शतपथब्राह्म्मण-कात्त्यायनश्रौतसूत्र-पारस्क्करगृह्य्यसूत्र-स्स्थानाम् प्रयोगविशेषाणाम् परिशीलने "एतत् तस्म्मा उदकम्" इत्त्येष प्प्रयोगः समुचिततरः प्रतीयते ।

२. कात्त्यायनत्रिकण्डिकस्नानसूत्रान्तर्गतदिव्यपितृयमतर्पणविधानवाक्क्यानुकूलतयैतादृशः प्रयोगः कृतो बोद्ध्यः । गृहे तर्पणे तिलमिश्श्रणाभावे एतत् पदन् न प्रयोज्ज्यम् ।

३. स्वधाकारम् पितर उपजीवन्तीति माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशतपथब्राह्म्मणे १४।८।९।१॥

४. स्वधा नमः इति प्रयोगो मन्त्रसंहितायाम् (१९।३६), शतपथे (२।६।१।२४), कात्त्यायनश्रौतसूत्रे (५।९।९), पारस्क्करगृह्य्यसूत्रे (२।९।९) च दृष्टत्त्वात् परम्पराप्राप्तत्त्वाच् चाऽऽश्रितः ।

५. मन्त्रसंहितायाम् (१९।४९-६१, २४।१८) सोमपादीनाम् पितृणावँ विशिष्टस्स्य क्रमस्स्य दर्शनात् , शतपथब्राह्म्मणे (२।६।१।४-७, २।६।१।२२, २।६।१।२६-२९, ५।५।४।२८) च तेषान् तादृशस्स्यैव क्रमस्स्य दर्शनात् , कात्त्यायनश्रौतसूत्रेऽपि (५।९।३-७) तादृशस्स्यैव क्रमस्स्याऽनुविहितत्त्वात् , स्मार्तपाठाच् श्रौतपाठस्स्य वलीयस्त्वस्स्य धर्ममीमांसकैर् निर्णीतत्त्वात् , "सोमवन्तो वर्हिषदश् चाग्निष्ष्वात्ताश्च ये परे । पितरः पुण्ण्ययशसः सर्वेऽप्यायन्तुनस्त्विति" इति हेमाद्रिधृते (श्राद्धखण्डे पृ. ७५) ब्रह्म्मपुराणवचनेऽपि तस्स्यैव क्रमस्स्य दर्शनात् , वायुपुराणे उत्तरार्धे (४८।१०) च "कव्व्यवाडोऽनलः सोमो यमश्चैवार्यमा तथा । अग्निष्ष्वात्ता वर्हिषदः सोमपाः पितृदेवताः" इति क्रमविशेषस्य दर्शनात् कात्त्यायनत्रिकण्डिकस्नानसूत्रे वर्तमानकाले उपलब्भ्यमानम् "अग्ग्निष्ष्वात्तान् त्सोमपो वर्ह्हिषदः" इति पाठम् प्रमादपाठम् मत्त्वाऽत्राऽयङ् क्रम आश्श्रितोऽस्ति । अथवा सोमपादिकः क्रम आश्श्रयणीयः ॥ "तद् यदितः पराग्ग् ददाति" (शत. २।४।२।१९) इति वचनात् पितृपितामहप्प्रपितामहेषु च पित्रे एव प्रथमन् दीयमानत्त्वादग्ग्निष्ष्वात्तादिक एव वा क्रमः । एतस्मिन् विषये वेदवेदाङ्गाद्द्यद्ध्ययनपरैर् माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिभिः कात्त्यायनत्रिकण्डिकस्नानसूत्रानुसारिभिरनूचानतरैर् भूसुरवरैर् विचारः कर्तव्यः ।

[स्वपितृतर्पणमन्त्राः[1]]

१८९. अस्म्मत्पिता अमुकशर्म्मा अमुकगोत्त्रो[2] वसुस्स्वरूपस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।

१९०. अस्म्मत्पितामहः अमुकशर्म्मा अमुकगोत्त्रो रुद्द्रस्स्वरूपस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।

१९१. अस्मत्प्रपितामहः अमुकशर्म्मा अमुकगोत्त्र आदित्त्यस्स्वरूपस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।

१९२. अस्म्मन्माता[3] अमुकी देवी अमुकगोत्त्रा वसुस्स्वरूपा तृप्प्यतामेतत् तस्स्या उदकन् तिलमिश्श्रं स्वधा नमः ।

१९३. अस्म्मत्पितामही अमुकी देवी अमुकगोत्त्रा रुद्द्रस्स्वरूपा तृप्प्यतामेतत् तस्स्या उदकन् तिलमिश्श्रं स्वधा नमः ।

१९४. अस्म्मत्प्रपितामही अमुकी देवी अमुकगोत्त्रा आदित्त्यस्स्वरूपा तृप्प्यतामेतत् तस्स्या उदकन् तिलमिश्श्रं स्वधा नमः ।

१९५. अस्म्मत्सपत्नमाता अमुकी देवी अमुकगोत्त्रा वसुस्स्वरूपा तृप्प्यतामेतत् तस्स्या उदकन् तिलमिश्श्रं स्वधा नमः ।

[स्वपितृतर्पणान्तर्गते प्रसेचने मन्त्राः]

१९६. उदीरतामवंरऽ उतत् परांसऽ उनन् मंदध्ध्यमाः पितरंः सोमम्यासंः ।
असुयँ यऽ ईयुरंवृकाऽ ऋंतज्जँज्ञास्त् ते नोंऽवन्तु पितरो हवेंषु ॥
मासं. १९।४९॥

---

१. उदीरतामित्त्यादिभिर् नवभिर् मन्त्रैः पित्त्रादिव्भ्यो नवाऽञ्जलयः क्रमेण देया इति के चिन् मन्न्यन्ते, तें मातृतर्पणे च आ मा बाजस्स्येति मन्त्रस्स्य प्प्रयोगम् प्रतिपादयन्ति; अन्न्यत्त्रोक्तोऽपि स कल्पस् त्रिकण्डिकस्स्नानसूत्त्रकारस्स्य न सम्मतः, उदीरतामित्त्यादिभिर् नवभिर् मन्त्रैस् स्नानसूत्त्रकारेण अन्न्यस्स्यैव प्रसेचनकर्मणः प्रतिपादितत्त्वात् । कर्कोपाद्ध्यायमित्त्रमिश्श्रादिभिश् च स्नानसूत्त्रे प्रसेकात्मकमन्न्यदेव कर्मेति सम्म्यक् परमतखण्डनपूर्वकम् प्रतिपादितमस्ति । केषाञ् चन वैजवापादीनावँ वाजसनेयिनाम् ब्रह्म्मोक्तयाज्ञवल्क्यसंहितादिप्प्रोक्तस्स्य कल्पान्तरस्स्य आश्श्रयणीयत्त्वेऽपि स्नानसूत्त्रानुसारिणाम् माद्ध्यन्दिनीयानावँ वाजसनेयिनान् तु स्नानसूत्त्रोक्त एव तर्पणकल्पः सर्वथाऽनुसरणीय इत्त्यस्माभिरेष कल्प आश्श्रितो बोद्ध्यः ।

२. "सम्वन्धम् प्रथमम् ब्रूयान् नाम गोत्त्रमतः परम् । रूपन् ततो विजानीयादेष धर्मः सानातनः ।" इति श्राद्धकाशिका-(पृ.४४०)धृतवाक्क्यस्स्य दर्शनात् , हेमाद्रिश्राद्धखण्डेऽपि (पृ. १२५१) तदनुकूलस्स्य वचनस्स्य दर्शनात् , वीरमित्त्रोदये श्राद्धप्रकाशे (पृ. २९) चैतादृशस्स्यापि क्रमस्स्य स्वीकृतत्वात् , शतपथश्श्रुतौ नामगोत्त्रग्रहणे एतादृशस्स्य क्रमस्स्य वहुशो दर्शनाच्चाऽयङ् क्रमोऽत्राऽऽश्श्रितो वोध्यः । आह्न्निकसूत्त्रावलौ च "सम्बन्धमनुकीर्त्यैव नाम गोत्त्रमनन्तरम् । वस्स्वादिरूपं सङ्कीर्त्य स्वधाकारेण तर्पयेत्" इति वसिष्ठवचनन् दृश्श्यते (पृ. १८२); तत्त्रैव "स्मृत्त्यन्तरे- सम्वन्धनामगोत्त्रेण स्वधान्ते च नमोनमः । वस्स्वादिरूपं सङ्कीर्त्य तर्पयेत् पितृपूर्वकम्" इति च दृश्श्यते (पृ. १८२) ।

३. वस्तुतस् तु माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिनाङ् कृते मातृ-पितामही-प्रपितामहीव्भ्यः सपत्नमांत्त्रादिव्भ्यश्च पृथगुदकदानमनावश्श्यकम् , पितृपितामहप्प्रपितामहेव्भ्यो दत्तैरुदकैरेव तासामपि तृप्तिर् भवतीति सिद्धान्तस्स्य "स्वयवँ वै तेषाँ सह येषाँ सह" इति शतपथश्श्रुतौ(२।४।२।१९) प्रतिपादितत्त्वात् , आव्भ्युदयिकश्श्राद्धेऽपि माद्ध्यन्दिनीयैः कात्त्यायनश्राद्धकल्पसूत्त्रानुसारिभिस् ताव्भ्यः पृथक् पिण्डदानङ् कर्तव्व्यमिति विधेरदर्शनाच्च च ।'

१९७. अङ्गिरसो नः पितरो नवग्ग्वाऽ अथर्ब्बाणो भृगवः सोम्म्यासः।
तेषांव्ँ वय६ँ सुमतौ यज्ञ्ँियानामपि भद्द्रे सौमनसेस् स्याम ॥१९।५०॥
१९८. आ यन्तु नः पितरः सोम्म्यासोऽग्ग्निष्ष्वात्ताः पथिभिर्द् देवयानैः।
अस्म्मिन् न्यज्ज्ञेस् स्वधया मदन्तोऽधिब्ब्रुवन्तु तेऽवन्त्वस्म्मान् ॥१९।५८॥
१९९. ऊर्ज्जव्ँ वहन्तीरमृतङ् घृतम् पयः कीलालम् परिस्स्रुतम्।
स्वधास्त् थ तर्प्पयत मे पितृन् ॥ मासं. २।३४ ॥
२००. पितृब्भ्यः स्वधायिब्भ्यः स्वधा नमः पितामहेब्भ्यः स्वधायिब्भ्यः स्वधा
नमःप् प्रपितामहेब्भ्यः स्वधायिब्भ्यः स्वधा नमः। अक्क्षन्न् पितरो
ऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धद्ध्वम् ॥ मासं. १९।३६ ॥
२०१. ये चेह पितरो ये च नेह याँश्च् च विद्द्म याँ२ऽ उ च न प्रविद्द्म।
त्वव्ँ वेत्थ यति ते जातवेदः स्वधाभिर्य् यज्ञ्ँ६ सुकृतञ् जुषस्स्व ॥१९।६७॥
२०२. मधु वाताऽ ऋतायते मधुक् क्षरन्ति सिन्धवः।
माद्ध्वीर्न् नः सन्त्वोषधीः ॥ मासं.१३।२७ ॥
२०३. मधु नक्क्तमुतोषसो मधुमत्त् पार्त्थिव६ँ रजः।
मधुद् द्यौरस्तु नः पिता ॥ मासं. १३।२८ ॥
२०४. मधुमान् नो वनस्प्पतिर्म् मधुमाँ२ऽ अस्त्तु सूर्य्यः।
माद्ध्वीर्ग् गावो भवन्तु नः ॥ मासं. १३।१९ ॥
२०५. तृप्प्यद्ध्वम्। तृप्प्यद्ध्वम्। तृप्प्यद्ध्वम् ॥ (स्नानसूत्रे, क. ३)।

[प्रसेचनान्ते मातामहादितर्पणात् पूर्वं सकृद् वचनीयानि अष्टौ यजूंषि]

२०६. नमो वः पितरो रसाय। नमो वः पितरः शोषाय। नमो वः पितरो
जीवाय। नमो वः पितरः स्वधायै। नमो वः पितरो घोराय। नमो वः
पितरो मन्न्यवे। नमो वः पितरः पितरो नमो वः। गृहान् नः पितरो
दत्त सतो वः पितरो देष्म्म[1] ॥ मासं. २।३२ ॥

[स्वपितृतर्पणे मातामहादितर्पणमन्त्राः]

२०७. अस्म्मन्मातामहः अमुकशर्म्मा अमुकगोत्रो वसुस्स्वरूपस् तृप्प्यतामेतत्
तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः।
२०८. अस्म्मत्प्रमातामहः अमुकशर्म्मा अमुकगोत्रो रुद्द्रस्स्वरूपस् तृप्प्यतामेतत्
तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः।

---

१. मातामहतर्पणात् प्रागष्टौ यजूंषि जपनीयानीति त्रिकण्डिकस्नानसूत्रव्याक्ख्यायाङ् कर्कोपाद्ध्यायः। एवमेव हरिहरोऽपि। एवमेव संस्कारगणपतिकारो वीरमित्रोदयकारश्च। शत्त्रुघ्नमिश्श्रेणाऽपि मन्त्रार्थदीपिकायान् तर्पणमन्त्रव्याक्ख्यायाम् एतान्न्येव अष्टौ यजूंषि व्याक्ख्यातानि, न तु "एतद् वः पितरो वासः" इति नवमय्ँ यजुः। युक्तञ् चैतत्, नवमस्स्य यजुषस् तर्पणे सङ्गतेरभावात्। तस्माद् वैद्द्यनारायणशर्मणा सङ्गृहीतायाम् आह्निकसूत्रावलौ गीताप्रेसप्रकाशिते विद्द्याधरगौड-वेदाचार्यसम्पादिते नित्त्यकर्मप्रयोगे नैपालीयश्राद्धपद्धतिषु रत्नपुस्तक-भण्डारादिप्प्रकाशितासु सर्ल्लग्ने तर्पणप्प्रयोगे च दृश्श्यो नवमयजुःपाठोऽसङ्गतो वोद्ध्यः। उक्तश्राद्धपद्धतिस्थ-तर्पणप्प्रयोगेऽन्न्या अपि बह्व्व्योऽसङ्गतयः प्रतीयन्ते।

२०९. अस्म्मद्वृद्धप्प्रमातामहः अमुकशर्म्मा अमुकगोत्र आदित्त्यस्स्वरूपस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।

२१०. अस्म्मन्मातामही[1] अमुकी देवी अमुकगोत्त्रा वसुस्स्वरूपा तृप्प्यतामेतत् तस्स्या उदकन् तिलमिश्श्रं स्वधा नमः ।

२११. अस्म्मत्प्रमातामही अमुकी देवी अमुकगोत्त्रा रुद्द्रस्स्वरूपा तृप्प्यतामेतत् तस्स्या उदकन् तिलमिश्श्रं स्वधा नमः ।

२१२. अस्म्मद्वृद्धप्प्रमातामही अमुकी देवी अमुकगोत्त्रा आदित्त्यस्स्वरूपा तृप्प्यतामेतत् तस्स्या उदकन् तिलमिश्श्रं स्वधा नमः ।

२१३. अस्म्मदाचार्य्यः[2] अमुकशर्म्मा अमुकगोत्त्रो वसुस्स्वरूपस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।

२१४. अस्म्मद्विद्द्यागुरुः अमुकशर्म्मा अमुकगोत्त्रो वसुस्स्वरूपस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।

२१५. अस्म्मच्छिष्ष्यः अमुकशर्म्मा अमुकगोत्त्रो वसुस्स्वरूपस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।

२१६. अस्म्मदृत्त्विग् अमुकशर्म्मा अमुकगोत्त्रो वसुस्स्वरूपस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।

२१७. अस्म्मत्पत्नी अमुकी देवी अमुकगोत्त्रा वसुस्स्वरूपा तृप्प्यतामेतत् तस्स्या उदकन् तिलमिश्श्रं स्वधा नमः ।

२१८. अस्म्मत्पुत्त्रः अमुकशर्म्मा अमुकगोत्त्रो वसुस्स्वरूपस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।

२१९. अस्म्मत्पुत्त्री अमुकी देवी अमुकगोत्त्रा वसुस्स्वरूपा तृप्प्यतामेतत् तस्स्या उदकन् तिलमिश्श्रं स्वधा नमः ।

२२०. अस्म्मज्(त्)ज्येष्ठ-(कनिष्ठ-)पितृव्व्यः अमुकशर्म्मा अमुकगोत्त्रो वसुस्स्वरूपस्[3] तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।

२२१. अस्म्मत्सापत्नज्येष्ठ-(कनिष्ठ-)पितृव्व्यः अमुकशर्म्मा अमुकगोत्त्रो वसुस्स्वरूपस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।

---

१. माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिभिर् मातामही-प्रमातामही-वृद्धप्प्रमातामहीब्भ्यः पृथग् उदकन् दातुमनावश्श्यकम् प्रतीयते पूर्वोक्तकारणात् ।

२. स्वसूत्रे अनद्ध्यायविषये (पार. २।११।७) आशौचविषये उदकदानविषये च (पार. ३।१०।३९) आचार्यस्स्य विशिष्टस्स्य स्थानस्स्य दर्शनाद् वैदिकपरम्परायाव्वँ विद्द्यावंशस्स्याऽतीवमहत्त्वपूर्णत्वात् , स्नानसूत्त्रेऽपि "आचार्य्यगुरुशिष्ष्यर्त्त्विग्ग्ज्ज्ञातिबान्धवान्" इति चण्डेश्वर- श्रीदत्तमित्त्रमिश्श्रादिधृते शुद्धतरे पाठे आचार्यस्स्य प्राथम्म्येनोल्लेखात् , मातुलाय भागिनेयाय प्रत्ताब्भ्यस् स्त्रीब्भ्यश्च उदकदानस्स्यैव ऐच्छिकताया दर्शनाच् च (पार. ३।१०।४६,४७) अयङ् क्रमो माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिभिः पारस्क्करगृह्य्यसूत्त्र-त्रिकण्डिकस्नानसूत्त्रानुसारिभिराश्श्रयणीयोऽवगम्म्यते, न तु ताताम्बेत्त्यादिबोपदेवश्लोकोक्तः क्रमः ।

३. "स्वयव्वँ वै तेषाँ सह येषाँ सह" इति शतपथब्राह्म्मणवाक्क्य-(२।४।२।१९)स्स्वरसात् "सपत्नीकः सापत्त्यः" इत्त्यादेरुच्चारणम् माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिनाङ् कृतेऽनावश्श्यकम् ।

२२२. अस्म्मज्(त्)ज्येष्ठ(कनिष्ठ-[१])ब्भ्राता अमुकशर्म्मा अमुकगोत्त्रो वसुस्स्वरूपस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।

२२३. अस्म्मत्सापत्नज्येष्ठ-(कनिष्ठ-)ब्भ्राता अमुकशर्म्मा अमुकगोत्त्रो वसुस्स्वरूपस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।

२२४. अस्म्मच्छ्वशुरः अमुकशर्म्मा अमुकगोत्त्रो वसुस्स्वरूपस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।

२२५. अस्म्मत्सखा अमुकशर्म्मा अमुकगोत्त्रो वसुस्स्वरूपस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।

२२६. अस्म्मज्(त्)ज्येष्ठ(कनिष्ठ)मातुलः अमुकशर्म्मा अमुकगोत्त्रो वसुस्स्वरूपस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।

२२७. अस्म्मत्सापत्नज्येष्ठ(कनिष्ठ)मातुलः अमुकशर्म्मा अमुकगोत्त्रो वसुस्स्वरूपस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।

२२८. अस्म्मद्भागिनेयः[२] अमुकशर्म्मा अमुकगोत्त्रो वसुस्स्वरूपस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।

२२९. अस्म्मज्(त्)ज्येष्ठ(कनिष्ठ)पितृष्ष्वसा अमुकी देवी अमुकगोत्त्रा वसुस्स्वरूपा तृप्प्यतामेतत् तस्स्या उदकन् तिलमिश्श्रं स्वधा नमः ।

२३०. अस्म्मत्सापत्नज्येष्ठ(कनिष्ठ)पितृष्ष्वसा अमुकी देवी अमुकगोत्त्रा वसुस्स्वरूपा तृप्प्यतामेतत् तस्स्या उदकन् तिलमिश्श्रं स्वधा नमः ।

२३१. अस्म्मज्(त्)ज्येष्ठ(कनिष्ठ)मातृष्ष्वसा अमुकी देवी अमुकगोत्त्रा वसुस्स्वरूपा तृप्प्यतामेतत् तस्स्या उदकन् तिलमिश्श्रं स्वधा नमः ।

२३२. अस्म्मत्सापत्नज्येष्ठ(कनिष्ठ)मातृष्ष्वसा अमुकी देवी अमुकगोत्त्रा वसुस्स्वरूपा तृप्प्यतामेतत् तस्स्या उदकन् तिलमिश्श्रं स्वधा नमः ।

२३३. अस्म्मज्(त्)ज्येष्ठ(कनिष्ठ)स्स्वसा अमुकी देवी अमुकगोत्त्रा वसुस्स्वरूपा तृप्प्यतामेतत् तस्स्या उदकन् तिलमिश्श्रं स्वधा नमः ।

२३४. अस्म्मत्सापत्नज्येष्ठ(कनिष्ठ)स्स्वसा अमुकी देवी अमुकगोत्त्रा वसुस्स्वरूपा तृप्प्यतामेतत् तस्स्या उदकन् तिलमिश्श्रं स्वधा नमः ।

२३५. अस्म्मदाप्तः अमुकशर्म्मा अमुकगोत्त्रो वसुस्स्वरूपस् तृप्प्यतामेतत् तस्म्मा उदकन् तिलमिश्श्रं स्वधा नमः ।[३]

---

१. ज्येष्ठाय भ्रात्त्रे एव उदकन् देयन् न तु कनिष्ठायेति के चन मन्न्यन्ते । तद्वचनानि वीरमित्त्रोदये आह्न्निकप्प्रकाशे द्रष्टव्व्यानि (पृ. ३६८, ३७२, ३७५; वाराणसीसंस्करणे) ।

२. उदकार्हेषु मातुलेन सह भागिनेयस्स्यापि स्वशाखासूत्त्रे विशेषेणोपात्तत्वाद् (पार. ३।१०।४६) भागिनेयस्स्यात्त्रोपादनं कृतं बोध्यम् ।

३. पथि परदेशे परगृहे शक्त्यभावे समयाभावे सङ्कटे च आनुकूल्ल्याभावेन मूलोक्तप्प्रकारेण विस्तृतरूपेण देव-दिव्व्यमनुष्ष्य-दिव्व्यपितृ-यम-स्वपितृ-तर्पणे कर्तुमशक्क्ये सति "आब्रह्म्मस्स्तम्बपर्यन्तञ् जगत् तृप्प्यत्त्विति क्क्रमात् । जलाञ्जलित्त्रयन् दद्द्यादेतत् सङ्क्षेपतर्पणम्" इति →

[तर्पणान्ते ब्रह्मविष्णुरुद्रसवितृमित्त्रवरुणार्चने[1] मन्त्राः]

२३६. ब्रह्मम्मं जज्ञ्ज्ञानम् प्प्रथमम् पुरस्त्ताद् द्विसीमतः सुरुचो ब्वेन आवः ।
स बुद्ध्न्या ऽउपमा ऽअस्स्य बिष्ट्ठाः सतश्च् च योनिमसतश्च् च बि वः ॥१३।३॥

२३७. इदवँ विष्ण्णुर्व् बिचक्क्रमेत् त्रेधा निदधे पदम् ।
समूढमस्स्य पाँ सुरे ॥ मासं. ५।१५॥

२३८. नमस्त् ते रुद्द्र मन्न्यवऽ उतो तऽ इषवे नमः ।
बाहुब्भ्यामुत ते नमः ॥ मासं. १६।१॥

२३९. तत् त्सवितुर्व् बरेण्ण्यम् भर्ग्गो देवस्स्य धीमहि ।
धियो यो नः प्प्रचोदयात् ॥ मासं. ३।३५, २२।९, ३०।२, ३६।३ ॥

२४०. मित्त्रस्स्य चर्षणीधृतोऽवो देवस्स्य सानसि ।
द्युम्म्नञ् चित्रश्श्रवस्त्तमम् ॥ मासं. ११।६२॥

२४१. इमम् मे बरुणश् श्रुधी हवमद्द्या च मृडय ।
त्वामवस्स्युराचके ॥ मासं. २१।१॥

[उत्थाय सूर्यस्स्योपस्थाने मन्त्रौ]

२४२. अदृश्श्रमस्स्य केतवो बिरश्म्मयो जनाँ२ऽअनु ।
भ्राजन्तोऽ अग्ग्नयो यथा[2] ॥ मासं. ८।४०॥

२४३. हँ सः शुचिषद् द्वसुरन्तरिक्क्षसद् धोता बेदिषदतिथिर्द् दुरोणसत् ।
नृषद् द्वरसदृतसद् द्व्योमसदब्ब्जा गोजाऽऋतजाऽअद्द्रिजाऽऋतम् बृहत् ॥१०।२४,१२।१४॥

[दिशान् दिग्देवतानाञ् च नमस्कारे मन्त्राः[3]]

२४४. प्राच्च्यै दिशे नमः । २४५. आदित्त्याय[4] नमः ।

मदनपारिजातोद्धृत-शङ्खवचनानुसारं सङ्क्षिप्तरूपेण तर्पणङ् कर्तव्व्यम् (द्र. शङ्खलिखित-धर्मसूत्रवचनसङ्ग्रहे काणेकृते सङ् . १२२) ।

१. अर्चनमत्र मन्त्रेण स्तुतिरेव; अन्न्ये तु आहृतानां सुमनसामत्रोपयोग इति वदन्तो बृहद्योगि-याज्ञवल्क्यस्मृतिवचनम् प्रमाणयन्तश्च पुष्पार्पणमपि प्प्रतिपादयन्ति; आहृतानां सुमनसां सूर्यं प्रति क्षेपणे उपयोगेन चरितार्थत्त्वात् , बृहद्योगियाज्ञवल्क्यस्मृतिवचनस्य च कल्पान्तरत्त्वात् , बृहद्-योगियाज्ञवल्क्यस्मृत्त्युक्तनमस्कारमन्त्राणां सूत्रेऽनुल्लेखाच् च मन्त्रेण स्तुतिरेवाऽत्रार्चन-मित्त्यस्माकन् धारणा ।

२. "अदृश्श्रमस्स्य केतव इति हँसः शुचिषदित्त्येताब्भ्यामृग्भ्याम्" इति स्नानसूत्रव्याक्ख्यायां हरिहरेणोक्तत्वात् , संस्कारगणपतावपि (पृ.८०९) तथैवोक्तत्वात् , श्रीदत्तेनाचारादर्शेऽपि ऋच एवोपात्तत्त्वात् (पृ. ७७.), शत्त्रुघ्नमिश्श्रेण मन्त्रार्थदीपिकायामपि तर्पणप्प्रकरणेऽस्स्या ऋच एव व्याक्ख्यातत्त्वात् , ऋचामेवाऽत्र प्रायेण विनियुज्ज्यमानताया दृश्श्यमानत्त्वाच् च एतावन्मात्र एवाऽयम् मन्त्रो न तु नैपालीयश्राद्धपद्धत्त्यादिषु दृश्श्यमान इव उपयामगृहीतोसीत्त्यादिसहित इति बोद्ध्यम् ।

३. दिग्भ्यो नमः दिग्देवताब्भ्यो नम इत्त्येतावानेव प्प्रयोग इति आचारादर्शे श्रीदत्तः ।

४. मा. वा. शतपथब्राह्मणे (१४।६।९२१) प्राच्यां दिशो देवता आदित्त्य उक्तोऽस्तीति माद्ध्यन्दिनीय-वाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिभिरेवमेव प्रयोगः कर्तुमुचितः । इन्द्र इत्त्यपि आदित्त्यस्स्यैव नामेत्त्यपि बोध्यम् ।

२४६. आग्नेय्यै दिशे नमः[1] ।
२४७. अग्नये नमः ।
२४८. दक्क्षिणायै दिशे नमः ।
२४९. यमाय नमः ।
२५०. नैर्ऋत्त्यै[2] दिशे नमः ।
२५१. निर्ऋतये नमः ।
२५२. प्रतीच्च्यै दिशे नमः ।
२५३. वरुणाय नमः ।
२५४. वायव्व्यै दिशे नमः ।
२५५. वायवे नमः ।
२५६. उदीच्च्यै दिशे नमः ।
२५७. सोमाय[3] नमः ।
२५८. ऐशान्न्यै दिशे नमः ।
२५९. ईशानाय नमः ।
२६०. ऊर्द्ध्वायै[4] दिशे नमः (ध्रुवायै दिशे नमः)।
२६१. अग्ग्ँनये नमः[5] ।
२६२. अवाच्च्यै दिशे नमः[6] ।
२६३. अनन्ताय नमः ।

[उपविश्य ब्रह्म्मादीनान् नमस्कारे[7] मन्त्राः]

२६४. ब्रह्म्मणे नमः ।
२६५. अग्ग्ँनये नमः ।
२६६. पृथिब्व्यै नमः ।
२६७. ओषधिब्भ्यो नमः ।
२६८. बाचे नमः ।
२६९. बाचस्प्पतये नमः ।
२७०. बिष्ण्णवे महते नमः[8] ।
२७१. अद्द्भ्यो नमः ।
२७२. अपाम्पतये नमः ।
२७३. बरुणाय नमः ।

---

१. वस्तुतस् तु माद्ध्यन्दिनीयवाजसनेयिनाङ् कृतेऽवान्तरदिशान् तद्देवतानाञ् च नमस्करण-मनावश्श्यकम् , मन्त्रसंहितायाम् (२२।२४) ब्राह्म्मणे च (१४।६।९।२०-२५) तासामनुल्लेखात् , दिग्व्याघारणे (काश्रौ. ४।४।१३), सीतायज्ञप्प्रकरणे (पार. २।१७।१३-१६) शालाकर्मप्प्रकरणे च (पार. ३।४।१४-१७) तासामुल्लेखस्स्यादर्शनात् ।

२. एतादृशे पदे रेफऋकारयोर् लेखनस्स्योच्चारणस्स्य च विषये विद्व्द्भिस् सावधानैर् विवेचन-शीलैश् च भाव्व्यम्,कौण्डिन्न्यायनशिक्क्षा च द्रष्टव्व्या ।

३. मा.वा. शतपथब्राह्म्मणे (१४।६।९।२४) उदीच्च्या दिशो देवता सोम उक्तोऽस्तीति माद्ध्यन्दिनीय-वाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिभिरेवमेव प्रयोगः कर्तुमुचितो भाति । ब्रह्म्मोक्तयाज्ञवल्क्य-संहितायामपि "सोमाय नमः" इति दृश्श्यते (२।१११)।

४. मन्त्रसंहितायाम् (२२।२४) एतादृश एव प्रयोगः प्राप्प्यते । ब्राह्म्मणे तु (१४।६।९।२५) ऊर्ध्वा दिग् ध्रुवा दिगुक्ताऽस्ति । तत्त्र मन्त्रस्स्थः प्रयोग एवोपादेयतरोऽवगम्म्यते ।

५. ऊर्ध्वाया दिशो देवताऽग्निरिति शतपथब्राह्म्मणे (१४।६।९।२५) उक्तमस्ति । अत्त्र "एतमेके वदन्त्यग्निम् मनुमन्न्ये प्रजापतिम् । इन्द्रमेके परे प्राणमपरे ब्रह्म्म शाश्श्वतम्" इति मनुस्मृति-(१२।१२३)वचनञ् च स्स्मर्तव्व्यम् ।

६. मन्त्रसंहितायाम् (२२।२४) अधरा दिग् अवाची दिगुक्ताऽस्ति । तत्त्रोर्ध्वाया दिशोऽवाच्च्या दिशश् चाऽयमेव क्रमो वर्तते । ब्रह्म्मोक्तयाज्ज्ञवल्क्यसंहितायामपि "अवाच्च्यै दिशे नमः" इति दृश्श्यते (२।१११) ।

७. एते मन्त्रा जलदानपूर्वके नमस्कारे प्रयोज्ज्या इति बृहद्योगियाज्ज्ञवल्क्यस्मृतिप्रत्त्ययनेया वदन्ति। वयन् तु स्वसूत्त्रेऽनुक्तत्त्वाद् उक्तस्मृत्त्युक्तकल्पस्स्य प्रकारान्तरत्त्वाच् च तन् नाऽद्द्रियामहे ।

८. अस्स्य नमस्कारविधेर् मूलमजानन्तो बहवः खलु "महद्भ्यो नमः" इति पृथग्नमस्कारम् प्रतिपादयन्ति; "नमो ब्रह्म्मणे नमोऽस्त्वग्नये नमः पृथिव्व्यै नम ओषधिब्भ्यः । नमो वाचे नमो वाचस्पतये नमो विष्णवे महते करोमि" इति आश्श्वलायनगृह्य्यसूत्त्रधृताम् ऋचम् पश्श्यन्तो वयन् तु एतादृशमेव प्प्रयोगं साधीयांसम् मन्न्यामहे । "विष्णवे महते तथा" इति बृहद्योगि-याज्ञवल्क्यस्मृतावपि दृश्श्यते (७।१०३) । उक्तायामृचि महते इत्त्यनेन सह पृथङ् नमश्शब्दोऽपि नास्तीति च विचार्यम् ।

[मुखविमार्जनमन्त्रः (मासं. २।२४,८।१४)]

२७४. सवँ वर्च्चसा पयसा सन् तनूभिरगन्न्महि मनसा सᳬ शिवेन ।
त्वष्ट्टा सुदत्त्रो बिदधातु रायोऽनु मार्ष्ट्टु तन्न्वो यद् द्विलिष्ट्टम् ॥२।२४॥

[देवविसर्जनमन्त्रः]

२७५. देवा गातुविदो गातुवँ वितुत्वा गातुमित ।
मनसस्प्पत ऽइमन् देव यज्ञँत्र ᳬ स्वाहा बाते धाः ॥ मासं. ८।२१ ॥

(माद्ध्यन्दिनीयवाजसनेयिनिरग्निकद्विजकर्तव्यपञ्चमहायज्ञमन्त्राः)

[प्रथमयज्ञपार्श्वोक्तवैश्वदेवकर्ममन्त्राः[1]]

[तत्रादौ देवयज्ञमन्त्राः]

२७६. भूः स्वाहा (एतदग्नये न मम)[2] ।
२७७. भुवः स्वाहा (एतद् वायवे न मम) ।
२७८. स्वः स्वाहा (एतत् सूर्याय न मम) ।
२७९. भूर्व् भुवः स्वः स्वाहा (एतत् प्रजापतये न मम) ।
२८०. देवकृतस्स्यैनसोऽवयजनमसि स्वाहा[3] (एतदग्नये न मम) ।
२८१. मनुष्ष्यकृतस्स्यैनसोऽवयजनमसि स्वाहा (एतदग्नये न मम) ।
२८२. पितृकृतस्स्यैनसोऽवयजनमसि स्वाहा (एतदग्नये न मम) ।
२८३. आत्मकृतस्स्यैनसोऽवयजनमसि स्वाहा (एतदग्नये न मम) ।

---


१. वैद्यनारायणशर्मसङ्गृहीताह्निकसूत्रावलौ मूले (पृ.२००) प्रदर्शितो वैश्वदेवप्रयोगः पृष्ट्टोदिविविधानेन स्थापितेऽनुकल्पकाग्नौ कर्माणि कुर्वाणानाङ् गृहस्थद्विजानाङ् कृतेऽस्ति, स चाऽपूर्णोऽप्यस्ति, पृष्ट्टोदिविविधानेन स्थापितेऽनुकल्पकाग्नौ कर्माणि कुर्वाणैर् गृहस्थद्विजैस् तु सायम्प्रातर्होमपक्षादिकर्मादिकञ् च कर्तव्यम् भवति, तेषान् नियमा अन्न्ये, अत्र दीयमाना मन्त्रास् तु सायम्प्रातर्होमादिकम् अकुर्वाणानाम् प्रथमयज्ञपार्श्वानुसारलँ लौकिकाग्नौ प्रतिदिनन् देवयज्ञरूपं होमम् भूतयज्ञादिकञ् च कर्तुम् प्रवृत्तानाम् पञ्चमहायज्ञकारिणाङ् कृतेऽस्ति । "शालाग्नौ लौकिके वाऽपि हुतशेषे जले क्षितौ । वैश्वदेवः सदा कार्यः पञ्चसूनापनुत्तये" इति प्रथमयज्ञपार्श्वे, श्लो.१७, द्र. आचारादर्शे पृ. ८७,वीर.आह्निक. पृ. ३९३, आह्निकसू. पृ. १९८ ।

२. एते होमाः परिसमुह्य्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्य लौकिकाग्निमुपसमाधाय कर्तव्याः, उपसमाधानार्थञ् च न मन्त्रस्याऽऽवश्यकता । यद्यपि अस्माभिर् दृष्टे प्रथमयज्ञपार्श्वपाठे "व्याहृतिभिस् समस्ताभिर् व्यस्ताभिश्च ततः परम्" इति पट्ठ्यते, एवमेव संस्कारगणपतौ च (पृ.८५५); त्र्यम्बकात्मजेन बालभट्टेन सङ्गृहीते १९८०तमे वैक्रमेऽब्दे मुद्रिते शुक्लयजुर्वेदीयानामाह्निके १२९तमे पृष्ठे प्रथमं समस्ताभिस् ततो व्यस्ताभिर् व्याहृतिभिर् होमश्च प्रतिपादितः; तथापि तादृशस्स्य प्रयोगस्स्य कात्त्यायनश्रौतसूत्रस्य(२५।१।१२) अननुकूलत्त्वादस्माभिश् श्रौतसूत्रानुकूलोऽयङ् क्रम आश्रितो बोद्ध्यः । वैद्यनारायणशर्मणाऽपि आह्निकसूत्रावलिटिप्पण्याङ् केषुचित् पुस्तकेषु दृश्श्यमानत्त्वेनाऽयमेव क्रम उल्लिखितः (पृ. २०१) । प्रथमयज्ञपार्श्वपाठोऽपि "व्याहृतिभिश्च व्यस्ताभिः समस्ताभिस् ततः परम्" इति स्वसूत्रानुकूल एव प्रामाणिको भवेत् । "व्यस्ताभिर् व्याहृतीभिस्तु समस्ताभिस् ततः परम् । षड्भिर् देवकृतस्स्येति मन्त्रवद्भिर् यथाक्रमम् ॥ प्राजापत्यं स्विष्टकृतं हुत्वैवं द्वादशाहुतीः । ओङ्कारपूर्वः स्वाहान्तस् त्यागः स्विष्टविधानतः" इति वेदव्यासस्मृतावपि दृश्श्यते (३।३२-३४) ।

३. एते शाकलमन्त्रा माद्ध्यन्दिनीय-वासनेयि-शुक्ल-यजुर्वेद-मन्त्रार्षसंहितायामाम्नाताः (८।१३) ।

२८४. एनॅसऽएनसोऽवयजॅनमसि स्वाहा (एतदग्नये न मम)।
२८५. यच् चाऽहमेनो विद्द्वाँश्च् चकार यच् चाऽविद्द्वाँसुत् तसस्य
सर्ब्बस्स्यैनॅसोऽवयजॅनमसि स्वाहा (एतदग्नये न मम)।
२८६. प्रजापतयेस् स्वाहा[1] (एतत् प्रजापतये न मम)।
२८७. अग्गॅनयेस् स्विष्ट्टकृतेस् स्वाहा[2] (एतदग्नयेस् स्विष्टकृते न मम)।

[भूतयज्ञे भूमौ बलीनां हरणे मन्त्राः (पार. २।९।४-१०)]



२८८. धात्त्रे नमः (एतद् धात्त्रे न मम)।
२८९. बिधात्त्रे नमः (एतद् विधात्त्रे न मम)।
२९०. बायवे नमः (एतद् वायवे न मम)।
२९१. प्राच्च्यै दिशे नमः (एतत् प्राच्च्यै दिशे न मम)।
२९२. बायवे नमः (एतद् वायवे न मम)।
२९३. दक्क्षिणायै दिशे नमः (एतद् दक्क्षिणायै दिशे न मम)।
२९४. बायवे नमः (एतद् वायवे न मम)।
२९५. प्रतीच्च्यै दिशे नमः (एतत् प्रतीच्च्यै दिशे न मम)।
२९६. बायवे नमः (एतद् वायवे न मम)।
२९७. उदीच्च्यै दिशे नमः (एतदुदीच्च्यै दिशे न मम)।
२९८. ब्रह्म्मणे नमः (एतद् ब्रह्म्मणे न मम)।
२९९. अन्तरिक्क्षाय नमः (एतदन्तरिक्क्षाय न मम)।
३००. सूर्य्याय नमः (एतत् सूर्य्याय न मम)।
३०१. बिश्श्वेब्भ्यो देवेब्भ्यो नमः (एतद् विश्श्वेब्भ्यो देवेब्भ्यो न मम)।
३०२. बिश्श्वेब्भ्यो भूतेब्भ्यो नमः (एतद् विश्श्वेब्भ्यो भूतेब्भ्यो न मम)।
३०३. उषसे नमः (एतदुषसे न मम)।
३०४. भूतानाम्पतये नमः (एतद् भूतानाम्पतये न मम)।

[पितृयज्ञे[3] मन्त्रः (पार. २।९।९)]

३०५. पितृब्भ्यः स्वधा नमः (एतत् पितृब्भ्यो न मम)।

[पात्त्रीनिर्णेजननिनयनमन्त्रः (पार. २।९।१०)]

३०६. यक्क्ष्मैतत् ते (निर्ण्णेजनन्) नमः (एतद् यक्क्ष्मणे न मम)।

[मनुष्ष्ययज्ञे[4] मनुष्ष्याय (ब्राह्म्मणाय) अन्नस्स्य दाने मन्त्रः (पार. २।९।११)]

३०७. हन्त ते अन्नम्।

---

१. पार. १।९।३,४; १।११।३, १।१२।३ (१।५।३)।
२. पार. १।१२।३ (१।५।३)।
३. नित्त्यं श्राद्धन् निरग्नेः स्यात् साग्नेः पित्र्यो वलिः स्मृतः।
पितृयज्ञोऽयमाक्ख्यातोऽनग्नेर् वा पैतृको वलिः॥ इति प्रथमयज्ञपार्श्वे, श्लो. १३।
४. मनुष्ष्ययज्ञात् पूर्वङ् कर्तव्यस्स्य ब्रह्म्मयज्ञस्स्य पूर्वोत्तराङ्गमन्त्राः पूर्वमेव सङ्गृहीताः।

(भोजनमन्त्राः [शिष्टसङ्गृहीतभोजनसूत्राद्युक्ताः])

[जलादिना मण्डलकरणे मन्त्रः]

३०८. भूर्व् भुवः स्वः[1] ।

[जलादिना मण्डलकरणे वैकल्पिको मन्त्रः]

३०९. यथा चक्क्रायुधो विष्णुस् त्रैलोक्क्यम् परिरक्षति ।
एवम् मण्डलवार्येतत् सर्वभूतानि रक्षतु ॥

[परिविष्टान्नस्तुतिमन्त्रः]

३१०. पितुन् नुसत् तौषम् महो धर्म्माणन् तविषीम् ।
यसस्य॑त् त्रितोव् ब्योजसा बृत्रवँ विपर्ब्बमरद्दयत् ॥ मासं. ३४।७ ॥

[परिविष्टान्नाभिमन्त्रणमन्त्राः (मासं. १६।१६;४६;४१)]

३११. मा नंस्त् तोके तनंये मा नऽ आयुंषि मा नो गोषु मा नोऽ अश्श्वेषु रीरिषः ।
मा नों बीरान् त्रुद्द्र भामिनो बधीर् हविष्म्मन्तः सदमित् त्वा हवामहे ॥

३१२. नमों वः किरिकेब्भ्यों देवानाँ हृदयेब्भ्यो नमों बिचिन्न्वत्तकेब्भ्यो
नमों बिक्क्षिणत्तकेब्भ्यो नमऽ आनिर्हतेब्भ्यः ॥

३१३. नमः शम्भुवाय च मयोभुवाय च नमः शङ्कराय च मयस्क्कराय च
नमः शिवाय च शिवतराय च ॥

[प्रातराशे परिविष्टान्नप्रोक्षणे मन्त्रः]

३१४. सत्त्यन् त्वर्त्तेन परिषिञ्चामि ।

[सायमाशे परिविष्टान्नप्रोक्षणे मन्त्रः]

३१५. ऋतन् त्वा सत्त्येन परिषिञ्चामि ।

[परिविष्टान्नाभिमर्शने मन्त्रः]

३१६. तेजोऽसि शुक्क्रमसस्यमृतमसि ॥ मासं. १।३१ ॥

[भोक्तुरात्मनोऽग्नित्त्वेन ध्याने मन्त्रः]

३१७. अग्ग्गँनिरस्म्मि जन्न्मना जातवेदा घृतम् मे चक्क्षुरमृतम् मऽआसन् ।
अर्क्कस्त् त्रिधातू रजसो बिमानोऽजस्स्रो घर्म्मो हविरस्म्मि नाम ॥१८।६६॥

[प्रातराशे भूमौ वलीनां हरणे मन्त्राः]

३१८. भुवपतयेस् स्वाहा नमः[2] ।
३१९. भुवनपतयेस् स्वाहा नमः ।
३२०. भूतानाम्पतयेस् स्वाहा नमः ।
३२१. धर्मायस् स्वाहा नमः ।
३२२. धर्मराजायस् स्वाहा नमः ।
३२३. चित्रायस् स्वाहा नमः ।

---

१. "इह व्याहृतिभिस् त्वन्नम् परिधायोदकेन तु । परिषेचनमन्त्रेण परिषिच्च्य ततः परम् ॥ चित्रगुप्तवलिन् दत्त्वा तदन्नं परिषिच्च्य च । अमृतोपस्तरणमसीत्त्यापोशनक्रियात्र् चरेत्" इति औशनसस्मृतौ ३।१०१-१०३ । ब्रह्मोक्तयाज्ञवल्क्यसंहिता च दृश्श्या २।१६८-१७१॥

२. भूपतये इति वहवः प्रतिपादयन्ति; किन्तु अग्न्यग्र्यांशकानाम् भुवपति-भुवनपति-भूतानाम्पतीनां स्वशाखामन्त्रसंहितायाम् (२।२) स्वशाखाब्राह्मणे (१।३।३।१७) च दर्शनादेवमेव माद्ध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाद्ध्यायिभिः प्रयोगः कर्तव्यः । (द्रष्टव्या ब्रह्मोक्तयाज्ञवल्क्यसंहिता २।१६९, स्कन्दपुराणकाशीखण्डञ्च च ३५।२२१) ।

३२४. चित्रगुप्तायस् स्वाहा नमः । ३२५. मृत्त्यवेस् स्वाहा नमः ।
३२६. सर्व्वेभ्यो भूतेभ्यः स्वाहा नमः ।

[सायमाशे भूमौ बलीनां हरणे मन्त्राः]

३२७. भुवपतयेस् स्वाहा नमः । ३२८. भुवनपतयेस् स्वाहा नमः ।
३२९. भूतानाम्पतयेस् स्वाहा नमः। ३३०. सर्व्वेभ्यो भूतेभ्यःस्वाहा नमः ।

[अग्नौ हवने मन्त्रः]

३३१. सर्व्वतोमुखायस् स्वाहा ।

[पूर्वापोशने मन्त्रौ (लघुव्यास.२।१७, शङ्ख.१०।१७)]

३३२. अन्तश् चरसि भूतेषु गुहायाव्ँ विश्श्वतोमुखः ।
त्वयँ यज्ञस् त्वव्ँ वषट्कार आपो ज्योती रसोऽमृतम् ॥
३३३. अमृतोपस्तरणमसिस् स्वाहा ।

[प्राणाग्निहोत्त्रे[1] मन्त्राः]

३३४. प्राणायस् स्वाहा । ३३५. अपानायस् स्वाहा । ३३६. व्यानायस् स्वाहा ।
३३७. समानायस् स्वाहा[2] । ३३८. उदानायस् स्वाहा ।

[भोजनान्ते उच्छिष्टभोजिपितृभ्योऽन्नस्स्य दाने मन्त्रः]

३३९. मद्भुक्तोच्छिष्टमन्नयँ ये भुञ्जते पितरोऽधमाः ।
तेषामन्नम् मया दत्तमक्क्षय्यमुपतिष्ठतु ॥

[उत्तरापोशने मन्त्रः]

३४०. अमृतापिधानमसिस् स्वाहा ।

[उत्तरापोशनशेषस्स्य रौरववासिभ्यो दाने मन्त्रः]

३४१. रौरवेऽपुण्ण्यनिलये पद्मार्बुदनिवासिनाम् ।
अर्थिनां सर्वभूतानामक्क्षय्यमुपतिष्ठतु ॥

[भोजनोत्तरमाचमनान्ते दक्षिणपाणेर् दक्षिणपादाङ्गुष्ठे निस्स्रावणे मन्त्रः]

३४२. अङ्गुष्ठमात्त्रः पुरुषोऽङ्गुष्ठञ् च समाश्श्रितः ।
ईशः सर्वस्स्य जगतः प्रभुः प्रीणातु विश्श्वभुक् ॥

[नाभेरालम्भने मन्त्रः (मासं. ४।१२)]

३४३. श्वात्त्राः पीता भवत यूयमापो अस्म्माकमन्तरुदरे सुशेवाः ।
ताऽअस्म्मभ्यमयक्ष्माऽअनमीवाऽअनागसः स्वदन्तु देवीरमृतोऽऋतावृधः ॥

[उदरस्स्याऽऽलम्भने मन्त्रः]

३४४. अगस्त्यव्ँ वैनतेयञ् च शनिञ् च वडवानलम् ।
आहारपरिणामार्थं स्मरेद् भीमञ् च पञ्चमम् ॥

---

१. प्राणाग्निहोत्त्रञ् छान्दोग्योपनिषदि (५।१९।१-५।२४।५) प्रतिपादितमस्ति । आथर्वणप्राणाग्निहोत्त्रोपनिषदि च विस्तरेण प्रतिपादितमस्ति । बौधायनधर्मसूत्त्रेऽपि (२।७।१) प्राणाहुतयो व्याक्ख्यातास् सन्ति । ब्रह्म्ममीमांसासूत्त्रेऽपि प्राणाग्निहोत्त्रविषये विचारः कृतोऽस्ति (३।३।४०,४१) ।

२. प्राणाग्निहोत्त्रोपनिषदि अयमेव क्रमोऽस्ति । आचारादर्शे चाऽयमेव क्रमः प्रतिपादितः ।

[चक्क्षुरिन्द्रियरक्क्षणाय भोजनान्ते स्मरणीयानां स्मरणे मन्त्रः]

३४५. शर्यातिञ् च सुकन्न्याञ् च च्यवनं शक्क्रमश्श्विनौ ।
भोजनान्ते स्मरेन् नित्त्यन् तस्स्य चक्क्षुर् न हीयते ॥

(रथारोहणमन्त्राः [पार. ३।१४।२-१३])

[रथयोजनाज्ज्ञापने मन्त्रः]

३४६. युङ्क्त ।

[युक्त इति प्प्रोक्ते रथम् प्रति गमने मन्त्रः]

३४७. सा विराट् ।

[रथस्स्य दक्क्षिणचक्क्रस्स्याभिमर्शने मन्त्रः]

३४८. रथन्तरमसि ।

[रथस्स्योत्तरचक्क्रस्स्याभिमर्शने मंन्त्रः]

३४९. वृहदसि ।

[रथकूवर्या अभिमर्शने मन्त्रः]

३५०. वामदेव्व्यमसि

[रथोपस्थाभिमर्शने मन्त्रः]

३५१. अङ्कौन् न्यङ्कावभितो रथयँ यौद् ध्वान्तवँ वाताग्ग्रमनुसञ्चरन्तम् ।
दूरेहेतिरिन्द्रियवान्न् पतत्त्रि ते नोऽग्गँनयः पप्प्रयः पारयन्तु ॥

[दक्क्षिणस्स्य धुर्यस्स्य प्राजने मन्त्रः]

३५२. नमो माणिचराय ।

[मुहूर्तं रथे यात्राङ् कृत्त्वा जपनीयो मन्त्रः]

३५३. इह रतिरिह रमदध्वम् ॥ मासं. ८।५१ ॥

[दुर्वलस्स्य रथस्स्यारोहणे तं रथमास्थाय जपनीयो मन्त्रः]

३५४. अयवँ वामश्श्विना रथो मा दुर्ग्गे मास्त् तरो रिषत् ।

[रथस्स्य गतेर् वैषम्म्ये रथद्ध्वजस्तम्भं भूमिवँ वा स्पृष्ट्वा जपनीयो मन्त्रः]

३५५. एष वामश्श्विना रथो मा दुर्ग्गे मास्त् तरो रिषत् ।

(हस्त्यारोहणे मन्त्रौ [पार. ३।१५।२,३])

३५६. हस्त्तियशसमसि हस्त्तिवर्च्चसमसि ।

३५७. इन्द्रस्स्यत् त्वा बज्ज्रेणाभितिष्ट्ठामिस् स्वस्त्ति मा सम्पारय ।

(अश्श्वारोहणे मन्त्रौ [पार. ३।१५।४])

३५८. अश्श्वयशसमसिऽअश्श्ववर्च्चसमसि ।

३५९. इन्द्रस्स्यत् त्वा बज्ज्रेणाभितिषट्ठामिस् स्वस्त्ति मा सम्पारय ।

(उष्ट्रमारोक्क्ष्यत उष्ट्राभिमन्त्रणे मन्त्रः [पार. ३।१५।५]

३६०. त्वाष्ट्ट्रोऽसित् त्वष्ट्टृदैवत्त्यः स्वस्त्ति मा सम्पारय ।

(रासभमारोक्क्ष्यतो रासभाभिमन्त्रणे मन्त्रः [पार. ३।१५।६])

३६१. शूद्द्रोऽसि शूद्द्रजन्न्माऽऽग्गँनेयो वैद् द्विरेताः स्वस्त्ति मा सम्पारय ।

(नदीमुत्तरिष्यतो नद्या अभिमन्त्रणे मन्त्रः [पार. ३।१५।८])

३६२. नमो रुद्रायाऽप्प्सुषदेस् स्वस्त्ति मा सम्पारय ।

(नावमारोक्ष्यतो नावोऽभिमन्त्रणे मन्त्रः [पार. ३।१५।९])

३६३. सुनावमारुहेयमस्स्रवन्तीमनागसम् । शतारित्त्राꣳ स्वस्त्तये ॥२१।७॥

(नाव उत्तरिष्यतो नावोऽभिमन्त्रणे मन्त्रः [पार. ३।१५।१०])

३६४. सुत्त्रामाणम् पृथिवीन् द्यामनेहसꣳ सुशर्म्माणमदितिꣳ सुप्प्रणीतिम् ।
दैवीन् नावꣳ स्वरित्त्रामनागसमस्स्रवन्तीमारुहेमास् स्वस्त्तये ॥२१।६॥

(वनम् प्रवेक्ष्यतो वनाभिमन्त्रणे मन्त्रः [पार. ३।१५।११])

३६५. नमो रुद्द्राय बनसदेस् स्वस्त्ति मा सम्पारय ।

(गिरिमारोक्ष्यतो गिरेरभिमन्त्रणे मन्त्रः [पार. ३।१५।१२])

३६६. नमो रुद्द्राय गिरिषदेस् स्वस्त्ति मा सम्पारय ।

(मार्गे श्मशानस्स्य दर्शने श्मशानस्स्याभिमन्त्रणे मन्त्रः [पार. ३।१५।१३])

३६७. नमो रुद्द्राय पितृषदेस् स्वस्त्ति मा सम्पारय ।

(मार्गे गोष्ठस्स्य दर्शने गोष्ठस्स्याभिमन्त्रणे मन्त्रः [पार. ३।१५।१४])

३६८. नमो रुद्द्राय शकृत्त्पिण्डसदेस् स्वस्त्ति मा सम्पारय ।

(सभाम् प्रति अभिमुखीभावे जपनीयो मन्त्रः [पार. ३।१३।२])

३६९. सभाऽऽङ्गिरसि नादिर्न् नामासित् त्विषिर्न् नामासि तस्स्यै ते नमः ।

(सभाप्रवेशे जपनीयो मन्त्रः [पार. ३।१३।३])

३७०. सभा च मा समितिश्च् चोभेप् प्रजापतेर्द् दुहितरौ सचेतसौ ।
यो मा न विद्द्यादुप मा स तिष्ट्ठेत् त्स चेतनो भवतु शꣳसथे जनः ॥

(पर्षदमेत्त्य जपनीयो मन्त्रः [पार. ३।१३।४])

३७१. अभिभूरहमागममविराडप्प्रतिवाश्श्याः ।
अस्स्याः पर्षद ईशानः सहसा सुदुष्ट्टरो जनः ॥

(क्रुद्धत्त्वेनाऽभिमतस्स्य सभापतेरभिमन्त्रणे मन्त्रः [पार. ३।१३।५])

३७२. या त एषा रराट्ट्या तनूर्म् मन्न्योःक् क्रोधस्स्य नाशनी ।
तान् देवाब् ब्रह्म्मचारिणो बिनयन्त्तु सुमेधसः ।
द्यौरहम् पृथिवी चाऽहन् तौ तेक् क्रोधन् नयामसि
गर्ब्भमश्श्वतर्य्यसहा (अमुकशर्म्मन्) ।

(द्रोहकारित्त्वेनाऽभिमतस्स्य सभापतेरभिमन्त्रणे वशीकरणे च मन्त्रः [पार. ३।१३।६,७])

३७३. तान् ते बाचमास्स्यऽआदत्त्ते हृदयऽआदधे यत्त्रयत्त्र निहिता बाक्क्
तान् ततस्त्ततऽ आददे यदहम् ब्रवीमि तत् त्सत्त्यमधरो मत् तान् द्यस्स्व ॥

(प्रोष्ष्याऽऽगतस्स्य गृहोपस्थाने मन्त्राः [पार. १।१८।१, काश्रौ. ४।१२।२१])

३७४. गृहा मा बिभीत मा बेपद्ध्वमूर्ज्जम् बिब्भ्रतऽ एमसि ।
ऊर्ज्जम् बिब्भ्रद् द्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः ॥३।४१॥

३७५. येषांमद्ध्येतिप् प्रवसन् न्येषु सौमनसो बहुः।
गृहानुपंह्वयामहे ते नो जानन्तु जानतः॥ मासं. ३।४२ ॥

३७६. उपंहूताऽ इह गावऽ उपंहूताऽ अजावयंः।
अथोऽ अन्नंस्स्य कीलालऽ उपंहूतो गृहेषु नः॥ मासं. ३।४३ ॥

(प्रोष्ष्यागतस्स्य गृहप्प्रवेशे मन्त्रः [काश्रौ. ४।२।२२])

३७७. क्षेमांय वः शान्त्यैप् प्रपंद्द्ये शिवꣳ शग्ग्ँमꣳ शय्यँयोःशय्यँयोः॥ ३।४३ ॥

(प्रोष्ष्यागतस्स्य पुत्रन् दृष्ट्वा जपनीयो मन्त्रः [पार. १।१८।२])

३७८. अङ्गादङ्गात् त्सम्भवसि हृदयादधिजायसे।
आत्त्ँमा वै पुत्त्रनामासि स जीव शरदः शतम्॥ (द्र. शत. १४।९।४।८,२६)

(प्रोष्ष्यागतस्स्य पुत्त्रशिरोवग्घ्राणे मन्त्रः [पार. १।१८।३])

३७९. प्रजापतेष्ट् ट्वा हिङ्कारेणावजिग्घ्रामि सहस्स्रायुषा (अमुकशर्म्मन्न्)
जीव शरदः शतम्।

(प्रोष्ष्यागतस्स्य पुनस् त्रिः पुत्त्रशिरसोऽवग्घ्राणे सकृत् प्रयोज्ज्यो मन्त्रः [पार. १।१८।४])

३८०. गवान् त्वा हिङ्कारेणावजिग्घ्रामि सहस्स्रायुषा (अमुकशर्म्मन्न्) जीव शरदः शतम्।

(प्रोष्ष्यागतस्स्य पुत्त्रदक्षिणकर्णे जपनीयो मन्त्रः [पार. १।१८।४])

३८१. अस्म्मेप् प्रयन्धि मघवन् नृजीषिन् निन्द्र रायो बिश्श्ववारस्स्य भूरेः।
अस्म्मे शतꣳ शरदो जीवसे धाऽ अस्म्मे बीरान्न् छश्श्वतऽ इन्द्र शिप्प्रिन्॥

(प्रोष्ष्यागतस्स्य पुत्त्रसव्व्यकर्णे जपनीयो मन्त्रः [पार. १।१८।५])

३८२. इन्द्रश् श्रेष्ट्ठानिद् द्रविणानि धेहि चित्तिन् दक्क्षस्स्य सुभगत्त्वमस्म्मे।
पोषꣳ रयीणामरिष्ष्टिन् तनूनाꣳ स्वात्तंमानवँ वाचः सुदिनत्त्वमह्नाम्॥

(शालाकर्ममन्त्राः [पार. ३।४।३-१८])

[अग्निस्स्थापनकण्डिका कुशकण्डिका कुशण्डी वा[1] (पार. १।१।२-४)]

३८३. परिसमुह्ह्योपलिप्प्योल्लिक्ख्योद्धृत्त्यावभ्युक्क्ष्याग्ग्ँनिमुपसमाधाय दक्क्षिणतोब् ब्रह्म्मासनमास्त्तीर्य्यप् प्रणीय परिस्त्तीर्य्यार्त्थवदासाद्द्य पवित्त्रे कृत्त्वाप् प्रोक्क्षणीः सँस्कृत्त्याऽर्त्थवत्त् प्रोक्क्ष्य निरुप्प्याज्ज्यमधिश्श्रित्त्य पर्य्यग्ग्ँनि कुर्य्यात्। स्रुवम् प्रतप्प्य सम्मृज्ज्यावभ्युक्क्ष्य पुनःप् प्रतप्प्य निदद्ध्यात्। आज्ज्यमुद्द्वास्स्योत्त्पूयावेक्क्ष्यप् प्रोक्क्षणीश्च् च पूर्व्ववदुपयमनान्न् कुशानादाय समिधोऽवभ्यादाय पर्य्युक्क्ष्य जुहुयात्॥

---

१. एषा कण्डिका न मन्त्रः, तथापि मन्त्रा यथा क्रियमाणकर्मानुवादिनस् तथैवैषेति अत्त्रैषा सङ्गृहीता वोद्ध्या। शालाकर्मादिषु कर्मसु संस्कारकर्मसु च माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिभिरेतत्कण्डिकोक्तपद्धत्त्यैवाऽग्निस्थापनङ् कार्यम्। अन्न्येषु पौराणकर्मस्स्वपि स्वगृह्य्योक्तपद्धत्यैवाग्निस्थापनङ् कार्यमिति तत्त्रतत्त्र पुराणप्प्रकरणेष्ष्वप्प्युक्तन् दृश्श्यते। शान्तिकपौष्टिककर्मादिष्ष्वपि एषैव पद्धतिरनुसरणीयेति कर्कोपाद्ध्यायप्प्रभृतयः। आगमाद्द्युक्तशान्तिकपौष्टिकादिकर्मसु विकल्पेन समन्त्राग्निस्स्थापनपद्धतिरप्प्यनुसर्तुं शक्क्या प्रतीयते।

[पूर्णाहुतिवदाज्ज्यं सँस्कृत्त्य स्तम्भशालाया महाशालाया वा चतुर्षु कोणेषु निखेयानां स्तम्भानान् न्यसनीयानां शिलानावँ वा कृते खातेषु अवटेषु प्रत्त्येकमाज्ज्यस्स्य हवने मन्त्रः (पार. ३।४।३)]

३८४. अच्च्युताय भौमायस् स्वाहा (एतदच्च्युताय भौमाय न मम) ॥

[आग्नेयकोणादिषु कोणेषु स्तम्भानामुच्छ्रयणे शिलानां न्यसने वा प्रतिस्तम्भम् प्रतिशिलवँ वा प्रयोज्ज्यो मन्त्रसमुदायः (पार. ३।४।४)]

३८५. इमामुच्छ्रयामि भुवनस्स्य नाभिवँ वसोर्द् धाराम् प्रतरणीवँ वसूनाम् ।
इहैवद् ध्रुवान् निमिनोमि शालाङ् क्क्षेमे तिष्ट्ठतु घृतमुक्क्षमाणा ॥
अश्श्वावती गोमती सूनृतावतत्युच्छ्रयस्स्व महते सौभगाय ।
आत् त्वा शिशुराक्क्रन्दतत्वा गावो धेनवो बाश्श्यमानाः ।
आत् त्वा कुमारस्त् तरुणऽ आ बत्त्सो जगदैः सह ।
आत् त्वा परिस्स्रुतः कुम्भऽ आ दद्धँनः कलशैरुप ।
क्क्षेमस्स्य पत्त्नी बृहती सुवासा रयिन् नो धेहि सुभगे सुवीर्य्यम् ॥
अश्श्वावद्द् गोमदूर्ज्जस्स्वत्त् पर्ण्णवँ वनस्प्पतेरिव ।
अभि नः पूर्य्यता रयिरिदमनुश् श्रेयो बसानः ॥

[अर्धनिष्पन्नां शालाम् प्रविश्श्य अग्न्युपसमाधानादिकङ् कृत्त्वा निष्क्रम्य पुनः प्रवेशायाऽनुज्ज्ञायाः प्रार्थने मन्त्रः (पार. ३।४।५)]

३८६. ब्रह्म्मन्न् प्रविशामि ।

[अनुज्ज्ञादाने मन्त्रः]

३८७. प्रविश ।

[अर्धनिष्पन्नशालाप्रवेशे मन्त्रः (पार. ३।४।६)]

३८८. ऋतम् प्रपद्द्ये शिवम् प्रपद्द्ये ।

[आज्ज्यं संस्कृत्त्य[1] प्रजापतिन् ध्यात्त्वा पूर्वाघारमाघार्योत्तराघारस्स्याघारणे मन्त्रः (द्र. पार. १।५।३,४ काश्रौ. ३।१।१२, ३।२।१ शत. १।४।४।१-१।४।५।४)]

३८९. इन्द्रायस् स्वाहा (एतदिन्द्राय न मम) ॥

[आज्ज्यभागहोमे प्रतिनिगदरूपौ मन्त्रौ (काश्रौ. ३।३।१०, ६।१०।२३,शत.१।६।३।१-२६)]

३९०. अग्ग्नँयेस् स्वाहा (एतदग्नये न मम) ॥

३९१. सोमायस् स्वाहा (एतत् सोमाय न मम) ॥

---

१. पारस्क्करगृह्य्यसूत्रस्स्य "आज्ज्यँ सँस्कृत्त्य" (३।४।७) इत्त्यंशस्स्य व्याक्ख्याने हरिहरेण "अत्त्र प्राप्तमप्प्याज्ज्यसँस्कारमाघारादर्वागिहरतिरिति आज्ज्यस्स्य होमप्राप्त्यर्थम् । आज्ज्यसँस्कारानन्तरम् पर्युक्क्षणान्ते इहरतिरित्यादि इह स्वधृतिः स्वाहेत्त्यन्तेन मन्त्रेणैकाम् । उपसृजनित्त्यादि-सुदीधरत्स्वाहेत्त्यन्तेन मन्त्रेण द्वितीयामाहुतिं हुत्त्वा वास्त्तोष्प्पत इति चतसृभिर् ऋग्भिरपराश् चतस्र आज्ज्याहुतीर्जुहोति । तत आघाराज्ज्यभागौ हुत्वा" इत्त्युक्तम् , पद्धतावपि तेन तदनुरूप एव पदार्थक्रमः प्रदर्शितः; विश्श्वनाथेन तु " आज्ज्यँ सँस्कृत्त्य" इत्त्यस्स्य पूर्णाहुतिवदाज्ज्यं सँस्कृत्त्येत्त्यर्थङ् कृत्त्वा तेनाज्ज्येन इहरतिरित्त्याद्द्याज्ज्याहुत्त्योर् वास्तोष्प्पत इत्त्याद्द्याज्ज्याहुतीनाञ्च होमङ् कृत्त्वा द्वितीयेनाज्ज्येन आघाराज्ज्यभागहोमाः कार्याः इत्त्युक्तम् ; किन्तु एते व्याक्ख्याने अयुक्ते, एतदनुकूले कर्कजयरामव्याख्यानेच,तदनुकूलं हेमाद्द्र्यादिकृतम् पद्धति-

[आघाराज्यभागहोमङ् कृत्त्वा आज्ज्याहुत्त्योर् हवने मन्त्रौ (पार. ३।४।७)]

३९२. इह रतिरिह रमद्ध्वमिह धृतिरिहस् स्वधृतिः स्वाहा ॥ (एतदग्नये न मम) ॥ मासं. ८।५१॥

३९३. उपसृजन् धरुणम् मात्त्रे धरुणो मातरन् धयन् ।
रायस्प्पोषमस्म्मासु दीधरत् त्स्वाहा ॥ (एतदग्नये न मम) ॥ मासं.८।५१ ॥

[अपरासाञ् चतसृणामाज्ज्याहुतीनां हवने मन्त्राः (पार. ३।४।७)]

३९४. बास्त्तोष्प्पतेप् प्रतिजानीह्यस्म्मान् त्स्वावेशोऽ अनमीवो भवा नः ।
यत् त्वेमहेप् प्रति तन् नो जुषस्स्व शन् नो भवद् द्विपदे शञ्
चतुष्प्पदेस् स्वाहा ॥ (एतद् वास्तोष्पतये न मम) ।

३९५. वास्त्तोष्प्पतेप् प्रतरणो नऽ एधि गयस्फ्फानो गोभिरश्श्वेभिरिन्दो ।
अजरासस्त् ते सक्ख्येस् स्याम पितेव पुत्त्रान्न् प्रति तन् नो जुषस्स्व॥
शन् नो भवद् द्विपदे शञ् चतुष्प्पदेस् स्वाहा ॥ (एतद् वास्तोष्पतये न मम) ।

३९६. बास्त्तोष्प्पते शग्ग्मया सँसदा ते सक्क्षीमहि रण्ण्वया गातुमत्त्या ।
पाहिक् क्षेमऽ उत योगे बरन् नो यूयम् पातस् स्वस्त्तिभिः सदा नः
स्वाहा ॥ (एतद् वास्तोष्पतये न मम) ।

३९७. अमीवहा बास्त्तोष्प्पते विश्श्वा रूपाण्ण्याविशन् ।
सखा सुशेवऽ एधि नः स्वाहा ॥ (एतद् वास्तोष्पतये न मम) ।

[स्थालीपाकाहुतिहोमे मन्त्राः (पार. ३।४।८)]

३९८. अग्ग्निमिन्द्रम् बृहस्प्पतिवँ विश्श्वान् देवानुपह्व्वये ।
सरस्स्वतीञ् च वाजीञ् च बास्त्तु मे दत्त बाजिनः स्वाहा ॥
(एतद् अग्नये इन्द्राय वृहस्पतये विश्श्वेव्भ्यो देवेव्भ्यः सरस्स्वत्त्यै बाज्ज्यै च न मम) ।

३९९. सर्प्पदेवजनान् त्सर्व्वान् न्हिमवन्तँ सुदर्शनम् ।
बसूँश्च् च रुद्द्रानादित्त्यानीशानञ् जगदैः सह ।
एतान् त्सर्व्वान्न् प्रपद्द्येऽहवँ वास्त्तु मे दत्त बाजिनः स्वाहा ॥ (एतत् सर्पदेवजनेव्भ्यो हिमवते सुदर्शनाय बसुव्भ्यो रुद्द्रेव्भ्य आदित्त्येव्भ्य ईशानाय जगदेव्भ्यश् च न मम) ।

प्रदर्शनञ्चाऽपि अयुक्तमेव, पारस्क्करगृह्ययसूत्त्रे त्रिषु एव स्थलेषु "आज्ज्यँ सँस्कृत्त्य" इत्त्यंशः आघाराज्ज्यभागादीनाम् आज्ज्याहुतीनामवसरं प्रदर्शयितुं प्रयुक्तोऽस्तीति व्याख्यानमेव युक्तम् मन्तव्यम् , प्रधानाहुतिहोमात् पूर्वमेवाघारहोमस्य सार्वत्रिकत्त्वाद् आघारहोमे जाते एव आज्ज्य-संस्कारस्स्य सिद्धेः आज्ज्यस्स्य प्रधानहोमयोग्ग्यत्त्वात् । एवञ्च अत्त्रावसरे आज्ज्यं सँस्कृत्त्याघारा-ज्ज्यभागादय आज्ज्याहुतयो होतव्व्या इत्त्येव सूत्त्रकारस्स्याऽभिप्प्रायो न तु आघाराज्ज्यभागहोमात् प्रागेव इहरतिरित्त्याद्द्याज्ज्यहोमाः कार्या इत्त्यभिप्प्राय इति सुधीभिर्विवेक्तव्व्यम् , न तु कर्क-तर्कपरवशतया कर्मवैरूप्प्यङ् कर्तव्व्यम् । कौषीतकिगृह्यसूत्त्राऽथर्वपरिशिष्टादिषु च शालाकर्मणि आघाराज्ज्यभागपूर्वका एव आज्ज्यहोमा विहिता इति च स्मर्तव्व्यम् ।

४००. पूर्व्वाह्ण्णञ् चाऽपराह्ण्णञ् चोभौ मद्ध्यन्दिना सह ।
प्रदोषमर्द्धरातत्रञ् चव् व्युष्ट्टान् देवीम् महापथाम् ।
एतान् त्सर्व्वान्न् प्रपद्द्येऽहवँ वास्त्तु मे दत्त बाजिनः स्वाहा ॥ (एतत् पूर्वाह्ण्णाय अपराह्ण्णाय मद्ध्यन्दिनाय प्रदोषाय अर्द्धरातत्राय व्युष्ट्यै देव्व्यै महापथायै च न मम) ।

४०१. कर्त्तारञ् च बिकर्त्तारवँ विश्श्वकर्म्माणमोषधीँश्च् च बनस्प्पतीन्।
एतान् त्सर्व्वान्न् प्रपद्द्येऽहवँ वास्त्तु मे दत्त बाजिनः स्वाहा ॥ (एतत् कर्त्रे विकर्त्रे विश्श्वकर्मणे, ओषधिव्भ्यो वनस्पतिव्भ्यश् च न मम) ।

४०२. धातारञ् च विधातारन् निधीनाञ् च पतिँ सह ।
एतान् त्सर्व्वान्न् प्रपद्द्येऽहवँ वास्त्तु मे दत्त बाजिनः स्वाहा ॥
(एतद् धात्त्रे विधात्त्रे निधीनाम् पतये च न मम) ।

४०३. स्योनँ शिवमिदवँ वास्त्तु दत्तम् ब्रह्म्मप्प्रजापती ।
सर्व्वाश्च् च देवताः स्वाहा ॥
(एतद् ब्रह्म्मणे प्रजापतये सर्वाव्भ्यो देवताव्भ्यश् च न मम) ।

[स्विष्टकृते स्थालीपाकस्स्य होमे मन्त्रः (द्र.- पार. १।१२।३, १।५।५)]

४०४. अग्ग्ँनयेस् स्विष्ट्टकृतेस् स्वाहा (एतदग्गँनयेस् स्विष्ट्टकृते न मम) ।

[महाव्याहृतिभिराज्ज्याहुतीनां होमे मन्त्राः (द्र. पार. १।५।३)]

४०५. भूःस्वाहा (एतदग्नये न मम) । ४०६. भुवः स्वाहा (एतद् वायवे न मम) ।
४०७. स्वः स्वाहा (एतत् सूर्याय न मम) ।

[सर्वप्रायश्चित्तहोममन्त्राः (द्र.- पार. १।५।३; काश्रौ. २५।१।११)]

४०८. त्वन्नोऽ अग्ग्ँने बरुणस्स्य बिद्द्वान् देवस्स्य हेडोऽ अवं यासिसीष्ट्ठाः ।
यजिष्ट्ठो बह्नितमः शोशुचानो बिश्श्वाद् द्वेषाँसिप् प्रमुमुग्ग्ध्यस्म्मत् स्वाहा ॥
(एतदग्निवरुणाव्भ्यान् न मम) ॥ मासं. २१।३ ॥

४०९. सत् त्वन् नोऽअग्ग्ँनेऽवमो भवोती नेदिष्ट्ठोऽअस्स्याऽउषसोव् व्युष्ट्टौ ।
अव यक्क्ष्व नो बरुणँ रराणो बीहि मृडीकँ सुहवो नऽएधि स्वाहा ॥
(एतदग्निवरुणाव्भ्यान् न मम) ॥ मासं. २१।४ ॥

४१०. अयाश्च् चाग्ग्ँनेऽस्स्यनभिशस्त्तिपाश्च् च सत्त्यमित् त्वमयाऽ असि ।
अया नो यज्ज्ँञवँ वहास्स्यया नो धेहि भेषजँ स्वाहा ॥
(एतदग्नये न मम) ॥ काश्रौ. २५।१।११ ॥

४११. ये ते शतवँ वरुण ये सहस्स्रयँ यज्ज्ँञियाः पाशा बितता महान्तः ।
तेभिर्न् नोऽअद्य सवितोत बिष्ण्णुर्व् बिश्श्वे मुञ्चन्तु मरुतः स्वर्क्काः स्वाहा ॥
(एतद् वरुणाय सवित्त्रे विष्णवे विश्श्वेव्भ्यो देवेव्भ्यो मरुद्भ्यः स्वर्केव्भ्यो न मम)
काश्रौ. २५।१।११ ॥

४१२. उदुत्तमवँ वरुण पाशमस्म्मदवाधमवँ वि मद्ध्यमँ श्रथाय ।
अथा बयमादित्त्यव् ब्रते तवाऽनागसोऽ अदितयेस् स्याम स्वाहा ॥
(एतद् वरुणाय न मम) ॥ मासं. १२।१२ ॥

[प्राजापत्य होमे मन्त्रः (पार. १।५।३, १।९।३,४; १।११।३, १।१२।३)]

४१३. प्रजापतयेस् स्वाहा (एतत् प्रजापतये न मम) ।

[शालापूर्वसन्ध्यभिमर्शने मन्त्रः (पार. ३।४।१०)]

४१४. श्रीश्च् चत् त्वा यशश्च् च पूर्ब्वे सन्धौ गोपायेताम् ।

[शालादक्षिणसन्ध्यभिमर्शने मन्त्रः (पार. ३।४।११)]

४१५. यज्ञँश्च् चत् त्वा दक्क्षिणा च दक्क्षिणे सन्धौ गोपायेताम् ।

[शालापश्चिमसन्ध्यभिमर्शने मन्त्रः (पार. ३।४।१२)]

४१६. अन्नञ् चत् त्वाब् ब्राह्म्मणाश्च् च पश्च्चिमे सन्धौ गोपायेताम् ।

[शालोत्तरसन्ध्यभिमर्शने मन्त्रः (पार. ३।४।१३)]

४१७. ऊर्क्क् चत् त्वा सूनृता चोत्तरे सन्धौ गोपायेताम् ।

[दिशामुपस्थानेषु प्राच्च्या उपस्स्थाने मन्त्रः(पार. ३।४।१४)]

४१८. केता च मा सुकेता च पुरस्त्ताद्द् गोपायेतामित्त्यग्ग्निर्ब् वै केताऽऽ-दित्त्यः सुकेता तौप् प्रपद्द्ये ताव्भ्यान् नमोऽस्त्तु तौ मा पुरस्त्ताद्द् गोपायेताम् ॥

[दक्क्षिणस्स्या दिश उपस्स्थाने मन्त्रः (पार. ३।४।१५)]

४१९. गोपायमानञ् च मा रक्क्षमाणा च दक्क्षिणतो गोपायेतामित्त्यहर्ब् बै गोपायमान६ँ रात्त्री रक्क्षमाणा तेप् प्रपद्द्ये ताव्भ्यान् नमोऽस्त्तु ते मा दक्क्षिणतो गोपायेताम् ॥

[पश्चिमाया दिश उपस्स्थाने मन्त्रः (पार. ३।४।१६)]

४२०. दीदिविश्च् च मा जागृविश्च् च पश्च्चाद्द् गोपायेतामित्त्यन्नवँ वै दीदिविःप् प्राणो जागृविस्त् तौप् प्रपद्द्ये ताव्भ्यान् नमोऽस्त्तु तौ मा पश्च्चाद्द् गोपायेताम् ॥

[उत्तरस्स्या दिश उपस्स्थाने मन्त्रः (पार. ३।४।१७)]

४२१. अस्स्वप्प्नँश्च् च माऽनवद्द्राणश् चोत्तरतो गोपायेतामिति चन्द्रमा वाऽ अस्स्वप्प्नँो बायुरनवद्द्राणस्त् तौप् प्रपद्द्ये ताव्भ्यान् नमोऽस्त्तु तौ मोत्तरतो गोपायेताम् ॥

[निष्ठितायाः शालायाः प्रवेशने मन्त्रः (पार. ३।४।१८)]

४२२. धर्म्मस्त्थूणाराज६ँ श्रीस्त्तूपमहोरात्त्रेद् द्वारफलके ।
इन्द्रस्स्य गृहा बसुमन्तो बरूथिनस्त्
तानहम् प्रपद्द्ये सहप् प्रजया पशुभिः सह ॥
यन्न् मे किञ्चिदस्त्त्युपहूतः सर्ब्बगणसखायसाधुसवँवृतः।
तान् त्वा शालेऽरिष्ट्टवीरा गृहान् नः सन्तु सर्ब्बतः ॥

(मणिकावधानमन्त्राः[1] [पार. ३।५।१-५])

[अब्भ्यादाने मन्त्रः (काश्रौ. ६।२।८)]

४२३. देवस्स्यत् त्वा सवितुःप्प्रसवेऽश्शिवनोर्व्वाहुब्भ्याम् पूष्ण्णो
हस्त्ताब्भ्याम्। आर्ददे नार्य्यसि ॥ मासं. ५।२२ ॥

[मणिकावटपरिलेखने मन्त्रः (काश्रौ. ६।२।८)]

४२४. इदमह६ रक्क्षसाङ् ग्रीवाऽ अपि कृन्तामि ॥ मासं. ५।२२ ॥

[मणिकमाने मन्त्रः (पार. ३।५।२)]

४२५. समुद्द्रोऽसि नभस्स्वानार्द्द्रदानुः शम्भूः ॥ मासं. १८।४५ ॥

[मणिकेऽपामासेचने मन्त्राः (पार. ३।५।३,४)]

४२६. आपो रेवतीःक् क्षयथा हि वस्स्वःक् क्रतुञ् च भद्द्रम् बिभृथाऽमृतञ् च।
रायश्च् चसत् थस् स्वपत्त्यसस्य पत्त्नी
सरस्स्वती तद्द् गृणते बयो धात् ॥ पार. ३।५।३ ॥

४२७. आपो हिष्ट् ठा मयोभुवस्त् ता नऽ ऊर्ज्जे दधातन।
महे रणाय चक्क्षसे ॥ मासं. ११।५० ॥

४२८. यो वः शिवतमो रसस्त् तस्स्य भाजयतेह नः।
उशतीरिव मातरः ॥ मासं. ११।५१ ॥

४२९. तस्म्माऽ अरङ् गमाम वो यस्स्यक् क्षयाय जिन्न्वथ।
आपो जनयथा च नः ॥ मासं. ११।५२ ॥

(लाङ्गलयोजनमन्त्राः [पार. २।१३।२-४])

[वलिहरणमन्त्राः (पार. २।१३।२)]

४३०. इन्द्राय नमः (एतदिन्द्राय न मम)।
४३१. पर्ज्जन्न्याय नमः (एतत् परजन्न्याय न मम)।
४३२. अश्श्विवब्भ्यान् नमः (एतदश्श्विवब्भ्यान् न मम)।
४३३. मरुद्द्भ्यो नमः (एतन् मरुद्भ्यो न मम)।
४३४. उदलाकाश्श्यपाय नमः (एतदुदलाकाश्श्यपाय न मम)।
४३५. स्वातिकार्य्यै नमः (एतत् स्वातिकार्यै न मम)।
४३६. सीतायै नमः (एतत् सीतायै न मम)।
४३७. अनुमत्त्यै नमः (एतदनुमत्त्यै न मम)।

[हलेऽनडुद्योजने[2] मन्त्रः (पार. २।१३।३, मासं. १२।६७)]

४३८. सीरा युञ्जन्ति कवयो युगा वितन्न्वते पृथक्। धीरा देवेषु सुम्म्नया ॥

---

१. केचन मणिकावधानमावसत्थ्याग्निसम्बद्धवे वर्तते इति मन्यन्ते, सूत्रात् तु तादृशो नियमो नाऽवगम्म्यते। अनुकल्पकाग्निना युक्तस्स्यापि पूर्णानामेव पञ्चमहायज्ञानाम् पृष्ठोदिविसूत्रे (प्रसवसूत्रे) विहितत्त्वात् तस्स्याऽपि मणिकवत्त्वम् प्रतीयते। अनुकल्पकाग्निनाऽपि रहितेन लौकिकेऽग्नौ वैश्श्वदेवकर्मणः करणे मणिकसमीपे हरणीयानाम् पर्जन्न्यादिवलीनाम् लोपस्स्य यज्ञपार्श्वे विहितत्त्वात् तस्स्य मणिकाभाव इव प्प्रतीयते।

२. अनडुद्योजनादिकन् तूष्णीमेव न मन्त्रेणेति पक्षोऽपि पारस्क्करेणोक्तोऽस्ति।

[कर्षणे फालालम्भने वा मन्त्रः (पार. २।१३।४, मासं. १२।६९)]

४३९. शुनꣳ सु फाला विकृषन्तु भूमिꣳ शुनङ् कीनाशाऽ अभि यन्तु वाहैः।
शुनासीरा हविषा तोशमाना सुपिप्पलाऽ ओषधीः कर्त्तनाऽस्मे ॥

(नवप्राशनमन्त्राः [पार. ३।१।१-७])

[आघाराज्यभागहोमानन्तरम् आज्याहुत्योर् हवने मन्त्रौ]

४४०. शतायुधाय शतवीर्य्याय शतोतयेऽ अभिमातिषाहे ।
शतयँ यो नः शरदोऽजीजानिन्द्रो नेषदति दुरितानि विश्श्वास् स्वाहा ॥
(एतदिन्द्राय न मम) ॥ पार. ३।१।२ ॥

४४१. ये चत्त्वारः पथयो देवयानाऽ अन्तराद् द्यावापृथिवी वियन्ति ।
तेषायँ योऽज्ज्यानिमजीजिमावहात् तस्म्मै नो देवाः परिधत्तेह
सर्व्वेस् स्वाहा ॥ (एतत् सर्वेब्भ्यो देवेब्भ्यो न मम) ॥ पार. ३।१।२ ॥

[नवस्थालीपाकस्याऽऽग्ग्रयणदेवताब्भ्यो होमे मन्त्राः (पार. ३।१।३, द्र. काश्रौ. ४।६।१,३,५)]

४४२. इन्द्राग्ग्ँनिब्भ्यां स्वाहा (एतदिन्द्राग्निब्भ्यान् न मम) ।

४४३. विश्श्वेब्भ्यो देवेब्भ्यः स्वाहा (एतद् विश्श्वेब्भ्यो देवेब्भ्यो न मम) ।

४४४. द्यावापृथिवीब्भ्यां स्वाहा (एतद् द्यावापृथिवीब्भ्यान् न मम) ।

[स्विष्टकृते नवस्थालीपाकस्य होमात् पूर्वम् पश्चाच् चाऽऽज्ज्याहुतेर् होमे मन्त्रः (पार. ३।१।३)]

४४५. स्विष्ट्टमग्ग्ँनेऽ अभि तत् पृणीहि विश्श्वाँश्च् च देवः पृतनाऽ अविष्ष्यत् ।
सुगन् न पन्थाम् प्रदिशन् नऽएहिज् ज्योतिष्म्मदद्ध्येह्य्यजरन् नऽआयुः स्वाहा ॥
(एतदग्नये स्विष्टकृते न मम) ।

[स्विष्टकृते नवस्थालीपाकस्य होमे मन्त्रः (पार. १।१२।३ ; १।५।३)]

४४६. अग्ग्ँनयेस् स्विष्ट्टकृतेस् स्वाहा (एतदग्नये स्विष्टकृते न मम) ।

[नवप्राशनकर्मणि व्रीह्यन्नप्राशने संस्रवप्राशनमन्त्रः (पार. ३।१।४)]

४४७. अग्ग्ँनिःप् प्रथमःप् प्राशन्नातु स हि वेद यथा हविः ।
शिवाऽ अस्म्मब्भ्यमोषधीः कृणोतु विश्श्वचर्षणिः ।
भद्द्रान् नः श्रेयः समनैष्ट्ट देवास्त् त्वयावशेन समशीमहित् त्वा ।
स नो मयोभूः पितोऽ आ विशस्स्व शन् तोकाय तनुवेस् स्योनः ॥

[नवप्राशनकर्मणि व्रीह्यन्नप्राशने संस्रवप्राशने वैकल्पिको मन्त्रः (पार. ३।१।५, मासं. ११।८३)]

४४८. अन्नपतेऽन्नस्स्य नो देह्य्यनमीवस्स्य शुष्म्मिणः ।
प्रप् प्र दातारन् तारिषऽ ऊर्ज्जन् नो धेहिद् द्विपदे चतुष्प्पदे ॥

[नवप्राशनकर्मणि यवान्नप्राशने संस्रवप्राशनमन्त्रः (पार. ३।१।६)]

४४९. एतमुत् त्यम् मधुना सयँयुतयँ यवꣳ सरस्स्वत्त्याऽ अधिवनाय चकृषुः ।
इन्द्रऽ आसीत् त्सीरपतिः शतक्क्रतुः कीनाशाऽ आसन्न् मरुतः सुदानवः ॥

इत्यचिन्त्यापरिमितमायाशक्तिकपरमात्मलीलामयेच्छासृष्टानन्तकोटिब्रह्म्माण्डैकतमब्रह्म्माण्डोदरवर्तिचतुर्दशभुवनाभोगमद्ध्यस्स्थभूर्लोककुक्षिगतजम्बूद्वीपघटकभारतवर्षस्थकुमारिकाखण्डोत्तरभागस्थितहिमवत्खण्डस्स्थनेपालदेशमद्ध्यवर्तिगण्डकीप्रदेशान्तर्गतत्रितुङ्गाचलाङ्कितजनपदान्तःपातिताम्म्रकूटग्रामाभिजनेन काष्ठमण्डपनगरान्तर्गतराजमातृपत्तनटोल्लकान्तर्वर्ति-

सरस्स्वतीमार्गस्स्थस्वाद्ध्यायशालावास्तव्व्येन गुरुमुखोच्चारणानूच्चारणरूपाद्ध्ययनगृहीत-स्वशाखामन्त्रब्राह्म्मणकल्पसूत्त्रेण श्रुतिस्मृतिपुराणादिपारायणपरायणेन नैपालीयभाषाऽऽ-दिकविभानुभक्ताचार्यप्रविक्ख्यापिते कान्न्यकुब्जोच्चकुलीनविद्द्याधुरीणब्राह्म्मण-श्रीकृष्णाचार्यवंशे जातेन सूर्योपाद्ध्यायात् पन्चदशेन नारनाथिना गाङ्गेयेन वासिष्ठ-मैत्त्रावरुण-कौण्डिन्न्येति-त्त्रिप्प्रवरेण कौण्डिन्न्यायनेनाऽऽचार्येण शिवराजशर्मणा द्विजोत्तमेन सङ्गृहीते माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेद-शाखाद्ध्यायिनिरग्निकद्विजसदाचारकर्म-संस्कारकर्म-श्राद्धकर्मादि-वैदिकमन्त्रसङ्ग्रहे प्रथमं सदाचारकाण्डं सम्पूर्णम् ॥१॥

अथ सँस्कारकाण्डम्

(ऋतौ प्रवेशने निषेके कृते जायाया दक्क्षिणांसमधि दक्क्षिणहस्तन् नीत्त्वा हृदयस्स्याऽऽलम्भने मन्त्रः [पार. १।११।९])

४५०. यत् ते सुसीमे हृदयन् दिवि चन्द्रमसिश् श्रितम् ।
वेदाहन् तन्न् मान् तद् द्विद्द्यात्त् पश्श्येम शरदः शतञ्
जीवेम शरदः शतꣳ शृणुयाम शरदः शतम् ॥

(गर्भस्थापनाय श्वेतपुष्प्याः सिंह्या मूलम् पिष्ट्वा यथाविधि जायाया दक्क्षिणस्स्यान् नासिकायामासेचने मन्त्रः [पार. १।१३।१])

४५१. इयमोषधीत् त्रायमाणा सहमाना सरस्स्वती ।
अस्स्याऽ अहम् बृहत्त्याः पुत्त्रः पितुरिव नाम जग्ग्रभम् ॥

(पुंसवनसंस्कारमन्त्राः [पार. १।१४।३-५])

[न्यग्ग्रोधावरोहशुङ्गरसस्स्य जायाया दक्क्षिणस्स्यान् नासिकायामासेचने मन्त्रौ (पार. १।१४।३)]

४५२. हिरण्ण्यगर्ब्भः समवर्त्ततताग्ग्रे भूतस्स्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीन् द्यामुतेमाङ् कस्म्मै देवाय हविषा विधेम ॥ मासं. १३।४॥

४५३. अद्द्भ्यः सम्भृतः पृथिव्व्यै रसाच्च विश्श्वकर्म्मणः समवर्त्तताऽग्ग्रे ।
तस्स्यत् त्वष्ट्टा विदधद् रूपमेति तन्न् मर्त्त्यस्स्य देवत्त्वमाजानमग्ग्रे ॥ ३१।१७॥

[गर्भस्स्याभिमन्त्रणे मन्त्रः (पार. १।१४।५)]

४५४. सुपर्ण्णोऽसि गरुत्त्माँस्त् त्रिवृत् ते शिरो गायत्त्रञ् चक्क्षुर् बृहद्-द्रथन्तरे पक्क्षौ । स्तोमऽ आत्त्माच् छन्दाꣳस्यङ्गानि यजूꣳषि नाम ।
साम ते तनूर्व् वामदेव्व्यय्ँ यज्ञायज्ञियम् पुच्छन् धिष्ण्ण्याः शफाः । सुपर्ण्णोसि गरुत्त्मान् दिवङ् गच्छस् स्वः पत ॥मासं.१२।४॥

(सीमन्तोन्नयनसंस्कारमन्त्राः [पार. १।१५।४-९])

[आजज्यभागहवनानन्तरम् प्रजापतये तिलमुद्गमिश्रस्थालीपाकस्स्य होमे मन्त्रः (पार. १।१५।४)]

४५५. प्रजापतयेस् स्वाहा (एतत् प्रजापतये न मम) ।

[संस्रवप्राशनान्ते सीमन्तस्स्योर्ध्ववं विनयने मन्त्रः (पार. १।१५।४)]

४५६. भूर्व् भुवः स्वः (विनयामि) ।

[गर्भिण्ण्यास् त्रिवृति(वेण्यां) सटालुग्रप्सादिबन्धने मन्त्रः (पार. १।१५।६)]

४५७. अयमूर्ज्जावतो बृक्क्षऽ ऊर्ज्जीव फलिनी भव ।

[वीणागाथिनोर् गाने प्रेषणे मन्त्रः (पार. १।१५।७)]

४५८. वीणागाथिनौ सोमं राजानं सङ्गायेताम् ।

[वीणागाथिनोर् गेया सोमसङ्गाथा (पार. १।१५।९)]

४५९. सोमऽ एव नो राजेमा मानुषीःप् प्रजाः ।
अविमुक्क्तचक्क्रऽ आसीरँस्त् तीरे तुब्भ्यम्(गण्डकि) ॥

(सोष्यन्तीकर्ममन्त्रः)

[सोष्यन्त्या अद्भिरब्भ्युक्षणे मन्त्रः (पार. १।१६।१)]

४६०. एजतु दशमास्स्यो गरब्भो जरायुणा सह ।
यथाऽयवँ वायुरेजति यथा समुद्द्रऽ एजति ।
एवाऽयन् दशमास्स्योऽ अस्स्रंज् जरायुणा सह ॥ मासं. ८।२८॥

(अवरावपातने मन्त्रः)

[सूताया अवराया अवपातने मन्त्रः (पार. १।१६।२)]

४६१. अवैतु पृश्न्नि शेवलँ शुने जरायुब्बत्तवे ।
नैव माँसेन पीवरीन्[1] न कस्म्मिँश्च् चनायतनमव जरायु पद्द्यताम् ॥

(जातकर्मसंस्कारमन्त्राः)

[जातके जातेऽच्छिन्नायामेव नाड्ड्याङ् कर्तव्ये मेधाजनने मधुघृतप्राशने मन्त्राः (पार. १।१६।४)]

४६२. भूस्त् त्वयि दधामि[2] । ४६३. भुवस्त् त्वयि दधामि ।
४६४. स्वस्त् त्वयि दधामि । ४६५. भूरब् भुवः स्वः सरब्बन् त्वयि दधामि ।

[जातकस्स्याऽच्छिन्नायामेव नाड्ड्याङ् कर्तव्ये आयुष्यकरणे नाब्भ्यान् दक्षिणकर्णे वा त्रिर् जपनीयौ मन्त्रौ (पार. १।१६।६)]

४६६. अग्ग्निरायुष्म्मान् त्स बनस्प्पतिभिरायुष्म्माँस्त् तेनत् त्वाऽऽयुषा-
ऽऽयुष्म्मन्तङ् करोमि । सोमऽ आयुष्म्मान् त्सऽ ओषधीभिरायुष्म्माँस्त्
तेनत् त्वाऽऽयुषाऽऽयुष्म्मन्तङ् करोमि । ब्रह्म्माऽऽयुष्म्मत् तद्
ब्राह्म्मणैरायुष्म्मत् तेनत् त्वाऽऽयुषाऽऽयुष्म्मन्तङ् करोमि ।
देवाऽ आयुष्म्मन्तस्त् तेऽमृतेनायुष्म्मन्तस्त् तेनत् त्वाऽऽयुषा-
ऽऽयुष्म्मन्तङ् करोमि । ऋषयऽ आयुष्म्मन्तस्त् तेब् ब्रतै-
रायुष्म्मन्तस्त् तेनत् त्वाऽऽयुषाऽऽयुष्म्मन्तङ् करोमि । पितरऽ
आयुष्म्मन्तस्त् तेस् स्वधाभिरायुष्म्मन्तस्त् तेनत् त्वाऽऽयुषा-
ऽऽयुष्म्मन्तङ् करोमि । यज्ञ्ञऽ आयुष्म्मान् त्स दक्क्षिणाभि-
रायुष्म्माँस्त् तेनत् त्वाऽऽयुषाऽऽयुष्म्मनतङ् करोमि । समुद्द्रऽ

---

१. पीवरि इत् इतिच्छेदः स्वीकर्तुं शक्क्यः । पीवरि इत्येतावदेव शत्रुघ्नमिश्रादिपाठः ।
२. अत्र प्रतिवाक्क्यम् पृथङ् मन्त्र इति वासुदेव-विश्वनाथ-शत्रुघ्नमिश्रादयः, चतुर्णावँ वाक्क्याना-मेक एव मन्त्र इति कर्कोपाद्ध्याय-जयराम-हरिहर-गदाधराः ।

आयुष्म्मान् त्सस् स्रवन्तीभिरायुष्म्माँस्त् तेनत् त्वाऽऽयुषा-
ऽऽयुष्म्मन्तङ् करोमि ॥
४६७. त्र्यायुषञ् जमदग्ग्नेः कश्श्यपस्स्यत् त्र्यायुषम् ।
यद् देवेषुत् त्र्यायुषन् तन् नोऽ अस्ततुत् त्र्यायुषम् ॥ मासं. ३।६२ ॥
[जातकः सर्वमायुरियादिति कामनाविशेषे सति नाड्ड्याञ् छिन्नायाङ् कर्तव्ये वात्सप्प्राभिमर्शनाक्ख्ये जातकाभिमर्शने प्रयोज्ज्या मन्त्राः (पार. १।१६।८,९; मासं. १२। १८-२८)]
४६८. दिवस्प् परिप् प्रथमञ् जज्ज्ञेऽ अग्ग्निरस्म्मद् द्वितीयम् परि जातवेदाः ।
तृतीयमप्प्सु नृमणाऽ अजस्स्रमिन्धानऽ एनञ् जरतेस् स्वाधीः ॥
४६९. बिद्द्मा तेऽ अग्ग्नेत् त्रेधात् त्रयाणि बिद्द्मा ते धाम बिभृता पुरुत्त्रा ।
बिद्द्मा ते नाम परमङ् गुहा यद् द्विद्द्मा तमुत्त्सयँ यतऽ आजगन्थ ॥
४७०. समुद्द्रेत् त्वा नृमणाऽ अप्प्स्वन्तर् नृचक्क्षाऽ ईधे दिवो अग्ग्नऽ ऊधन् ।
तृतीयेत् त्वा रजसि तस्तथिवाँ समपामुपस्तथे महिषाऽ अवर्द्धन् ॥
४७१. अक्क्रन्ददग्ग्निस्त् तनयन्निवद् द्यौः क्क्षामारेरिहद् द्वीरुधः समञ्जन् ।
सद्द्यो जज्ज्ञानो बिहीमिद्धोऽ अक्ख्यदा रोदसी भानुना भात्त्यन्तः ॥
४७२. श्रीणामुदारो धरुणो रयीणाम् मनीषाणाम् प्रार्प्पणः सोमगोपाः ।
बसुः सूनुः सहसोऽ अप्प्सु राजा बिभात्त्यग्ग्रऽ उषसामिधानः ॥
४७३. बिश्श्वस्स्य केतुर्व् भुवनस्स्य गर्ब्भऽ आ रोदसीऽ अपृणाज् जायमानः ।
बीडुञ् चिदद्द्रिमभिनत्त् परायञ् जना यदग्ग्निमयजन्त् पञ्च ॥
४७४. उशिक्क् पावकोऽ अरतिः सुमेधा मर्त्त्येष्ष्वग्ग्निरमृतो निधायि ।
इयर्त्ति धूममरुषम् भरिब्भ्रदुच्छुक्क्रेण शोचिषाद् द्यामिनक्क्षन् ॥
४७५. दृशानो रुक्क्मऽ उर्व्व्याब् ब्यद्द्यौद् दुर्म्मर्षमायुः श्रिये रुचानः ।
अग्ग्निरमृतोऽ अभवद् द्वयोभिर्ष् यदेनन् द्यौरजनयत् त्सुरेताः ॥
४७६. यस्त् तेऽ अद्द्य कृणवद्द् भद्द्रशोचेऽपूपन् देव घृतवन्तमग्ग्ने ।
प्र तन् नयप् प्रतरव्ँ वस्स्योऽअच्छाभि सुम्म्नन् देवभक्क्तयँ यविष्ट्ठ ॥
४७७. आ तम् भज सौश्श्रवसेष्ष्वग्ग्नऽ उक्क्थऽउक्क्थऽ आभज शस्स्यमाने ।
प्रियः सूर्य्ये प्प्रियोऽ अग्ग्ना भवात्त्युज् जातेन भिनदद्दुज् जनित्त्वैः ॥
४७८. त्वामग्ग्ने यजमानाऽ अनुद्द्यून् न्विश्श्वा बसु दधिरे बार्य्याणि ।
त्वया सहद् द्रविणमिच्छमानाब् ब्रजङ् गोमन्तमुशिजो बिवब्रुः ॥
[प्रतिदिशम् ब्राह्म्मणानवस्स्थाप्प्य अनुप्प्राणनङ् कर्तुं तेषामद्ध्येषणे मन्त्रः (पार. १।१६।१०)]
४७९. भो ब्राह्म्मणाः इममनुप्प्राणित ।
[अनुप्राणने पूर्वदक्षिणापरोत्तरपञ्चमब्राह्म्मणैः क्रमेण प्रयोज्ज्या मन्त्राः (पार. १।१६।११-१५)]
४८०. प्राण । ४८१. व्यान । ४८२. अपान । ४८३. उदान । ४८४. समान ।
[जातकजन्मदेशाभिमन्त्रणे मन्त्रः (पार. १।१६।१७)]
४८५. बेद ते भूमि हृदयन् दिवि चन्द्रमसिश् श्रितम् ।
बेदाऽहन् तन्न् मान् तद् द्विद्द्यात्त्
पश्श्येम शरदः शतञ् जीवेम शरदः शतँ शृणुयाम शरदः शतम् ॥

[जातकस्स्य पुत्त्रस्स्याऽभिमर्शने मन्त्रः (पार. १।१६।१८, शत. १४।९।४।२६)]

४८६. अश्म्मा भव परशुर्ब् भव हिरण्ण्यमश्श्रुतम् भव ।
आत्त्मा वै पुत्त्रनामासि स जीव शरदः शतम् ॥

[सूतिकायाः पुत्त्रमातुरभिमन्त्रणे मन्त्रः (पार. १।१६।१९, शत. १४।९।४।२७)]

४८७. इडासि मैत्त्रावरुणी बीरे बीरमजीजनथाः ।
सात् त्ववँ वीरवती भव याऽस्म्मान् न्वीरवतोऽकरत् ॥

[सूतिकाया दक्क्षिणं स्तनम् प्रक्षाल्ल्य जातकाय तस्स्य प्रदाने मन्त्रः (पार. १।१६।२०)]

४८८. इमꣳ स्तनमूर्ज्जस्स्वन्तन् धयाऽपाम् प्रपीनमग्ग्ने सरिरस्स्य मद्ध्ये।
उत्त्सꣳ जुषस्स्व मधुमन्तमर्ब्बन् त्समुद्द्रियꣳ सदनमाविशस्स्व ॥१७।८७॥

[सूतिकायास् सव्व्यं स्तनम् प्रक्षाल्ल्य जातकाय तस्स्य दाने
मन्त्रौ (पार. १।१६।२१, शत. १४।९।४।२८, मासं. ३८।५, १७।८७)]

४८९. यस्त् तेस्त् तनः शशयो यो मयोभूर्य् यो रत्त्नधा बसुविद् यः सुदत्त्रः ।
येन् बिश्श्वा पुष्प्यसि बार्य्याणि सरस्स्वति तमिह धातवेऽकः ॥
इमꣳ स्तनमूर्ज्जस्स्वन्तन् धयाऽपाम् प्रपीनमग्ग्ने सरिरस्स्य मद्ध्ये।
उत्त्सꣳ जुषस्स्व मधुमन्तमर्ब्बन् त्समुद्द्रियꣳ सदनमाविशस्स्व ॥१७।८७॥

[सूतिकाशयनस्स्य शिरोभागे उदपात्त्रस्स्य निधाने मन्त्रः (पार. १।१६।२२)]

४९०. आपो देवेषु जाग्ग्रथ यथा देवेषु जाग्ग्रथ ।
एवमस्स्याꣳ सूतिकायाꣳ सपुत्त्रिकायाञ् जाग्ग्रथ ॥

[सूतिकाकोष्ठद्वारे उपसमाहितेऽग्नौ ओत्थानात् सन्धिवेलयोः फलीकरणमिश्श्राणां
सर्षपाणामावपनयोर् मन्त्रौ (पार. १।१६।२३)]

४९१. शण्डा मर्क्काऽ उपवीरः शौण्डिकेयऽ उलूखलः ।
मलिम्म्लुचोद् द्रोणासश्च् च्यवनो नश्श्यतादितः स्वाहा ॥

४९२. आलिखन् ननिमिषः किवँवदन्तऽ उपशश्रुतिः ।
हर्य्यक्क्षः कुम्भीशत्त्रुः पात्त्रपाणिर् नृमणिः ।
हन्त्रीमुखः सर्षपारुणश्च् च्यवनो नश्श्यतादितः स्वाहा ।

(यदा जातकङ् कुमारग्ग्रह उपदद्रवेत् तदा जातकमङ्के आधाय जालेनोत्तरीयेण वा आच्छाद्य
जातकस्स्य पित्त्रा जपनीया मन्त्राः [पार. १।१६।२४])

४९३. कूर्क्कुरः सुकूर्क्कुरः कूर्क्कुरो बालबन्धनः ।
चेच्चेच् छुनक सृज नमस्त् तेऽ अस्त्तु सीसरो लपेताऽपह्व्वर ॥
तत् त्सत्त्ययँ यत् ते देवा बरमददुः सत् त्वङ् कुमारमेव बावृणीथाः ।
चेच्चेच् छुनक सृज नमस्त्तेऽ अस्त्तु सीसरो लपेताऽपह्व्वर ॥
तत् त्सत्त्ययँ यत् ते सरमा माता सीसरः पिता श्यामशबलौब् भ्रातरौ ।
चेच्चेच् छुनक सृज नमस्त् तेऽ अस्त्तु सीसरो लपेताऽपह्व्वर ॥

(कुमारग्ग्रहोपदद्रुतस्स्य जातकस्स्याऽभिमर्शने मन्त्रः [पार. १।१६।२५])

४९४. न नामयति न रुदति न हृष्ष्यति नग् ग्लायति ।
यत्र बयवँ वदामो यत्र चाऽभिमृशामसि ॥

(नामकरणसंस्कारमन्त्राः)

[ब्राह्म्मणान् भोजयित्त्वा चोक्क्षे सर्व्वृतेऽवकाशे उदगग्ग्रेषु कुशेषु प्राङ्मुखतया उपस्थङ् कृत्वा उपविष्टाय जातकपित्त्रे दक्क्षिणतो गत्त्वा जातकमात्त्रा शुचिना वसनेनाऽऽच्छादिते उदक्शिरसि जातके दत्ते मातरिं चाऽनुपृष्ठम् परिक्क्रम्म्योत्तरतो गत्त्वोदगग्ग्रेषु कुशेषु स्थितायात्र् जातकमङ्क्के कृत्त्वा जातकपित्त्रा जातकनाम्नोः करणे प्रयोज्ज्यौ मन्त्रौ]

४९५. अमुकशर्म्मा असि । (अमुकी देवी असि) ।

४९६. नक्क्षत्रदेवतानाम्म्ना अमुकशर्म्मा असि।
(नक्क्षत्रदेवतानाम्म्ना अमुकी देवी असि) ।

[जातकनामनी कृत्त्वा जातकपित्त्रा तन्नाम्म्नोर् जातकमात्त्रे प्रथममाक्ख्याने मन्त्रौ]

४९७. अमुकशर्म्मा एषः । (अमुकी देवी एषा) ।

४९८. नक्क्षत्रदेवतानाम्म्ना अमुकशर्म्मा एषः ।
(नक्क्षत्रदेवतानाम्म्ना अमुकी देवी एषा) ।

(निष्क्रमणिकायां सूर्योदीक्षणे मन्त्रः [पार. १।१७।६])

४९९. तच् चक्क्षुर्द् देवहितम् पुरस्त्ताच् छुक्क्रमुच्चरत् । पश्श्येम शरदः शतञ् जीवेम शरदः शतꣳ शृणुयाम शरदः शतम् प्रब्ब्रवाम शरदः शतमदीनाः स्याम शरदः शतम् भूयश्च् च शरदः शतात् ॥ मासं. ३६।२४॥

(अन्नप्राशनसंस्कारमन्त्राः)

[आज्ज्यभागौ हुत्त्वाऽऽज्ज्याहुत्त्योर् हवने मन्त्रौ (पार. १।१९।२,३)]

५००. देवीवँ वाचमजनयन्त देवास्त् तावँ विश्श्वरूपाः पशवो बदन्ति ।
सा नो मन्द्रेषमूर्ज्जन् दुहाना धेनुर्ब् बागस्म्मानुप सुष्ट्टुतैतुस् स्वाहा ॥
(एतद् वाचे न मम) ।

५०१. बाजो नोऽ अद्द्यप् प्रसुवाति दानवँ वाजो देवाꣳऽ ऋतुभिः कल्प्पयाति ।
बाजो हि मा सर्ब्ववीरञ् जुजान बिश्श्वाऽ आशा बाजपतिर्ज् जयेयम्॥
(एतद् वाचे वाजाय च न मम) ॥ मासं. १८।३३॥

[स्थालीपाकस्स्य हवने मन्त्राः (पार. १।१९।४)]

५०२. प्राणेनाऽन्नमशीयस् स्वाहा (एतत् प्राणाय न मम) ।

५०३. अपानेन गन्धानशीयस् स्वाहा (एतदपानाय न मम) ।

५०४. चक्क्षुषा रूपाण्ण्यशीयस् स्वाहा (एतच् चक्क्षुषे न मम) ।

५०५. श्रोत्त्रेण बशोऽशीयस् स्वाहा (एतच् छ्रोत्त्राय न मम) ।

[बालान्नप्राशने ऐच्छिको मन्त्रः (पार. १।१९।६)]

५०६. हन्त ।

(चूडाकरणसंस्कारमन्त्राः)

[संस्रवप्राशनान्ते शीतास्स्वप्सूष्णानामासेचने मन्त्रः (पार. २।१।६)]

५०७. उष्ण्णेन बायऽ उदकेनेह्ध्यदिते केशान् न्वप ।

[दक्षिणस्य गोदानस्योन्दने मन्त्रः (पार. २।१।९)]

५०८. सवित्त्राप् प्रसूता दैव्व्याऽ आपऽ उन्दन्तु ते तनून्
दीर्ग्घायुत्त्वाय बर्च्चसे ।

[त्रयाणाङ् कुशतरुणानामन्तर्द्धाने मन्त्रः (पार. २।१।१०)]

५०९. ओषधेत् त्रायस्स्व ॥ मासं. ४।१ ॥

[लोह-(ताम्र-)क्षुरस्स्याऽऽदाने मन्त्रः (पार. २।१।११)]

५१०. शिवो नामासिस् स्वधितिस्त् ते पिता नमस्त् तेऽ अस्त्तु
मा मा हिं सीः ॥ मासं. ३।६३ ॥

[कुशतरुणेषु क्षुरस्स्य योजने मन्त्रः (पार. २।१।११)]

५११. निर्वर्त्तयाम्म्यायुषेऽन्नाद्द्यायप् प्रजननाय रायस्प्पोषाय
सुप्प्रजास्त्त्वाय सुवीर्य्याय ॥ मासं. ३।६३ ॥

[दक्षिणगोदाने सकेशानाङ् कुशतरुणानाम् प्रच्छेदने मन्त्रः (पार. २।१।११)]

५१२. येनाऽवपत् त्सविताक् क्षुरेण सोमस्स्य राज्ञ्ञो बरुणस्स्य विद्वान् ।
तेनब् ब्रह्म्माणो बपतेदमस्स्याऽऽयुष्म्मान् जरदष्ट्टिर्ष् यथाऽसत् ॥

[पश्चाद्गोदाने सकेशानाङ् कुशतरुणानाम् प्रच्छेदने मन्त्रः (पार. २।१।१५)]

५१३. त्र्यायुषञ् जमदग्ग्नेः कश्श्यपस्स्यत् त्र्यायुषम् ।
यद् देवेषुत् त्र्यायुषन् तन् नोऽ अस्त्तुत् त्र्यायुषम् ॥ मासं. ३।६२ ॥

[सव्व्यगोदाने सकेशानाङ् कुशतरुणानाम् प्रच्छेदने मन्त्रः (पार. २।१।१६)]

५१४. येन भूरिश्च् चरा दिवञ् ज्योक्क् च पश्च्चाद् धि सूर्य्यम् ।
तेन ते बपामिब् ब्रह्म्मणा जीवातवे जीवनाय
सुश्श्लोक्क्यायस् स्वस्त्तये ॥

[क्षुरस्स्य शिरः परितस् त्रिर् हरणे मन्त्रः (पार. २।१।१८)]

५१५. यत्त् क्षुरेण मज्जयता सुपेशसा बप्प्त्वा बावपति केशान् ।
छिन्धि शिरो माऽस्स्याऽऽयुःप् प्रमोषीः ॥

[नापिताय क्षुरस्स्य प्प्रदाने मन्त्रः (पार. २।१।२०)]

५१६. अक्क्षण्ण्वन्न् परि वप ।

(कर्णवेधसंस्कार[1]मन्त्रौ)

[कर्णवेधे दक्षिणकर्णाभिमन्त्रणे मन्त्रः (कात्त्यायनगृह्यसूत्त्रे, मासं. २५।२१)]

५१७. भद्द्रङ् कर्ण्णेभिः शृणुयाम देवा भद्द्रम् पश्श्येमाऽक्क्षभिर्ष् यजत्त्राः ।
स्थिरैरङ्गैस्त् तुष्ट्टुवाꣳसस्त् तनूभिर्ब् ब्यशेमहि देवहितयँ यदायुः ॥

(कर्णवेधे सव्व्यकर्णाभिमन्त्रणे मन्त्रः (कात्त्यायनगृह्यसूत्त्रे, मासं. २९।४०)]

---

१. कर्णवेधसंस्कारः पारस्क्करेण न विहितः, किन्तु समावर्तने कर्णवेष्टप्रयोगस्य पारस्क्करेण विहितत्वात् तदर्थङ् कर्णवेधस्याकाङ्क्षितत्त्वात् कात्त्यायनगृह्यसूत्त्रमनुसृत्त्यैतौ मन्त्रावत्त्र सङ्गृहीतौ ।

५१८. वक्क्ष्यन्तीवेदागनीगन्ति कर्ण्णम् प्रिय॑ सखायम् परिषस्स्वजाना ।
योषेव शिङ्क्ते वितताऽधि धन्न्वञ् ज्याऽ इय॑ समने पारयन्ती ॥

(उपनयनसंस्कारमन्त्राः [पार. २।२।१-२।५।४३])

[पर्युप्तशिरसोऽलङ्कृत्त्यानीतस्स्याऽग्नेः पश्चाद् आचार्यस्स्य दक्षिणतोऽवस्थापितस्स्य कुमारस्स्य वाचने आचार्येण कुमारेण च यथार्हम् प्रयोज्ज्या मन्त्राः (पार. २।२।६, शत.११।५।४।१)]

५१९. ब्रह्म्मचर्य्यमागाम् इतिव् ब्रूहि । ५२० ब्रह्म्मचर्य्यमागाम् ।
५२१. ब्रह्म्मचार्य्यसानि इतिव् ब्रूहि । ५२२. ब्रह्म्मचार्य्यसानि ॥

[कुमारस्स्य वासःपरिधापने आचार्येण प्रयोज्ज्यो मन्त्रः (पार. २।२।७)]

५२३. येनेन्द्राय बृहस्प्पतिर्व् वासः पर्य्यदधादमृतम् ।
तेनत् त्वा परिदधाम्म्यायुषे दीर्ग्घायुत्त्वाय बलाय बर्च्चसे ॥

[कुमारस्स्य कट्ट्याम् मेखलाया वन्धने आचार्येण प्रयोज्ज्यो मन्त्रः (पार. २।२।८)]

५२४. इयन् दुरुक्क्तम् परिवाधमाना बर्ण्णम् पवित्त्रम् पुनती मऽ आगात् ।
प्राणापानाब्भ्याम् बलमादधानास् स्वसा देवी सुभगा मेखलेयम् ॥

[कुमारस्स्य कट्ट्याम् मेखलाया बन्धने वैकल्पिको मन्त्रः (पार. २।२।९)]

५२५. युवा सुवासाः परिवीतऽ आगात् त्सऽ उश् श्रेयान्न् भवति जायमानः ।
तन् धीरासः कवयऽ उन्नयन्तिस् स्वाद्ध्यो मनसा देवयन्तः ॥

[कुमारस्स्य आचार्यदत्तदण्डप्प्रतिग्ग्रहणे मन्त्रः (पार. २।२।१२)]

५२६. यो मे दण्डः परापतद् वैहायसोऽधि भूम्म्याम् ।
तमहम् पुनराददऽ आयुषेव् ब्रह्म्मणेव् ब्रह्म्मवर्च्चसाय ॥

[आचार्याञ्जलिगृहीताभिरद्भिः कुमारस्स्याञ्जलेः पूरणे मन्त्राः (पार. २।२।१४)]

५२७. आपो हिष्ट्ठा मयोभुवस्त् ता नऽ ऊर्ज्जे दधातन ।
महे रणाय चक्क्षसे ॥ मासं. ११।५०, ३६।१४॥
५२८. यो वः शिवतमो रसस्त् तस्स्य भाजयतेह नः ।
उशतीरिव मातरः ॥ मासं. ११।५१, ३६।१५॥
५२९. तस्म्माऽ अरङ् गमाम वो यस्स्यक् क्षयाय जिन्न्वथ ।
आपो जनयथा च नः ॥ मासं. ११।५२, ३६।१६॥

[सूर्यस्स्योदीक्क्षणे कुमारस्स्य प्रेषणे मन्त्रः (पार. २।२।१५)]

५३०. सूर्यमुदीक्क्षस्स्व ।

[आचार्यवाचितेन कुमारेण सूर्योदीक्षणे प्रयोज्ज्यो मन्त्रः (पार. २।२।१५)]

५३१. तच् चक्क्षुर्द् देवहितम् पुरस्त्ताच् छुक्क्रमुच्चरत् । पश्श्येम शरदः शतञ् जीवेम शरदः शत॑ शृणुयाम शरदः शतम् प्रब्ब्रवाम शरदः शत-मदीनाः स्याम शरदः शतम् भूयश्च् च शरदः शतात् ॥ मासं. ३६।२४॥

[कुमारस्स्य दक्षिणांसमधि हस्तन् नीत्त्वा हृदयस्स्यालम्भने आचार्यप्रयोज्ज्यो मन्त्रः (पार. २।२।१६)]

५३२. ममव् ब्रते ते हृदयन् दधामि मम चित्तमनु चित्तन् तेऽ अस्त्तु ।
मम वाचमेकमना जुषस्स्व बृहस्प्पतिष्ट्वा नियुनक्क्तु मह्य्यम् ॥

[कुमारस्स्य दक्षिणं हस्तं साङ्गुष्ठङ् गृहीत्त्वाऽऽचार्येणोच्चार्यः प्रश्नमन्त्रः (पार. २।२।१७)]

५३३. को नामाऽसि ॥ शत. ११।५।४।१॥

[कुमारेणाऽऽत्मनिवेदने प्रयोज्ज्यो मन्त्रः (पार. २।२।१८)]

५३४. अमुकशर्म्मा अमुकगोत्त्रः अमुकप्प्रवरः माद्ध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाद्ध्यायिकुलोत्पन्नोऽहम् भोः ।

[कुमारस्स्य दक्षिणं हस्तं साङ्गुष्ठङ् गृहीत्त्वाऽऽचार्येणोच्चार्यः प्रश्नमन्त्रः (पार. २।२।१९)]

५३५. कस्स्यव् ब्रह्म्मचार्य्यसि ॥ शत. ११।५।४।२॥

[कुमारेणाऽऽत्मनिवेदने प्रयोज्ज्यो मन्त्रः (पार. २।२।२०)]

५३६. भवतः ।

[कुमारेण भवत इत्युच्च्यमाने आचार्येणोच्चार्यो मन्त्रः (पार. २।२।२०)]

५३७. इन्द्रस्स्यब् ब्रह्म्मचार्य्यसस्यग्गँनिराचार्य्यस्त् तवाहमाचार्य्यसत् तव(अमुकशर्म्मन्) ॥ शत. ११।५।४।२॥

[ब्रह्म्मचारिणो भूतेब्भ्यः परिदाने आचार्येण प्प्रयोज्ज्यो मन्त्रः (पार. २।२।२१)]

५३८. प्रजापतयेत् त्वा परिददामि देवायत् त्वा सवित्त्रे परिददाम्म्यद्द्भ्यस्त् त्वौषधीब्भ्यः परिददामिद् द्यावापृथिवीब्भ्यान् त्वा परिददामि विश्श्वेव्भ्यस्त् त्वा देवेब्भ्यः परिददामि सर्व्वेब्भ्यस्त् त्वा भूतेब्भ्यः परिददाम्म्यरिष्ट्ट्यै ॥ शत. ११।५।४।३,४॥

[संस्रवप्राशनान्ते ब्रह्म्मचारिणः संशासने आचार्येण प्प्रयोज्ज्या मन्त्राः (पार. २।३।२)]

५३९. ब्रह्म्मचार्य्यसि, अपोऽशान, कर्म्म कुरु, मा दिवा सुषुप्प्थाः, बाचयँ यच्छ, समिधमाधेहि, अपोऽशान ॥ शत. ११।५।४।५॥

[ब्रह्म्मचारिणा संशासनस्स्वीकारे प्रयोज्ज्यो मन्त्रः]

५४०. ओम् ।

[पादोपसङ्ग्रहणपूर्वकमाचार्योपसदने ब्रह्म्मचारिणा प्रयोज्ज्यो मन्त्रः]

५४१. अधीहि भोः , सावित्त्रीम् भो अनुब्ब्रूहि ।

[आचार्येणोपसन्नाय ब्रह्म्मचारिणेऽनुवचनीयः
प्रतिविरामम् ब्रह्म्मचारिणा चाऽनूच्चारणीयो मन्त्रः (पार. २।३।५)]

५४२. तत् त्सवितुर्ब् बरेण्ण्यम् । भर्ग्गो देवस्स्य धीमहि । धियो यो नःप् प्रचोदयात् ॥
तत् त्सवितुर्ब् बरेण्ण्यम् भर्ग्गो देवस्स्य धीमहि । धियो यो नःप् प्रचोदयात् ॥

[आचार्येण ब्रह्म्मचारिणा सहाऽनुवर्तनीयो मन्त्रः (पार. २।३।५)]

५४३. तत् त्सवितुर्ब् बरेण्ण्यम् भर्ग्गो देवस्स्य धीमहि । धियो यो नःप् प्रचोदयात् ॥

[अग्नेः परिसमूहने आचार्यवाचितेन ब्रह्म्मचारिणा प्रयोज्ज्यो मन्त्रः (पार. २।४।२)]

५४४. अग्ग्ने सुश्श्रवः सुश्श्रवसम् मा कुरु, यथात् त्वमग्ग्ने सुश्श्रवः सुश्श्रवाऽ असस्स्येवम् मा सुश्श्रवः सौश्श्रवसङ् कुरु, यथात् त्वमग्ग्ने

देवानायँ यज्जँञस्य निधिपाऽ असस्येवमहम् मनुष्याणावँ वेदसस्य निधिपो भूयासम् ।'

[समिदाधाने आचार्यवाचितेन ब्रह्मचारिणा प्रयोज्ज्यो मन्त्रः (पार. २।४।३)]

५४५. अग्गँनये समिधमाहार्षम् वृहते जातवेदसे, यथात् त्वमग्गँने समिधा समिद्ध्यसऽ एवमहमायुषा मेधया बर्च्चसाप् प्रजया पशुभिर्ब् ब्रह्म्म्-वर्च्चसेन समिन्धे । जीवपुत्रो ममाऽऽचार्य्यो मेधाब्व्यहमसानि । अनिराकरिष्णुर्य् यशस्स्वी तेजस्स्वीव् ब्रह्म्मवर्च्चसस्यन्नादो भूयास ँ स्वाहा ॥

[समिदाधाने आचार्यवाचितेन ब्रह्म्मचारिणा प्रयोज्ज्यो वैकल्पिको मन्त्रः (पार. २।४।५)]

५४६. एषा तेऽ अग्गँने समित् तया बर्द्धस्स्व चाऽऽ चेप् प्यायस्स्व । वर्द्धिषीमहि च बयमा चेप् प्यासिषीमहि ॥ मासं. २।१४॥

[अग्नौ पाणी प्रतप्य मुखस्स्य विमार्जने आचार्यवाचितेन ब्रह्म्मचारिणा प्रयोज्ज्यो मन्त्रः (पार. २।४।७)]

५४७. तनूपाऽ अग्गँनेऽसि तन्न्वम् मे पाह्य्यायुर्द्दाऽ अग्गँनेऽस्स्यायुर्म्मे देहि बर्च्चोदाऽ अग्गँनेऽसि बर्च्चो मे देहि । अग्गँने यन्न् मे तन्न्वाऽ ऊनन् तन्न् मऽ आपृण ॥ मेधाम् मे देवः सविताऽ आदधातु, मेधाम् मे देवी सरस्स्वतीऽ आदधातु, मेधाम् मेऽ अश्श्विनौ देवावाधत्ताम् पुष्क्करस्स्रजौ[1] ॥ (द्र.-शत्रुघ्नमिश्रकृता मन्त्रार्थदीपिका) ॥

[भिक्षाचर्यचरणे ब्रह्म्मचारिणा प्रयोज्ज्यो मन्त्रः (पार. २।५।२)]

५४८. भवति, भिक्क्षान् देहि[2] ।

[आचार्याय भैक्षनिवेदने ब्रह्म्मचारिणा प्रयोज्ज्यो मन्त्रः]

५४९. एतदद् भैक्क्षम्[3] ।

[भैक्षस्वीकरणे आचार्येण प्रयोज्ज्यो मन्त्रः]

५५०. सुभैक्क्षम् ।

(अद्ध्यायोपाकर्म-[यजुर्वेदोपाकरण-(वेदारम्भसंस्कार-)]मन्त्राः [पार. २।१०।१-२५])

[आज्ज्यभागहवनान्ते आज्ज्याहुतीनां हवने आचार्येण प्रयोज्ज्या मन्त्राः (पार. २।१०।५,८,९)]

५५१. अन्तरिक्क्षाय स्वाहा (एतदन्तरिक्क्षाय न मम) ।

५५२. बायवे स्वाहा (एतद् वायवे न मम) ।

५५३. ब्रह्म्मणे स्वाहा (एतद् ब्रह्म्मणे न मम) ।

---

१. सर्वमन्त्रान्ते इतिकरणात् प्रत्त्येकमित्त्यादेर् विशेषवचनस्स्याभावादेक एव मन्त्र इति विज्ज्ञायते ।

२. भिक्षावाक्क्यमेतद् ब्राह्म्मणेन ब्रह्म्मचारिणा प्रयोज्ज्यम् , क्षत्त्रियेण "भिक्क्षाम् भवति देहि" इति वैश्श्येन "भिक्क्षान् देहि भवति" इति प्प्रयोज्ज्यम् (द्र. पार. २।५।२,३,४) । भिक्षावाक्क्ये मे-पदप्प्रयोगोऽशास्त्रीय इति गोभिलगृह्य्यसूत्त्रटिप्पण्ण्याम् (पृ. ४९०), जैमिनिगृह्य्ये, वाराहगृह्य्ये, वौधायनगृह्य्ये च मे-पदरहितमेव वाक्क्यन् दृश्श्यते ।

३ "एतदद् भैक्क्षम्" इति "सुभैक्क्षम्" इति च वाक्क्यद्द्वयम् उञ्छशास्त्रस्स्थम् प्रयोगवँ विचार्य कल्पितम् वोद्ध्यम् । अतः परङ् कर्तव्व्ये समिदाधाने साङ्गे प्रयोज्ज्या मन्त्राः पूर्वमेव सङ्गृहीताः ।

५५४. छन्दोब्भ्यः स्वाहा (एतच् छन्दोब्भ्यो न मम)।
५५५. प्रजापतये स्वाहा (एतत् प्रजापतये न मम)।
५५६. देवेब्भ्यः स्वाहा (एतद् देवेब्भ्यो न मम)।
५५७. ऋषिब्भ्यः स्वाहा (एतदृषिब्भ्यो न मम)।
५५८. श्रद्धायै स्वाहा (एतच् छ्रद्धायै न मम)।
५५९. मेधायै स्वाहा (एतन् मेधायै न मम)।
५६०. सदसस्प्पतये स्वाहा (एतत् सदसस्प्पतये न मम)।
५६१. अनुमतये स्वाहा (एतदनुमतये न मम)।

[आचार्येण कर्तव्येऽक्षतधानानां हवने आचार्येण पठनीयश् शिष्यैश्चाऽनुपठनीयो मन्त्रः (पार. २।१०।११,१२)]

५६२. सदसस्प्पतिमद्द्भुतम् प्रियमिन्द्रस्स्य काम्म्यम्।
सनिम् मेधामयासिषुं स्वाहा॥ मासं. ३२।१३॥

[आचार्येणाऽक्क्षतधानाहुतौ हुतायाम् आहुत्यन्ते आचार्येण व्रतस्नातकगृहस्थव्रतस्नातकवानप्रस्थशिष्यैश्[1] च औदुम्वर्याः समिध आधाने प्रयोज्ज्यो मन्त्रः (पार. २।१०।१३)]

५६३. तत् त्सवितुर्व्व् बरेण्ण्यम् भर्ग्गो देवस्स्य धीमहि।
धियो यो नः प्प्रचोदयात्॥ मासं. ३।३५, २२।९, ३०।२, ३६।३॥

[आचार्यस्स्य शिष्ष्याणाञ् चाऽक्षतधानाप्राशने मन्त्रः (पार. २।१०।१५, मासं. ९।१६,२१।१०)]

५६४. शन् नो भवन्तु बाजिनो हवेषु देवताता मितद्द्रवः स्वर्क्काः।
जम्भयन्तोऽहिव्ँ वृकं रक्क्षाँसि सनेम्म्यस्म्मद् युयवन् नमीवाः॥

[आचार्यस्स्य शिष्ष्याणाञ् च दधिभक्षणे मन्त्रः (पार. २।१०।१६)]

५६५. दधिक्क्राव्ण्णोऽ अकारिषञ् जिष्ण्णोरश्श्वस्स्य बाजिनः।
सुरभि नो मुखा करत्त् प्र णऽ आयूँषि तारिषत्॥ मासं. २३।३२॥

[ऐच्छिके आकर्षफलकेन तिलानां हवने आचार्येण प्रयोज्ज्यो मन्त्रः (पार. २।१०।१७)]

५६६. तत् त्सवितुर्व्व् बरेण्ण्यम् भर्ग्गो देवस्स्य धीमहि।
धियो यो नः प्प्रचोदयात्॥ मासं. ३।३५, २२।९, ३०।२॥

[ऐच्छिके आकर्षफलकेन तिलानां हवने आचार्येण प्प्रयोज्ज्यो वैकल्पिकोऽनुवाकमन्त्रः (पार. २।१०।१७)]

५६७. शुक्क्रज्ज्योतिश्च् च चित्त्रज्ज्योतिश्च् च सत्त्यज्ज्योतिश्च् चज्
ज्योतिष्म्माँश्च् च। शुक्क्रश्च् चऽ ऋतपाश्च् चाऽतत्त्यंहाः॥ मासं. १७।८०॥
ईदृङ्ङ् चाऽन्न्यादृङ्ङ् च सदृङ्ङ् चप् प्रतिसदृङ्ङ् च।
मितश्च् च सम्मितश्च् च सभराः॥ मासं. १७।८१॥
ऋतश्च् च सत्त्यश्च् चद् ध्रुवश्च् च धरुणश्च् च।
धर्त्ता च विधर्त्ता च विधारयः॥ मासं. १७।८२॥

---

१. ब्रह्म्मचारिभिश् शिष्यैस् तु उपनयनोक्तकल्पेनात्रौदुम्बरसमिदाधानङ् कर्तव्व्यम्, तन्मन्त्राश्च तत्रैव सङ्गृहीताः।

ऋतुजिच् च सत्यजिच् च सेनजिच् च सुषेणश्च् च ।
अन्तिमित्रश्च् च दूरेऽ अमित्रश्च् च गणः॥ मासं. १७८३॥
ईदृक्क्षासऽ एतादृक्क्षासऽ ऊ षु णः सदृक्क्षासः प्रतिसदृक्क्षासऽ एतन ।
मितासश्च् च सम्मितासो नोऽ अद्य सभरसो मरुतो यज्ञेऽ अस्मिन् ॥ १७८४॥
स्वतवांश्च् चप् प्रघासी च सान्तपनश्च् च गृहमेधी च ।
क्रीडी च शाकी चोज्जेषी ॥ मासं. १७८५॥
इन्द्रन् दैवीरब् बिशो मरुतोऽनुवरत्तमानोऽभवन् न्यथेन्द्रन् दैवीरब् बिशो मरुतो-ऽनुवरत्तमानोऽभवन् । एवमिमयँ यजमानन् दैवीश्च् च बिशो मानुपीश्च् चाऽ-नुवरत्तमानो भवन्तु ॥ मासं. १७८६॥

[संस्रवप्राशनान्तेऽन्यदा च स्वाद्ध्यायप्प्रवचनप्रारम्भे आचार्येण प्रयोज्यौ मन्त्रौ (पार. २।१०।१८)]

५६८. ओ३म् ॥ मासं. ४०।१५॥

५६९. तत् त्संवितुरब् बरेण्ण्यम् भरग्गो देवसस्य धीमहि । धियो यो नःप् प्रचोदयात् । तत् त्संवितुरब् बरेण्ण्यम् भरग्गो देवसस्य धीमहि । धियो यो नःप् प्रचोदयात् । तत् त्संवितुरब् बरेण्ण्यम् भरग्गो देवसस्य धीमहि । धियो यो नःप् प्रचोदयात् ॥ मासं. ३।३५, २२।९, ३०।२ ॥

[स्वाद्ध्यायप्प्रवचनसमाप्तौ आचार्येण शिष्येश्च् च सहैव जपनीयो मन्त्रः (पार. २।१०।२२)]

५७०. सह नोऽस्त्तु सहनोऽवतु सह नऽ इदवँ वीरय्यवदस्त्तुव् ब्रह्म्म ।
इन्द्रस्त् तद् द्वेद येन यथा न बिद्द्विषामहे ॥

(अद्ध्यायोत्सरजनमन्त्राः [पार. २।१२।२-४; २।११।१२, १३])

[प्रातस्सन्ध्यान्तङ् कर्म कृत्त्वाऽऽचार्यगृहे संस्रवप्रासनान्ते होमे उपाकर्मणीव कृते, आचार्येण उपाकर्मणीव स्वाद्ध्यायप्रवचनकर्मणि च सम्पादिते, सर्वैः सह नोऽस्त्वति मन्त्रे च जप्ते, अनिराकरण-मन्त्रे च प्रयुक्ते माद्ध्याह्ननिकस्नानात् प्रागेव उदकान्तगमनङ् कृत्त्वा स्नानमपि विधाय वा कर्तव्ये अपूर्ववेदग्रहणाद्ध्ययनविरामफलकादध्यायोत्सर्जनकर्माङ्गतर्पणे मन्त्राः (पार. २।१२।२)]

५७१. देवास् तृप्प्यन्ताम् । ५७२. छन्दाꣳसि तृप्प्यन्ताम् ।
५७३. बेदास् तृप्प्यन्ताम् । ५७४. ऋषयस् तृप्प्यन्ताम् ।
५७५. पुराणाचार्य्यास् तृप्प्यन्ताम् । ५७६. गन्धरब्बास् तृप्प्यन्ताम् ।
५७७. इतराचार्य्यास् तृप्प्यन्ताम् । ५७८. संवँवत्सरः सावयवस् तृप्प्यताम् ।
५७९. पितरस् तृप्प्यन्ताम् । ५८०. आचार्य्यास् तृप्प्यन्ताम् ।
५८१. अस्म्मत्पितरस् तृप्प्यन्ताम् ॥

[तर्पणान्ते आचार्येण शिष्यैश् च सहैव चतुर्वारम् अनुद्द्रवणीयो मन्त्रः (पार. २।१२।३)]

५८२. तत् त्संवितुरब् बरेण्ण्यम् भरग्गो देवसस्य धीमहि ।
धियो यो नःप् प्रचोदयात् ॥ मासं.३।३५, २२।९, ३०।२॥

[सावित्रीपठनान्ते आचार्येण शिष्यैश्च प्रयोज्यो मन्त्रः (पार. २।१२।३)]

५८३. बिरताः स्मः ।

[अद्ध्यायोत्सर्जनकर्मान्ते आचार्येण शिष्यैश्च जपनीयो मन्त्रः (पार. २।१२।४, २।११।१२)]

५८४. उभा कवी युवा यो नो धरम्मः परापतत् ।
परिसक्ख्यस्य धरम्मिणो बिसक्ख्यानि बिसृजामहे ॥

(केशान्तसंस्कारे विशिष्टौ मन्त्रौ [पार. २।१।३-२४])

[शीतास्स्वप्सूष्णानामपामासेचने मन्त्रः (पार. २।१।६,७)]

५८५. उष्ण्णेन बाय उदकेनेह्य्यदिते केशश्म्मश्श्रु बप ।

[क्षुरसस्य समुखं शिरः परितो हरणे मन्त्रः (पार. २।१।१७, १८, १९)]

५८६. यतत् क्षुरेण मज्जयता सुपेशसा बप्प्त्वा बावपति केशश्म्मश्श्रु ।
छिन्धि शिरो मुखम् माऽस्स्याऽऽयुःप् प्रमोषीः ॥

(स्नान-[समावर्तन-]मन्त्राः [पार. २।६।१-३२])

[गुरुदक्क्षिणादानपूर्वकं स्नानानुज्ञाप्रार्थने ब्रह्म्मचारिणा प्रयोज्ज्यो मन्त्रः]

५८७. एषा दक्क्षिणा; भो गुरो, स्नास्स्यामि ।

[आचार्येण अनुज्ज्ञाया दाने प्रयोज्ज्यो मन्त्रः]

५८८. ओम् । स्नाहि ॥

[आचार्येण व्रतविसर्गहोमे संस्रवप्राशनान्ते कृते (पार. २।१०।१०) गुरुमुपसङ्गृह्य्य समिधोऽब्भ्याधाय गुरुगृहस्स्य पूर्वतः स्थितस्स्य परिश्रितस्स्योत्तरतः दक्क्षिणोत्तरायततया स्थापितानामुदकुम्भानाम् पूर्वत उदङ्मुखतया स्थितेन स्नास्स्यता ब्रह्म्मचारिणा एकैकस्म्मादुदकुम्भाद् यथाक्रमयँ यथाकालमपाङ् ग्रहणे प्रयोज्ज्यो मन्त्रः (पार. २।६।१०)]

५८९. येऽ अप्प्स्वन्तरग्ग्नँयःप् प्रविष्ट्टा गोह्य्यऽ उपगोह्य्यो मयूषो
मनोहाऽस्क्खलो बिरुजस्त् तनूदूषुरिन्द्रियहा तान् न्विजहामि
यो रोचनस्त् तमिह गृह्ण्णामि ।

[प्रथमादुदकुम्भाद् दक्क्षिणहस्तचुलुके उदपात्त्रान्तरे वा गृहीताभिरद्भिश् शिरस्स्यात्मनोऽभिषेचने मन्त्राः (पार. २।६।११)]

५९०. तेन मामभिषिञ्चामिश् श्रियै यशसेब् ब्रह्म्मणेब् ब्रह्म्मवर्च्चसाय ।

[द्वितीयादुदकुम्भाद् गृहीताभिरद्भिश् शिरस्स्यात्मनोऽभिषेचने मन्त्रः (पार. २।६।१२)]

५९१. येनश् श्रियमकृणुतायँ येनावमृशताँ सुराम् ।
येनाक्क्ष्यावब्भ्यषिञ्चतायँ यद् द्वान् तदश्श्विना यशः ॥
(तेन मामभिषिञ्चतम्) ॥

[तृतीयादुदकुम्भाद् गृहीताभिरद्भिश् शिरस्स्यात्मनोऽभिषेचने मन्त्रः (पार. २।६।१३)]

५९२. आपो हिष्ट्ठा मयोभुवस्त् ता नऽ ऊर्ज्जे दधातन ।
महे रणाय चक्क्षसे ॥ मासं. ११।५०॥

[चतुर्थादुदकुम्भाद् गृहीताभिरद्भिश् शिरस्स्यात्मनोऽभिषेचने मन्त्रः (पार. २।६।१३)]

५९३. यो वः शिवतमो रसस्त् तस्स्य भाजयतेह नः ।
उशतीरिव मातरः ॥ मासं. ११।५१॥

[पञ्चमादुदकुम्भाद गृहीताभिरद्भिश् शिरस्स्यात्मनोऽभिषेचने मन्त्रः (पार. २।६।१३)]

५९४. तस्म्माऽ अरङ् गमाम वो यस्स्यक्क्षयाय जिन्न्वथ ।
आपो जनयथा च नः ॥ मासं. ११।५२ ॥

[मेखलोन्मोचने प्रयोज्ज्यो मन्त्रः (पार. २।६।१५, मासं.१२।१२।)]

५९५. उदुत्तमवँ वरुण पाशमस्मदवाधमवँ वि मध्यम श्रथाय ।
अथा बयमादित्यब् ब्रते तवाऽनागसोऽ अदितयेस् स्याम ॥

[कुम्भोदकैरभिषिक्तस्स्य मेखलामुन्मुच्य दण्डन् निधाय वासोऽन्यत् परिधाय आदित्यस्स्योपस्थाने मन्त्रः (पार. २।६।१५,१६)]

५९६. उद्यन्न् भ्राजभृष्ण्णुरिन्द्रो मरुद्द्भिरस्त्थात्त् प्रातर्ख्यावभिरस्त्थाद् दशसनिरसि दशसनिम् मा कुर्ब्बाविदन्न् मा गमय । उद्यन्न् भ्राजभृष्ण्णुरिन्द्रो मरुद्द्भिरस्त्थाद् दिवायावभिरस्त्थाच् छतसनिरसि शतसनिम् मा कुर्ब्बाविदन्न् मा गमय । उद्यन्न् भ्राजभृष्ण्णुरिन्द्रो मरुद्द्भिरस्त्थात् त्सायय्ँयावभिरस्त्थात् त्सहस्स्रसनिरसि सहस्स्रसनिम् मा कुर्ब्बाविदन्न् मा गमय[1] ।

(अर्घ-[मधुपर्क-]मन्त्राः [पार.१।३।१-३१])

[अर्हणे कर्तव्व्ये अर्हयित्त्राऽऽसनमाहार्याऽर्घ्यम् प्रतिवोधयितुम् प्रयोज्ज्यो मन्त्रः (पार. १।३।४)]

५९७. साधु भवानास्त्तामर्च्चयिष्ष्यामो भवन्तम् ।

[आहृते आसने उपविश्श्य अर्हणीयेन अर्चनानुज्ज्ञाप्रदाने प्रयोज्ज्यो मन्त्रः]

५९८. अर्च्चयत ।

[अर्हयित्त्रा विष्टरार्पणे प्रयोज्ज्यो मन्त्रः (पार. १।३।५,६)]

५९९. बिष्ट्टरो बिष्ट्टरो बिष्ट्टरः (प्रतिगृह्य्यताम्) ।

[अर्हणीयेन विष्टरम् प्रतिगृह्य्य विष्टरे उपवेशने प्रयोज्ज्यो मन्त्रः (पार. १।३।८)]

६००. बर्ष्ष्मोस्म्मि समानानामुद्यतामिव सूर्य्यः ।
इमन् तमभितिष्ट्ठामि यो मा कश्च् चाऽभिदासति ॥

[अर्हयित्त्रोदकस्स्य समर्पणे प्रयोज्ज्यो मन्त्रः (पार. १।३।५,६)]

६०१. पादार्त्थमुदकम् पादार्त्थमुदकम् पादार्त्थमुदकम्(प्रतिगृह्य्यताम्) ।

[तूष्णीम् पादार्थमुदकम् प्रतिगृह्य्योदपात्त्रम् भूमौ निधायोदकङ् गृहीत्त्वागृहीत्त्वा क्रमेण पादयोः प्रक्षालने अर्हणीयेन प्रयोज्ज्यो मन्त्रः (पार. १।३।१२)]

६०२. बिराजो दोहोऽसि, बिराजो दोहमशीय, मयि पाद्यायै बिराजो दोहः ।

[पद्यविष्टरसमर्पणे अर्हयित्त्रा प्रयोज्ज्यो मन्त्रः (पार. १।३।५,६,९)]

६०३. पद्यम् पद्यम् पद्यम् (प्रतिगृह्य्यताम्)।

[तूष्णीम् पादार्थविष्टरम् प्रतिगृह्य्य तत्त्र अर्हणीयेन पादयोरारोपणे प्रयोज्ज्यो मन्त्रः (पार. १।३।८)]

---

१. अतः परन् दधितिलान्यतरप्प्राशन-जटालोमनखसंहरणोत्तरम् औदुम्बरेण दन्तधावनकाष्ठेन दन्तानां धावने, उत्सादनपूर्वकपुनस्स्नानोत्तरङ् कार्येषु अनुलेपनोपग्रहण-पाण्ण्यवनेजन- निषेचनानुलेपनोत्तर-जपाऽन्तरीयवासआच्छादनोत्तरीयवासX-प्रच्छादनग्रथितसुमनX-प्रतिग्रहणाऽऽवन्धनोष्णीपावेष्टन-कर्णवेष्टकाऽऽबन्धनाञ्जनादर्शप्रेक्षणच्छत्त्र-प्रतिग्रहणोपानदुपमोचन-वैणवदण्डाऽऽदानेषु प्रयोज्ज्या मन्त्राः पूर्वमेव सदाचारकाण्डे स्थानेस्थाने सङ्गृहीताः ।

६०४. बर्ष्ष्मोऽस्म्मि समानानामुद्द्यतामिव सूर्य्यः ।
इमन् तमभितिष्ट्ठामि यो मा कश्च् चाऽभिदासति ॥

[अर्घार्पणे अर्हयित्रा प्रयोज्ज्यो मन्त्रः (पार. १।३।५,६)]

६०५. अर्ग्घोऽर्ग्घोऽर्ग्घः(प्रतिगृह्य्यताम्) ।

[अर्घप्रतिग्ग्रहणे अर्हणीयेन प्रयोज्ज्यो मन्त्रः (पार. १।३।१३)]

६०६. आपस्त् थ युष्म्माभिः सर्व्वान्न् कामानवाप्पँनवानि ।

[अर्घम् प्रतिगृह्य्य (हस्तप्प्रक्षालनङ् कृत्त्वा)ऽपो निनयतोऽपामभिमन्त्रणे मन्त्रः (पार. १।३।१४)]

६०७. समुद्द्रवँ वःप् प्रहिणोमिस् स्वायँ योनिमभिगच्छत ।
अरिष्ट्टाऽ अस्म्माकवँ वीरा मा परासेचि मत्त् पयः ॥

[आचमनीयसमर्पणे अर्हयित्रा प्रयोज्ज्यो मन्त्रः (पार. १।३।५,६)]

६०८. आचमनीयमाचमनीयमाचमनीयम् (प्रतिगृह्य्यताम्) ।

[तूष्णीमाचमनीयम् प्रतिगृह्य्याचमने अर्हणीयेन प्रयोज्ज्यो मन्त्रः (पार. १।३।१५)]

६०९. आ मा गन् न्यशसा सँसृज बर्च्चसा ।
तम् मा कुरुप् प्रियम् प्रजानामधिपतिम् पशूनामरिष्ट्टिन् तनूनाम् ॥

[मधुपर्कार्पणे अर्हयित्रा प्रयोज्ज्यो मन्त्रः (पार. १।३।५,६)]

६१०. मधुपर्क्को मधुपर्क्को मधुपर्क्कः (प्रतिगृह्य्यताम्) ।

[अर्हयितृहस्तस्थोद्घाटितमधुपर्कप्रतीक्क्षणेऽर्हणीयेन प्रयोज्ज्यो मन्त्रः (पार. १।३।१६)]

६११. मित्त्रस्स्यत् त्वा चक्क्षुषाप् प्रतीक्क्षे ॥ काश्रौ. २।२।१३॥

[पात्त्रस्स्थस्स्य मधुपर्कस्स्य अञ्जलिना प्रतिग्रहणे मन्त्रः (पार. १।३।१७)]

६१२. देवस्स्यत् त्वा सवितुःप् प्रसवेऽश्श्विनोर्व्व् बाहुब्भ्याम् पूष्ण्णो
हस्त्ताब्भ्याम् । प्रतिगृह्ण्णामि ॥ मासं. २।११॥

[मधुपर्कपात्त्रं सव्व्ये पाणौ निधाय दक्षिणपाणेरनामिकया मधुपर्कस्स्य प्रयावणे (आलोडने)
अर्हणीयेन प्रयोज्ज्यो मन्त्रः (पार. १।३।१८)]

६१३. नमः श्यावास्स्यायाऽन्नशने यत् तऽ आविद्धन् तत् ते निष्कृन्तामि[1] ॥

[अनामिकाङ्गुष्ठेन त्रिर् निरुक्ष्य मधुपर्कस्स्य त्रिः प्राशने
प्रतिप्प्राशनम् प्रयोज्ज्यो मन्त्रः (पार. १।३।२०)]

६१४. यन्न् मधुनो मधव्व्यम् परमँ रूपमन्नाद्द्यम् । तेनाऽहम् मधुनो
मधव्व्येन परमेण रूपेणाऽन्नाद्द्येन परमो मधव्व्योऽन्नादोऽसानि ।

[मधुपर्कस्स्य त्रिःप्राशने प्रतिप्प्राशनङ् क्रमेण प्रयोज्ज्या वैकल्पिका मन्त्राः (पार. १।३।२१)]

६१५. मधु वाताऽ ऋतायते मधुक्क्षरन्ति सिन्धवः ।
माद्ध्वीर्न्नः सन्त्वोषधीः ॥ मासं. १३।२७॥

६१६. मधु नक्क्तमुतोषसो मधुमत्त् पार्त्थिवँ रजः ।
मधुद् द्यौरस्त्तु नः पिता ॥ मासं. १३।२८॥

---

१. हलायुधादिधृतोऽयम् मन्त्रपाठः, शत्त्रुघ्नमिश्श्रेण त्वन्न्यथाऽयम् मन्त्रः पठितः ।

६१७. मधुमान् नो बनस्पतिर्म् मधुमाꣳ२ऽ अस्तु सूर्य्यः ।
माद्ध्वीर्ग् गावो भवन्तु नः ॥ मासं. १३।२९॥

[अर्हणीये आचान्तोदके[1] अर्हयित्वा शासमादाय वचनीयो मन्त्रः (पार. १।३।२६)]

६१८. गौर्ग् गौर्ग् गौः (प्रतिगृह्यताम्) ।

[गवालम्भनपक्षे अर्हणीयेन प्रतिवचनतया प्रयोज्यो मन्त्रः (पार. १।३।२७,३०)]

६१९. माता रुद्राणान् दुहिता बसूनाꣳ स्वसाऽऽदित्यानाममृतस्य नाभिः ।
प्र नु बोचञ् चिकितुषे जनाय मा गामनागामदितिवँ वधिष्ट ॥
मम अर्हयितुरमुकशर्म्मणश्च् च पाप्पँमानꣳ हनोमि । ओङ् कुरुत ॥

[गवुत्सर्गपक्षे अर्हणीयेन प्रतिवचनतया प्रयोज्ज्यो मन्त्रः (पार. १।३।२७,२८)]

६२०. माता रुद्राणान् दुहिता बसूनाꣳ स्वसाऽऽदित्यानाममृतस्य नाभिः ।
प्र नु बोचञ् चिकितुषे जनाय मा गामनागामदितिवँ वधिष्ट ॥
मम अर्हयितुरमुकशर्म्मणश्च् च पाप्पँमा हतः ।
ओमुत्सृजत तृणान्न्यत्तु ॥

(विवाह-[पाणिग्रहण-]सँस्कारमन्त्राः[2] [पार. १।४।१–१।११।१०])

[बहिःशालायामग्निमुपसमाधाय कौतुकागारङ् कुमारीगृहवँ वा प्रविश्श्य वरेण कुमार्या वासःपरिधापने मन्त्रः (पार. १।४।१२)]

६२१. जराङ् गच्छ परिधत्स्व बासो भवा कृष्टीनामभिशस्तिपावा ।
शतञ् च जीव शरदः सुवर्च्चा रयिञ् च पुत्राननुसवँव्ययस्स्वा-
ऽऽयुष्म्मतीदम् परिधत्स्व बासः ॥

[वरेण कुमार्या उत्तरीयपरिधापने मन्त्रः (पार. १।४।१३)]

६२२. याऽ अकृन्तन् नवयन् न्याऽ अतन्न्वत
याश्च् च देवीस्त् तन्तूनभितो ततन्थ ।
तास्त् त्वा देवीर्ज् जरसे सवँव्ययस्स्वाऽऽयुष्म्मतीदम् परिधत्स्व बासः॥

[समञ्जने कुमारीवरयोः प्रेषणे कुमारीप्प्रदेन प्रयोज्ज्यो मन्त्रः]

६२३. युवाम् परस्परं समञ्जनङ् कुर्वाथाम् ।

[कुमारीवरयोः समञ्जनङ् करिष्ष्यतोस् सतोर् वरेण (कुमार्या च सहैव) पठनीयो मन्त्रः (पार. १।४।१४)]

६२४. समञ्जन्तु बिश्श्वे देवाः समापो हृदयानि नौ ।
सम् मातरिश्श्वा सन् धाता समु देष्ट्री दधातु नौ ॥

[कुमारीप्रदेन "इहाद्य अमुकीङ् कुमारीम् अमुकाय वराय पत्नीत्त्वेन तुब्भ्यं सम्प्रददे, प्रजापतिः प्रीयताम् , युवां सह धर्मार्थकामाँश् चरतम्" इत्यादिकयँ यथाचारम् प्रयुज्ज्य सकुशेन हस्तेन उदके

---

१. आचमनमन्त्रयुताः प्राणसम्मर्शनमन्त्राश् च पूर्वं सदाचारकाण्डप्रारम्भे एव सङ्गृहीताः ।

२. वाग्दानसम्बद्धाः पौराणमन्त्रास् तेषामत्त्यावश्श्यकताया अभावात् तेऽत्र न सङ्गृहीताः; विवाहात पूर्वम् आब्भ्युदयिकश्राद्धस्स्याऽत्त्यावश्श्यकत्त्वेऽपि तन्मन्त्राः श्राद्धकाण्डे एव यथास्थानयँ यथासूत्रञ् च सङ्ग्रहीष्ष्यन्ते ।

वरहस्ते दत्ते कुमार्याः सपरिच्छदायाः प्रतिग्रहे कुमार्या दक्षिणांसस्य दक्षिणहस्तस्य शिरसो वा स्पर्शे कर्तव्ये वरेण प्रयोज्यो मन्त्रः (पार. ३।१५।२१)]

६२५. द्यौस्त् त्वा ददातु पृथिवीत् त्वाप् प्रतिगृह्णणातु ।
[देवस्स्यत् त्वा सवितुःप् प्रसवेऽश्शिवनोर्ब् बाहुब्भ्याम् पूष्णणो हस्ततांब्भ्याम् । प्रजापतये कुमारीम्[1] पत्नीत्त्वेनप् प्रतिगृह्णणामि । स्वस्तति ।]

[कुमारीप्रतिग्रहानन्तरङ् कामस्तुतौ मन्त्रः]

६२६. कोऽदात्त् कस्म्मोऽ अदात्त् कामोऽदात्त् कामायाऽदात् ।
कामो दाता कामःप् प्रतिग्ग्रहीता कामैतत् तै ॥ मासं. ७।४८॥

[कुमारीप्रदेन प्रत्ताङ् कुमारीवँ वस्त्रान्ते समादाय निष्क्रमिष्यता वरेण पठनीयो मन्त्रः (पार. १।४।१५)]

६२७. यदैषि मनसा दूरन् दिशोऽनु पवमानो वा ।
हिरण्ण्यपर्ण्णो वैकर्ण्णः सत् त्वा मन्मनसाङ् करोतु (अमुकि देवि) ॥

[कुमारीवरयोः अग्निसमीपङ् गत्वा तत्पश्चाद् दक्षिणोत्तरवर्त्तितया स्थितयोस् सतोस् तयोः परस्परं समीक्षणे प्रेरणे कुमारीप्रदेन प्रयोज्यो मन्त्रः (पार. १।४।१६)]

६२८. परस्परं समीक्क्षेथाम् ।

[कुमारीवरयोः परस्परं समीक्षणे वरेण प्रयोज्या मन्त्राः (पार. १।४।१६)]

६२९. अघोरचक्क्षुरपतिग्घ्न्येधि शिवा पशुब्भ्यः सुमनाः सुवर्च्चाः ।
वीरसूर्द् देवकामास् स्योना शन् नो भवद् द्विपदे शञ् चतुष्प्पदे ॥

६३०. सोमःप् प्रथमो विविदे गन्धर्ब्वो विविदऽ उत्तरः ।
तृतीयोऽग्ग्निष्ट्टे पतिस्त् तुरीयस्त् ते मनुष्ष्यजाः ॥

६३१. सोमोऽददद्द् गन्धर्ब्वाय गन्धर्ब्वोऽदददग्ग्नये ।
रयिञ् च पुत्त्राँश्च् चाऽदादग्ग्निर्म् मह्यमथोऽ इमाम् ॥

६३२. सा नः पूषा शिवतमामैरय सा नऽ ऊरूऽ उशती विहर ।
यस्स्यामुशन्तःप् प्रहराम शेपयँ यस्स्यामु कामा बहवो निविष्ट्ट्यै ॥

[विवाहे सर्वप्रायश्चित्तहोमान्ते कर्तव्ये ऐच्छिके राष्ट्रभृद्धोमे मन्त्राः (पार. १।५।७ काश्रौ. १८।५।१६)]

६३३. ऋताषाडृतधामाऽग्ग्निर्ग् गन्धर्ब्वः ।
स नऽ इदम् ब्रह्म्मक्क्षत्त्रम् पातु तस्म्मैस् स्वाहा वाट् ॥ द्र.मासं.१८।३८॥

६३४. ऋताषाडृतधामाऽग्ग्निर्ग् गन्धर्ब्वस्त् तस्स्यौषधयोऽप्प्सरसो मुदो नाम ताब्भ्यः स्वाहा ॥ मासं. १८।३८॥

६३५. सꣳहितो विश्श्वसामा सूर्य्यो गन्धर्ब्वः ।
स नऽ इदम् ब्रह्म्मक्क्षत्त्रम् पातु तस्म्मैस् स्वाहा वाट् ॥ द्र.मासं. १८।३९॥

६३६. सꣳहितो विश्श्वसामा सूर्य्यो गन्धर्ब्वस्त् तस्स्य मरीचयोऽप्प्सरसऽ आयुवो नाम ताब्भ्यः स्वाहा ॥ द्र. मासं. १८।३९॥

६३७. सुषुम्म्णः सूर्य्यरश्म्मिश्च् चन्द्रमा गन्धर्ब्वः ।
स नऽ इदम् ब्रह्म्मक्क्षत्त्रम् पातु तस्म्मैस् स्वाहा वाट् ॥ द्र. मासं. १८।४०॥

---

१. कन्याप्रतिग्रहे तया सह दीयमानानामन्येषावँ वस्तूनाम् पृथगुल्लेखो नैव कर्तव्य इति चतुर्वर्गचिन्तामणौ दानखण्डे हेमाद्रिः, पृ. ९७।

६३८. सुषुम्मणः सूर्य्यरश्मिश्च् चन्द्रमा गन्धरब्बसत् तसस्य नक्क्षत्राण्यप्सरसो भेकुर्यो नाम ताब्भ्यः स्वाहा ॥ मासं. १८।४०॥
६३९. इषिरो बिश्श्वब्ब्यचा बातो गन्धरब्बः।
स नः इदम् ब्रह्मम्मक्क्षत्रम् पातु तस्ममैस् स्वाहा बाट् ॥ द्र. मासं. १८।४१॥
६४०. इषिरो बिश्श्वब्ब्यचा बातो गन्धरब्बसत् तसस्यापोऽ अप्प्सरसऽ ऊर्ज्जो नाम ताब्भ्यः स्वाहा ॥ मासं. १८।४१॥
६४१. भुज्ज्युः सुपरण्णो यज्ज्ञो गन्धरब्बः।
स नः इदम् ब्रह्मम्मक्क्षत्रम् पातु तस्ममैस् स्वाहा बाट् ॥ द्र. मासं. १८।४२॥
६४२. भुज्ज्युः सुपरण्णो यज्ज्ञो गन्धरब्बसत् तसस्य दक्क्षिणाऽ अप्प्सरसस्त् तावा नाम ताब्भ्यः स्वाहा ॥ मासं. १८।४२॥
६४३. प्रजापतिर्ब् बिश्श्वकर्म्मा मनो गन्धरब्बः।
स नः इदम् ब्रह्मम्मक्क्षत्रम् पातु तस्ममैस् स्वाहा बाट् ॥ द्र. मासं. १८।४३॥
६४४. प्रजापतिर्ब् बिश्श्वकर्म्मा मनो गन्धरब्बसत् तसस्यऽ ऋक्क्सामान्न्यप्प्सरसऽ एष्ट्टयो नाम ताब्भ्यः स्वाहा ॥ मासं. १८।४३॥

[विवाहे ऐच्छिके जयहोमे मन्त्राः (पार. १।५।७,९)]

६४५. चित्तञ् चस् स्वाहा । ६४६. चित्तिश्च् चस् स्वाहा ।
६४७. आकूतञ् चस् स्वाहा । ६४८. आकूतिश्च् चस् स्वाहा ।
६४९. बिज्ज्ञातञ् चस् स्वाहा । ६५०. बिज्ज्ञातिश्च चस् स्वाहा ।
६५१. मनश्च् चस् स्वाहा । ६५२. शक्क्वरीश्च चस् स्वाहा ।
६५३. दर्शश्च् चस् स्वाहा । ६५४. पौर्ण्णमासञ् चस् स्वाहा ।
६५५. बृहच् चस् स्वाहा । ६५६. रथन्तरञ् चस् स्वाहा ।
६५७. प्रजापतिर्ज् जयानिन्द्राय बृष्ण्णेप् प्रायच्छदुग्ग्रः पृतना जयेषु ।
तस्म्मै बिशः समनमन्त सर्ब्बाः सऽ उग्ग्रः सऽ इ हब्ब्यो बभूवस् स्वाहा ॥

[विवाहे ऐच्छिके अब्भ्यातानहोमे मन्त्राः (पार. १।५।७, १०)]

६५८. अग्ग्निर्ब् भूतानामधिपतिः स माऽवतत्वस्म्मिन्न् ब्रह्मम्मण्ण्यस्म्मिन्न् क्षत्त्रेऽ-स्स्यामाशिष्ष्यस्स्याम् पुरोधायामस्म्मिन्न् कर्म्मण्ण्यस्स्यान् देवहूत्त्याँ स्वाहा ।
६५९. इन्द्रोज् ज्येष्ट्ठानामधिपतिः स माऽवतत्वस्म्मिन्न् ब्रह्मम्मण्ण्यस्म्मिन्न् क्षत्त्रेऽ-स्स्यामाशिष्ष्यस्स्याम् पुरोधायामस्म्मिन्न् कर्म्मण्ण्यस्स्यान् देवहूत्त्याँ स्वाहा ।
६६०. यमः पृथिब्ब्याऽ अधिपतिः स माऽवतत्वस्म्मिन्न् ब्रह्मम्मण्ण्यस्म्मिन्न् क्षत्त्रे-ऽस्स्यामाशिष्ष्यस्स्याम् पुरोधायामस्म्मिन्न् कर्म्मण्ण्यस्स्यान् देवहूत्त्याँ स्वाहा ।
६६१. बायुरन्तरिक्क्षस्स्याधिपतिः स माऽवतत्वस्म्मिन्न् ब्रह्मम्मण्ण्यस्म्मिन्न् क्षत्त्रेऽ-स्स्यामाशिष्ष्यस्स्याम् पुरोधायामस्म्मिन्न् कर्म्मण्ण्यस्स्यान् देवहूत्त्याँ स्वाहा ॥
६६२. सूर्य्यो दिवोऽधिपतिः स माऽवतत्वस्म्मिन्न् ब्रह्मम्मण्ण्यस्म्मिन्न् क्षत्त्रेऽ स्स्या-माशिष्ष्यस्स्याम् पुरोधायामस्म्मिन्न् कर्म्मण्ण्यस्स्यान् देवहूत्त्याँ स्वाहा ।
६६३. चन्द्रमा नक्क्षत्त्राणामधिपतिः स माऽवतत्वस्म्मिन्न् ब्रह्मम्मण्ण्यस्म्मिन्न् क्षत्त्रेऽ-स्स्यामाशिष्ष्यस्स्याम् पुरोधायामस्म्मिन्न् कर्म्मण्ण्यस्स्यान् देवहूत्त्याँ स्वाहा ।
६६४. बृहस्प्पतिर्ब् ब्रह्मम्मणोऽधिपतिः स माऽवतत्वस्म्मिन्न् ब्रह्मम्मण्ण्यस्म्मिन्न् क्षत्त्रेऽ स्स्यामाशिष्ष्यस्स्याम् पुरोधायामस्म्मिन्न् कर्म्मण्ण्यस्स्यान् देवहूत्त्याँ स्वाहा ।
६६५. मित्त्रः सत्त्यानामधिपतिः स माऽवतत्वस्म्मिन्न् ब्रह्मम्मण्ण्यस्म्मिन्न् क्षत्त्रेऽ स्स्यामाशिष्ष्यस्स्याम् पुरोधायामस्म्मिन्न् कर्म्मण्ण्यस्स्यान् देवहूत्त्याँ स्वाहा ।

६६६. बरुणोऽपामधिपतिः स माऽवतत्वसम्मिनन् ब्रह्ममण्ण्यसम्मिनन् क्षत्रेऽसस्या-
माशिष्ष्यसस्याम् पुरोधायामसम्मिनन् कर्म्मणण्यसस्यान् देवहूतत्याँ स्वाहा ।

६६७. समुद्द्रः स्रोतत्यानामधिपतिः स माऽवतत्वसम्मिनन् ब्रह्ममण्ण्यसम्मिनन् क्षत्रेऽ-
सस्यामाशिष्ष्यसस्याम् पुरोधायामसम्मिनन् कर्म्मणण्यसस्यान् देवहूतत्याँ स्वाहा ।

५६८. अन्नँसाम्म्राज्ज्यानामधिपति तन्नमाऽवतत्वसम्मिनन् ब्रह्ममण्ण्यसम्मिनन् क्षत्रेऽ-
सस्यामाशिष्ष्यसस्याम् पुरोधायामसम्मिनन् कर्म्मणण्यसस्यान् देवहूतत्याँ स्वाहा ।

६६९. सोम ऽओषधीनामधिपतिः स माऽवतत्वसम्मिनन् ब्रह्ममण्ण्यसम्मिनन् क्षत्रेऽसस्या-
माशिष्ष्यसस्याम् पुरोधायामसम्मिनन् कर्म्मणण्यसस्यान् देवहूतत्याँ स्वाहा ।

६७०. सविताप् प्रसवानामधिपतिः स माऽवतत्वसम्मिनन् ब्रह्ममण्ण्यसम्मिनन् क्षत्रेऽ-
सस्यामाशिष्ष्यसस्याम् पुरोधायामसम्मिनन् कर्म्मणण्यसस्यान् देवहूतत्याँ स्वाहा ।

६७१. रुद्द्रः पशूनामधिपतिः स माऽवतत्वसम्मिनन् ब्रह्ममण्ण्यसम्मिनन् क्षत्रेऽसस्या-
माशिष्ष्यसस्याम् पुरोधायामसम्मिनन् कर्म्मणण्यसस्यान् देवहूतत्याँ स्वाहा ।

६७२. त्वष्ट्टा रूपाणामधिपतिः स माऽवतत्वसम्मिनन् ब्रह्ममण्ण्यसम्मिनन् क्षत्रेऽसस्या-
माशिष्ष्यसस्याम् पुरोधायामसम्मिनन् कर्म्मणण्यसस्यान् देवहूतत्याँ स्वाहा ।

६७३. ब्रिष्णुः परब्बतानामधिपतिः स माऽवतत्वसम्मिनन् ब्रह्ममण्ण्यसम्मिनन् क्षत्रेऽ-
सस्यामाशिष्ष्यसस्याम् पुरोधायामसम्मिनन् कर्म्मणण्यसस्यान् देवहूतत्याँ स्वाहा ।

६७४. मरुतो गणानामधिपतयस्त् ते माऽवन्त्वसम्मिनन् ब्रह्ममण्ण्यसम्मिनन् क्षत्रेऽ-
सस्यामाशिष्ष्यसस्याम् पुरोधायामसम्मिनन् कर्म्मणण्यसस्यान् देवहूतत्याँ स्वाहा ।

६७५. पितरः पितामहाः परेऽवरे ततास्त् ततामहाऽ इह माऽवन्त्वसम्मिनन्
ब्रह्ममण्ण्यसम्मिनन् क्षत्रेऽसस्यामाशिष्ष्यसस्याम् पुरोधायामसम्मिनन्
कर्म्मणण्यसस्यान् देवहूतत्याँ स्वाहा ।

[विवाहे सर्वप्रायश्चित्तहोमान्तेऽवश्यङ् कर्तव्ये आज्यहोमे मन्त्राः (पार. १।५।११,१२)]

६७६. अग्ग्निरैतुप् प्रथमो देवतानाँ सोऽस्स्यै प्रजाम् मुञ्चतु मृत्त्युपाशात् ।
तदयँराजा बरुणोऽनुमन्न्यतायँ यथेयँ स्त्री पौत्त्रमघन् न रोदात् त्स्वाहा ॥

६७७. इमामग्ग्निस्त् त्रायताङ् गार्ह्हपत्त्यःप् प्रजामसस्यै नयतु दीर्ग्घमायुः ।
अशून्न्योपस्त्था जीवतामसत्तु माता पौत्त्रमानन्दमभिविवुद्ध्यतामियँ स्वाहा ॥

६७८. स्वस्त्ति नोऽ अग्ग्ने दिवऽ आ पृथिव्ब्या बिश्श्वानि धेह्ययथा यजत्त्र ।
यदसस्याम् महि दिवि जातम् प्रशस्ततन् तदसम्मासुद् द्रविणन् धेहि चित्त्रँ स्वाहा॥

६७९. सुगन् नु पन्थाम् प्रदिशन् नऽ एहिज् ज्योतिष्मद् ध्येह्ययजरन् नऽ आयुः ।
अपैतु मृत्त्युरमृतन् नऽ आगाद् वैवस्स्वतो नोऽ अभयङ् कृणोतुस् स्वाहा ॥

६८०. परम् मृत्त्योऽ अनु परेहि पन्थायँ यस्त् तेऽ अन्न्यऽ इतरो देवयानात् ।
चक्क्षुष्मते शृण्वते तेव् ब्रवीमि मा नःप् प्रजाँ रीरिषो मोत बीरान् स्वाहा ॥
मासं. ३५।७ ॥

[विवाहे आज्याहुतिपञ्चकान्ते कुमार्या कर्तव्ये शमीपलाशमिश्श्रलाजहोमे
कुमार्या प्रयोज्या मन्त्राः (पार. १।६।१-२)]

६८१. अर्य्यमणन् देवङ् कन्न्याऽ अग्ग्निमयक्क्षत ।
स नोऽ अर्य्यमा देवःप् प्रेतो मुञ्चतु मा पतेः स्वाहा ॥

६८२. इयन् नार्य्युपब्ब्रूते लाजानावपन्तिका ।
आयुष्मानसत्तु मे पतिरेधन्ताञ् ज्ञातयो ममस् स्वाहा ॥

६८३. इमाल्ँ लाजानावपाम्म्यग्ग्ँनौ समृद्धिकरणन् तव ।
मम तुब्भ्य च सव्ँवननन् तदग्ग्ँनिरनुमन्न्यतामियꣳ स्वाहा ॥

[विवाहे कुमार्याः साङ्गुष्ठदक्षिणहस्तस्य ग्रहणे वरेण प्रयोज्ज्या मन्त्राः (पार. १।६।३)]

६८४. गृब्भ्ँणामि ते सौभगत्त्वाय हस्त्तम् मया पत्त्या जरदष्ट्टिर्य्यथासः ।
भगोऽर्य्यमा सविता पुरन्धिर्म् मह्य्यन् त्वाऽदुर्ग् गार्हपत्त्याय देवाः॥

६८५. अमोऽहमस्म्मि सात् त्वꣳ सात् त्वमस्स्यमोऽहम् ।
सामाऽहमस्म्मि ऋक्क् त्वन् द्यौरहम् पृथिवीत् त्वम् ॥

६८६. तावेहि बिवहावहै सह रेतो दधावहै ।
प्रजाम् प्रजनयावहै पुत्त्रान् न्विन्द्यावहै बहून् ।
ते सन्तु जरदष्ट्टयः ॥

६८७. सम्प्रियौ रोचिष्ण्णू सुमनस्स्यमानौ ।
पश्श्येम शरदः शतञ् जीवेम शरदः श्रतꣳ शृणुयाम शरदः शतम् ॥

[विवाहे कुमार्या दक्षिणपादेन अश्मनि आरोहणे कर्तव्ये वरेण पठनीयो मन्त्रः (पार. १।७।१)]

६८८. आरोहेममश्म्मानमश्म्मेवत् त्वꣳ स्थिरा भव ।
अभितिष्ट्ठ पृतन्न्यतोऽवबाधस्स्व पृतनायतः ॥

[कुमार्यामश्मन्यारूढायाव्ँ वरेण गेया गाथा (पार. १।७।२)]

६८९. सरस्स्वतिप् प्रेदमव सुभगे बाजिनीवति ।
यान् त्वा बिश्श्वस्स्य भूतस्स्यप् प्रजायामस्स्याग्ग्रतः ॥
यस्स्याम् भूतꣳ समभवद् यस्स्याव्ँ विश्श्वमिदञ् जगत् ।
तामद्द्य गाथाङ् गास्स्यामि यास्त् त्रीणामुत्तमय्ँ यशः ॥

[कुमारीवरयोरग्निम् परितः क्रमणे वरेण पठनीयो मन्त्रः (पार. १।७।३)]

६९०. तुब्भ्यमग्ग्रे पर्य्यवहन् त्सूर्य्याव्ँ वहतुना सह ।
पुनः पतिब्भ्यो जायान् दाऽग्ग्ँनेप् प्रजया सह॥

[त्रिःपरिक्क्रमणे कृतेऽवशिष्टानां सर्वेषां शमीपलाशमिश्रलाजानाङ् कुमार्या भ्रात्रा शूर्पकुष्ठया कुमार्यञ्जलावावपने कृते तेषां हवने कुमार्या प्रयोज्ज्यो मन्त्रः (पार. १।७।५)]

६९१. भगायस् स्वाहा ।

[(पुनस्तूष्णीन् त्रिः परिक्क्रमणे कृते) प्राजापत्यहोमं स्विष्टकृद्धोमञ् च विधाय संस्रवम् प्राश्श्य ब्रह्म्मणे दक्षिणात्र् च दत्त्वा कुमार्या उदीच्च्याः सप्तानाम् पदानाम् प्रक्क्रामणे कुमार्याः प्रेषणे वरेण प्रयोज्ज्यो मन्त्रः(पार. १।८।१)]

६९२. सप्त पदानि प्रक्क्रमस्स्व ।

[कुमार्या सप्तानाम् पदानाम् प्रक्क्रामणे वरेण पठनीया मन्त्राः (पार. १।८।१,२)]

६९३. एकमिषे बिष्ण्णुस्त् त्वा नयतु ।
६९४. द्वेऽ ऊर्ज्जे बिष्ण्णुस्त् त्वा नयतु ।
६९५. त्रीणि रायस्प्पोषाय बिष्ण्णुस्त् त्वा नयतु ।
६९६. चत्त्वारि मायोभवाय बिष्ण्णुस्त् त्वा नयतु ।

६९७. पञ्च पशुब्भ्यो बिष्णुस्त् त्वा नयतु ।
६९८. षड्तुब्भ्यो बिष्णुस्त् त्वा नयतु ।
६९९. सखे सप्प्तपदा भव सा मामनुब्ब्रता भव बिष्णुस्त् त्वा नयतु ।

[निपक्रमणप्प्रभृति उदकुम्भं स्कन्धे कृत्वा अग्नेर् दक्क्षिणतो वाचयँयमतया स्थितस्स्य ब्राह्म्मणस्स्य स्कन्धे स्थितादुदकुम्भादप आदाय वरेण कुमार्याः मूर्धनि कर्तव्व्ये अभिषेके वरेण प्रयोज्ज्या मन्त्राः (पार. १।८।५,६)]

७००. आपः शिवाः शिवतमाः शान्ताः शान्ततमास्त् तास्त् ते कृण्ण्वन्तु भेषजम् ।
७०१. आपो हिष्ट्ठा मयोभुवस्त् ता नऽ ऊर्ज्जे दधातन ।
महे रणाय चक्क्षसे ॥ मासं. ११।५०, ३६।१४॥
७०२. यो वः शिवतमो रसस्त् तस्स्य भाजयतेह नः ।
उशतीरिव मातरः ॥ मासं. ११।५१, ३६।१५॥
७०३. तस्म्माऽ अरङ् गमाम वो यस्स्यक् क्षयाय जिन्न्वथ ।
आपो जनयथा च नः ॥ मासं. ११।५२, ३६।१६॥

[सूर्यस्स्योदीक्क्षणे कुमार्याः प्रेषणे वरेण प्रयोज्ज्यो मन्त्रः (पार. १।८।७)]

७०४. सूर्यमुदीक्क्षस्स्व ।

[सूर्यस्स्योदीक्षणे वरेण वाचितया स्वतन्त्रया वा कुमार्या प्रयोज्ज्यो मन्त्रः (पार. १।८।७)]

७०५. तच् चक्क्षुर्द् देवहितम् पुरस्त्ताच् छुक्क्रमुच्चरत् । पश्श्येम शरदः शतञ् जीवेम शरदः शतँ शृणुयाम शरदः शतम् प्रब्ब्रवाम शरदः शतमदीनाः स्याम शरदः शतम् भूयश्च् च शरदः शतात् ॥ मासं. ३६।२४॥

[कुमार्या दक्षिणांसमधि दक्षिणहस्तन् नीत्त्वा कुमार्या हृदयस्स्यालम्भने वरेण प्रयोज्ज्यो मन्त्रः (पार. १।८।८)]

७०६. ममब् ब्रते ते हृदयन् दधामि मम चित्तमनु चित्तन् तेऽ अस्तु ।
मम बाचमेकमना जुषस्स्वप् प्रजापतिष्ट्वा नियुनक्क्तु मह्यम् ॥

[वद्ध्वा अभिमन्त्रणे वरेण प्रयोज्ज्यो मन्त्रः (पार. १।८।९)]

७०७. सुमङ्गलीरियवँ वधूरिमाँ समेत पश्श्यत ।
सौभाग्ग्यमस्स्यै दत्त्वायाऽथाऽस्तवँ विपरेतन ॥

[वहिश्शालायाः प्रागुदग् वा अनुगुप्ते आगारे विवाहाग्निन् नीत्त्वा तस्स्य पश्चिमतो रोहितमानडुहम् प्राग्ग्रीवमुत्तरलोम चर्म आस्तीर्य वधूमुत्क्षिप्य्य नीत्त्वा तत्र तस्स्या उपवेशने उपवेशयित्त्रा केन चन आप्तेन त्रैवर्णिकेन दृढपुरुषेण (अन्यस्स्याऽभावे वरेणैव वा) प्रयोज्ज्यो मन्त्रः (पार. १।८।१०)]

७०८. इह गावो निषीदन्त्विहाश्श्वाऽ इह पूरुषाः ।
इहो सहस्स्रदक्क्षिणो यज्ज्ञऽ इह पूषा निषीदतु ॥

[वद्ध्वै मन्त्रे उपदिष्टे, आचार्याय वरे दत्ते, अस्तमिते सूर्ये ध्रुवस्स्य दर्शने वद्ध्वाः प्रेषणे वरेण प्रयोज्ज्यो मन्त्रः]

७०९. ध्रुवम् पश्श्य ।

[वद्ध्वा ध्रुवस्स्य दर्शने वरेण प्रयोज्ज्यो मन्त्रः (पार. १।८।१९)]

७१०. ध्रुवमसिद्द्ध्रुवन् त्वा पश्श्यामिद् ध्रुवैधि पोष्ष्ये मयि ।
महय्यन् त्वाऽदाद्द् बृहस्प्पतिर्म् मया पत्त्याप् प्रजावती
सञ्जीव शरदः शतम् ॥

[ध्रुवदर्शनप्रश्ने वरेण प्रयोज्ज्यो मन्त्रः]

७११. ध्रुवम् पश्श्यसि ?

[ध्रुवदर्शनप्रश्नोत्तरे वध्वा ध्रुवेऽदृष्टेऽपि प्रयोज्ज्यो मन्त्रः (पार. १।८।२०)]

७१२. पश्श्यामि ।

(अस्तमितानुदितयोस् सायम्प्रातर् अग्निपरिचरणे मन्त्राः)

[त्रिरात्रवँ विवाहाग्नेरौपासनाग्निरूपेण सायम्प्रातःपरिचरणे सायम् प्रयोज्ज्यौ मन्त्रौ (पार. १।९।३)]

७१३. अग्ग्नँयेस् स्वाहा । ७१४. प्रजापतयेस् स्वाहा ।

[त्रिरात्रवँ विवाहाग्नेरौपासनाग्निरूपेण सायम्प्रातःपरिचरणे प्रातः प्रयोज्ज्यौ मन्त्रौ (पार. १।९।४)]

७१५. सूर्य्यायस् स्वाहा । ७१६. प्रजापतयेस् स्वाहा ।

[विवाहाग्नेरौपासनाग्निरूपेण सायम्प्रातःपरिचरणे वध्वां शीग्घ्रङ् गर्भन् धारयितुमिच्छन्त्यां सत्त्यान् तयैव हवनीयायाम् पूर्वस्स्यामाहुत्त्याम् "अग्ग्नँयेस् स्वाहा" "सूर्य्यायस् स्वाहा" इत्त्यनयोर् मन्त्रयोस् स्थाने प्रयोज्ज्यो मन्त्रः (पार. १।९।५)]

७१७. पुमाँसौ मित्त्रावरुणौ पुमाँसावश्श्विनावुभौ ।
पुमानिन्द्रश्च् च सूर्य्यश्च् च पुमाँसवँ वर्त्तताम् मयि पुनःस्वाहा॥

(चतुर्थीकर्ममन्त्राः [पार. १।११।१-१०])

[विवाहाग्निवँ वरगृहाब्भ्यन्तरत उपसमाधाय उत्तरत उदपात्त्रम् प्रतिष्ठाप्प्य स्थालीपाकं श्रपयित्त्वा आघार्य आज्ज्यभागाविष्ट्वा आज्ज्याहुतीनां होमे वरेण प्रयोज्ज्या मन्त्राः (पार. १।११।१,२)]

७१८. अग्ग्नँेप् प्रायश्च्चित्तेत् त्वन् देवानाम् प्रायश्च्चित्तिरसिब्
ब्राह्म्मणस्त् त्वा नाथकामऽ उपधावामि य्याऽस्स्यै पतिग्घ्नँी तनूस्त्
तामस्स्यै नाशयस् स्वाहा ।

७१९. वायोप् प्रायश्च्चित्तेत् त्वन् देवानाम् प्रायश्च्चित्तिरसिब्
ब्राह्म्मणस्त् त्वा नाथकामऽ उपधावामि य्याऽस्स्यैप् प्रजाग्घ्नँी तनूस्त्
तामस्स्यै नाशयस् स्वाहा ।

७२०. सूर्य्यप् प्रायश्च्चित्तेत् त्वन् देवानाम् प्रायश्च्चित्तिरसिब्
ब्राह्म्मणस्त् त्वा नाथकामऽ उपधावामि य्याऽस्स्यै पशुग्घ्नँी तनूस्त्
तामस्स्यै नाशयस् स्वाहा ।

७२१. चन्द्रप् प्रायश्च्चित्तेत् त्वन् देवानाम् प्रायश्च्चित्तिरसिब्
ब्राह्म्मणस्त् त्वा नाथकामऽ उपधावामि य्याऽस्स्यै गृहग्घ्नँी तनूस्त्
तामस्स्यै नाशयस् स्वाहा ।

७२२. गन्धर्ब्बप् प्रायश्च्चित्तेत् त्वन् देवानाम् प्रायश्च्चित्तिरसिब्
ब्राह्म्मणस्त् त्वा नाथकामऽ उपधावामि य्याऽस्स्यै यशोग्घ्नँी तनूस्त्
तामस्स्यै नाशयस् स्वाहा ।

[स्थालीपाकहोमे वरेण प्रयोज्ज्यो मन्त्रः (पार. १।११।३)]

७२३. प्रजापतयेस् स्वाहा ।

[स्विष्टकृद्धोमादि प्राजापत्त्यहोमान्तङ् कृत्त्वा साधारणसंस्रवप्प्राशनञ् च कृत्त्वा ब्रह्म्मणे दक्क्षिण्णाञ् च दत्त्वा आहुतिषट्कसंस्रवयुतोदपात्त्रादपो गृहीत्त्वा ताभिर् वद्ध्वा अभिषेचने वरेण प्रयोज्ज्यो मन्त्रः (पार. १।११।४)]

७२४. या ते पतिग्घ्नीप् प्रजाग्घ्नी पशुग्घ्नी गृहग्घ्नी यशोग्घ्नी
निन्दिता तनूर्ज् जारग्घ्नीन् तत ऽएनाङ् करोमि
सा जीर्य्यत् त्वम् मया सह (अमुकि देवि) ।

[वद्ध्वा स्थालीपाकप्प्राशने वरेण प्रयोज्ज्यो मन्त्रः (पार. १।११।५)]

७२५. प्राणैस्त् तेप् प्राणान् त्सन्दधाम्म्यस्त्थिभिरस्त्थीनि
माꣳसैर्म् माꣳसानित् त्वचात् त्वचम् ॥

(शवनिर्हरणाद्यग्निसंस्कारमन्त्राः [पार. ३।१०।९])

[अग्निसंस्कारार्हस्स्य द्विजातिशवस्स्य शकटादिना वाहने गेया लौकिकी यमगाथा]

७२६. अहरहर्न् नयमानो गामश्श्वम् पुरुषञ् जगत् ।
वैवस्स्वतो न तृप्प्यति सुराया इव दुर्म्मदी ॥

[अग्निसंस्कारार्हद्विजातिशवस्स्य शकटादिना वाहने जपनीया यमसूक्तमन्त्राः (पार. ३।१०।९)]

७२७. अपेतो यन्तु पणयो सुम्म्ना देवपीयवः । अस्स्य लोकः सुतावतः ।
द्युभिरहोभिरक्क्तुभिर्व् व्यक्क्तयँ यमो ददात्त्ववसानमस्म्मै[1] ॥ ३५।१॥

७२८. सविता ते शरीरेव्भ्यः पृथिव्व्यालँ लोकमिच्छतु ।
तस्म्मै युज्ज्यन्तामुस्स्रियाः ॥ मासं. ३५।२॥

७२९. वायुः पुनातु सविता पुनात्त्वग्गँनेर्व् भ्राजसा सूर्य्यस्स्य वर्च्चसा ।
विमुच्च्यन्तामुस्स्रियाः ॥ मासं. ३५।३॥

७३०. अश्श्वत्थे वो निषदनम् पर्ण्णे वो वसतिष् कृता ।
गोभाज ऽइतत् किलाऽसथ यत् त्सनवथ पूरुषम् ॥ मासं. ३५।४॥

७३१. सविता ते शरीराणि मातुरुपस्त्थ ऽआवपतु ।
तस्म्मै पृथिवि शम् भव ॥ मासं. ३५।५॥

७३२. प्रजापतौत् त्वा देवतायामुपोदके लोके निदधामि
(अमुकशर्म्मन् [अमुकि देवि])। अप नः शोशुचदघम् ॥ मासं ३५।६॥

---

१. यद्यपि "इत्त्येवम् पञ्चभिः पिण्डैः शवस्स्याहुतियोग्ग्यता । अन्न्यथा चोपघाताय पूर्वोक्तास् ते भवन्ति हि" (गरुडपुराणे खेमराजश्रीकृष्णदासमुद्द्रापिते प्रेतखण्डे धर्मकाण्डापरनामके १५।३९, पृ. १८३-१) इत्त्यादिकङ् गरुडपुराणादिवचनन् तदनुगामि धर्मशास्त्रनिवन्धकारादिवचनजातञ् च दृश्श्यते, तथापि अपेतो यन्तु पणय इत्त्यादिमन्त्रजपेनैव ते सर्वेऽप्प्युपघातका अपसरन्ति शवस् सर्वथाऽग्निसंस्कारयोग्ग्यो भवतीति विज्ज्ञायते, मन्त्रार्थस्स्वरसात् स्वशाखाश्रुतिसूत्त्रादिषु तेषाम् पिण्डानावँ विधानस्स्याऽभावाच् च । हरिहरभाष्य्यपद्धतावपि एतेषाम् पिण्डानामुल्लेखो नास्ति; विश्श्वनाथगदाधराद्द्युक्तञ्चोत्सूत्त्रत्त्वादश्रद्धेयम्, यो ह्य्युत्सूत्त्रङ् कथयेन् नादो गृह्य्येतेति न्न्यायादिति च बोद्ध्यम् ।

७३३. परम् मृत्त्योऽ अनुपरेहि पन्थायँ यस्त् तेऽ अन्न्यऽ इतरो देवयानात् ।
चक्क्षुष्मते शृण्वते तेव् ब्रवीमि मा नः प्रजाᳫं रीरिषो मोत बीरान् ॥३५।७॥
७३४. शवँ वातः शᳫं हि ते घृणिः शन् ते भवन्त्विष्टकाः ।
शन् ते भवन्त्वग्ग्नयः पार्त्थिवासो मात् त्वाभिशूशुचन् ॥ ३५।८॥
७३५. कल्प्पन्तान् ते दिशस्त् तुब्भ्यमापः शिवतमास्त् तुब्भ्यम् भवन्तु सिन्धवः ।
अन्तरिक्क्षᳫं शिवन् तुब्भ्यङ् कल्प्पन्तान् ते दिशः सर्ब्बाः ॥३५।९॥
७३६. अश्म्मन्न्वतीरीयते सᳫंरभद्ध्वमुत्तिष्ट्ठतप् प्रतरता सखायः ।
अत्त्रा जहीमोऽशिवा येऽ असञ्छिवान् न्वयमुत्तरेमाऽभि वाजान्[१] ॥

इत्यचिन्त्यापरिमितमायाशक्तिकपरमात्मलीलामयेच्छासृष्टानन्तकोटिब्रह्म्माण्डैकतमब्रह्म्माण्डोदरवर्तिचतुर्दशभुवनाभोगमद्ध्यस्स्थभूर्लोककुक्षिगतजम्बूद्वीपघटकभारतवर्षस्थकुमारिकाखण्डोत्तरभागस्थितहिमवत्खण्डस्स्थनेपालदेशमद्ध्यवर्तिगण्डकीप्रदेशान्तर्गतत्रितुङ्गाचलाङ्कितजनपदान्तःपातिताम्रकूटग्ग्रामाभिजनेन काष्ठमण्डपनगरान्तर्गतराजमातृपत्तनटोल्लकान्तर्वर्तिसरस्स्वतीमार्गस्स्थस्वाद्ध्यायशालावास्तव्येन गुरुमुखोच्चारणानूच्चारणरूपादध्ययनगृहीतस्वशाखामन्त्रब्राह्म्मणकल्पसूत्रेण श्रुतिस्मृतिपुराणादिपारायणपरायणेन नैपालीयभाषाऽऽदिकविभानुभक्ताचार्यप्रविख्यापिते कान्यकुब्जोच्चकुलीनविद्याधुरीणब्राह्म्मणश्रीकृष्णाचार्यवंशे जातेन सूर्योपाद्ध्यायात् पञ्चदशेन नारनाथिना गाङ्गेयेन वासिष्ठ-मैत्रावरुण-कौण्डिन्येति-त्रिप्प्रवरेण कौण्डिन्न्यायनेनाऽऽचार्येण शिवराजशर्मणा द्विजोत्तमेन सङ्गृहीते माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिनिरग्निकद्विजसदाचारकर्म-संस्कारकर्म-श्राद्धकर्मादिवैदिकमन्त्रसङ्ग्रहे द्वितीयं संस्कारकाण्डं सम्पूर्णम् ॥२॥

अथ श्राद्धकाण्डम्

(उदककर्ममन्त्राः [पार. ३।१०।१३-२२)]

[शवस्स्य अग्निसंस्कारे कृते ज्ञातीनामुदकयाचने मन्त्रः (पार. ३।१०।१३)]

७३७. उदकङ् करिष्ष्यामहे ।

[कस्स्य चित् सम्बन्धिनः श्यालकस्स्य वा अशतवर्षे प्रेते
उदककरणानुऽज्ञाप्रदाने मन्त्रः (पार. ३।१०।१४)]

७३८. कुरुद्ध्वम् मा चैवम् पुनः ।

---

१. वैतानिकस्स्य श्रौताग्निसन्तापजाग्निभिरादीपितैः, शालाग्निमतः शालाग्निना दक्षिणतः स्थापयित्त्वाऽऽदीपितेन चितायामरोपिते शवे स्पृष्टे (न तु अर्धदग्धे) आज्ज्याहुतेर् हवनं अग्निसंस्कारकर्त्रा पुत्रेण भ्रात्राऽन्येव वा ब्राह्म्मणेन प्रयोज्ज्यो मन्त्रः (पार. ३।१०।१०,११; काश्रौ. २५।७।३८) "अस्म्मात् त्वमधिजातोऽसित् त्वदयञ् जायताम् पुनः । (अमुकशर्म्माऽमुकगोत्त्रः) स्वर्ग्गाय लोकायस् स्वाहा" (मासं. ३५।२२) इत्त्यस्ति; श्रौताग्निशालाग्न्युभयहीनस्स्य तु "तूष्ण्णीङ् ग्रामाग्ग्नेर्निनेतरम्" (पार. ३।१०।१२) इति पारस्करवचनादुक्तमन्त्रस्स्य प्रयोगवं विनैवाऽऽज्ज्याहुतिहोमेन दाहः कर्तव्यः । अतो निरग्निके उक्तमन्त्रप्रयोगस् स्वशाखाश्रुतिसूत्राद्ध्ययनविधुरैः प्रदर्शितः पण्डितम्मन्यैरपि गतानुगतिकतयाऽनुस्स्रियमाणस् स्वशाखाविरुद्धो माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिभिर् हेयः ।

[तस्यैव शतवर्षे प्रेते उदककरणानुज्ञाप्रदाने मन्त्रः (पार. ३।१०।१५)]

७३९. कुरुद्ध्वम् ।

[निमज्जनात् पूर्वं सव्यहस्तानामिकया जलस्यापनोदने
ज्ञातिभिः प्रयोज्यो मन्त्रः (पार. ३।१०।१९)]

७४०. अप॑ नः॒ शोशु॑चद॒घम् ॥ मासं. ३५।६॥

[निमज्जनोत्तरम् अञ्जलिना प्रेतायोदकस्य सकृत् प्रसेचने मन्त्रः (पार. ३।१०।२१)]

७४१. अस्म्मत्पितः अमुकशर्म्मन् अमुकगोत्रप् प्रेत एतत् त उदकम्[१] ।

[निमज्जनादुत्तीर्णानां शुचौ शाड्वलवति देशे उपविष्टानाम् प्रेतज्ञातीनां शोकस्याऽपनोदने
(पार. ३।१०।२२) वृद्धेन सम्वन्धिना गुरुणा पुरोहितेन वा
प्रयोज्ज्या इतिहासपुराणादिश्लोकाः]

७४२.

वर्षयं यन् मानुपाणां स दिव्व्याहोरात्र उच्च्यते । तत्त्रिंशता दिव्व्यमासस् तैर् हि द्वादशसङ्ख्यकैः ॥
दिव्व्यवं वर्ष स्मृतम् प्राज्ञैस् तैर् द्वादशसहस्रकैः । दिव्व्ययं युगं सैव चतुर्युगी प्रोक्ता नृणामिह ॥
मितम् मानुपवर्षाणात्र् चतुर्भिर् लक्षकैस् तथा । द्वात्रिंशता सहस्रैश् च वुधैः कलियुगं स्मृतम् ॥
द्विगुणन् द्वापरयुगङ् कलेस् त्रेतायुगम् पुनः । त्रिगुणं स्यात् सत्त्ययुगत्र् चतुर्गुणमिति स्स्थितिः ॥
चतुर्युग्ग्येकसप्तत्त्या सन्ध्यांशयुतया पुनः । मन्वन्तरम् प्रकथितम् पुराणागमवेदिभिः ॥
मन्वन्तरैस् तादृशैश् च चतुर्दशभिरुच्च्यते । व्राह्म्मन् दिनन् दिव्व्ययुगसहस्रात्मकमेव तत् ॥
चतुर्भिरर्वुदैर् द्वात्रिंशता कोटिभिरेव च । युक्तो मानुषवर्षाणाङ् कालोऽयङ् कल्पसञ्ज्ञकः ॥
तावत्कालां निशा चेति व्राह्म्मोऽहोरात्र ईदृशः । तैस् त्रिंशता व्राह्म्ममासस् तैश्च द्वादशसङ्ख्यकैः ॥
व्राह्म्मवर्षन् तादृशैश्च वर्षैः शतमितैः पुनः । आयुस् स्याद् ब्रह्म्मणस् तच्च स्यात् परव्व्रह्म्मणो दिनम्॥
स तत्वाक्ख्यातो महाकल्पस् तावत्त्येव निशाऽस्य च । एवम् प्राज्ञैःपरव्व्रह्म्माहोरात्रश्च प्प्रकल्पितः ॥
गतानामागामिनात्र् च तेपाल्ँ लोके न सङ्ख्यया । परिच्छेदोऽस्ति कालस्याऽनाद्यनन्ततया खलु ॥
एवमस्मिन् निरालम्वे काले सन्ततयायिनि । न तत् किञ्चिद् दृश्यतेऽत्र स्थितिर् यस्स्य भवेद् ध्रुवा ॥
गङ्गायास् सिकता धारास् तथा वर्षति वासवे । शक्क्या गणयितुल्ँ लोके न व्व्यतीताः पितामहाः ॥
चतुर्दश विनश्श्यन्ति कल्पेकल्पे सुरेश्श्वराः । सर्वलोकप्प्रधानाश् च मनवश् च चतुर्दश ॥
वहूनीन्द्रसहस्राणि दैत्त्येन्द्रनियुतानि च । विनष्टानीह कालेन मनुष्ष्याणान् तु का कथा ॥
राजर्षयश्च वहवस् सर्वे समुदिता गुणैः । देवर्षयश्च कालेन सर्वे ते निधनङ् गताः ॥
ये समर्था जगत्त्राणे सृष्टिसंहारकारिणः । तेऽपि कालेन नीयन्ते कालो हि बलवत्तरः ॥
आक्क्रम्म्य सर्वः कालेन परलोकाय नीयते । कर्मपत्थ्योदनो जन्तुस् तत्र का परिदेवना ॥
जातस्स्य हि ध्रुवो मृत्त्युर् ध्रुवत्र् जन्म मृतस्स्य च । अर्थे दुष्परिहार्येऽस्मिन् नास्ति शोकसहायता ॥
न कालस्स्य प्रियः कश्चिदप्प्रियो वाऽपि विद्यते । आयुष्ष्ये कर्मणि क्क्षीणे प्रसह्य्य हरते जनम् ॥
नाऽप्राप्तकालो म्रियते विद्धश् शरशतैरपि । कुशाग्ग्रेणाऽपि संस्पृष्टः प्राप्तकालो न जीवति ॥
दृश्श्यते हि युवैवेह विनश्श्यन् वसुमान् नरः । दरिद्रश्च परिक्क्लिष्टश् शतवर्षो जरान्वितः ॥
आयुर्वेदमधीयानास् सुसमृद्धपरिच्छदाः । दृश्श्यन्ते वहवो वैद्या व्याधिभिस् समभिप्प्लुताः ॥

---

१. "ततः प्रेतमुद्दिश्श्यामुकसगोत्त्रामुकशर्मन् प्रेत एतत्ते उदकमित्त्युच्चार्य एकैकमञ्जलिं सकृद् भूमौ प्रक्षिपन्ति" इति हरिहरभाष्ये "ततः प्रेतमुद्दिश्यैकैकमञ्जलिं सकृद् भूमौ प्रक्षिपन्ति अमुकसगोत्त्रामुकशर्मन् प्रेत एतत् ते उदकमित्त्यनेन मन्त्रेण" इति गदाधरः काश्राकसू.क.४, पृ. ४८९; "प्रेताय सतिलाञ्जलिन् दद्युः–ॐ अद्यामुकगोत्र पितरमुकप्रेत एष तिलतोयाञ्जलिस्ते मया दीयते तवोपतिष्ठताम् इति वाक्येन" इति रुद्रधरः श्राद्धविवेके, पृ ६५; एवमेव श्राद्धसङ्ग्रहे वायुनन्दनमिश्रोऽपि पृ १७-१८; किन्तु ते परीक्ष्यैव स्वशाखाश्रुतिसूत्राद्यनुकूलत्त्वे एवाऽनुसरणीया नाऽन्यथेति ज्ञेयम् । एतद् वाक्क्यन् निदर्शनरूपम् । उदकदातृप्रेतसम्बन्धानुसारवँ वाक्क्यम् प्रयोक्तव्व्यम् ।

तं पिबन्तः कषायाँश् च सर्पींषि विविधानि च । न मृत्युमतिवर्तन्ते वेलामिव महोदधिः ॥
रसायनविदश्चैव सुप्रयुक्तरसायनाः । दृश्यन्ते जरया भग्ना नागा नागैरिवोत्तमैः ॥
तथैव तपसोपेतास् स्वाद्ध्यायाव्भ्यसने रताः । दातारो यज्ञशीलाश्च न तरन्ति जरान्तकौ ॥
सोऽयवं विपुलमद्ध्वानङ् कालेन द्ध्रुवमद्ध्रुवः । नरोऽवशस् समब्ध्येति सर्वभूतनिषेवितम् ॥
देहो वा जीवतोऽब्ध्येति जीवो वाऽब्ध्येति देहतः । पथि सङ्गममब्ध्येति दारैरन्यैश्च बन्धुभिः ॥
नायमत्त्यन्तसवँवासो लब्ध्यते जातु केन चित् । अपि स्स्वेन शरीरेण किमुताऽन्येन केन चित ॥
नौषधानि न मन्त्राश् च न होमा न पुनर्जपाः । त्रायन्ते मृत्त्युनोपेतञ् जरया वाऽपि मानवम्॥
जातानां सर्वभूतानान् न ह्यहानि न च क्षपाः । निवर्तन्ते न पक्षाश्च न मासा न च वत्सराः ॥
पञ्चाशता कोटिभिश्च योजनानाम् मितवँ विदुः । विस्तारे चोच्छ्रये चाऽपि भुवनानान् तु मण्डलम् ॥
तत् पृथुत्त्वे योजनानाङ् कोट्चा प्रमितया पुनः । वेष्टितं सूक्ष्मया पृत्थ्व्या समावरणरूपया ॥
पृथुत्त्वे योजनानान् तु दशभिः कोटिभिर् मिताः । सूक्ष्मा आपस् तदखिलं स्थिता आवेष्ट्च सर्वतः ॥
ततस् तेजस् ततो वायुस् तत आकाश एव च । ततोऽहङ्कारश् च ततो महाँश् चैव यथोत्तरम् ॥
क्रमाद् दशगुणाः पूर्वम्पूर्वमावेष्टच संस्थिताः । स्थितमावेष्ट्च तत् सर्वमव्यक्तं हि अनन्तकम् ॥
एववँविधं हि ब्रह्म्माण्डरूपम् पौराणिका विदुः । ब्रह्म्माण्डानामीदृशानामनन्ताः कोटयः स्मृताः ॥
अनन्तकोटिसङ्ख्येषु ब्रह्म्माण्डेषु च सर्वतः । स्थितेषु देशतोऽप्यस्ति नेयत्ताऽत्र कुतोऽपि च ॥
दृष्ट्वैवाऽनन्तमाकाशञ् ज्योतिश्चक्क्रेण मण्डितम् । बोद्धुं शक्क्यं हि सर्वेणाऽऽनन्त्यं सर्गस्स्य सर्वतः ॥
तत्र कृक्षुद्द्रातिक्षुद्द्रस्स्य देहस्स्य तु नृणामिह । सर्गेऽस्मिन् गणना कैव विवेक उदिते सति ॥
मानुष्ये कदलीस्तम्भनिस्सारे सारमार्गणम् । करोति यस् स सम्मूढो जलबुद्बुदसन्निभे ॥
पञ्चधा सम्भृतः कायो यदि पञ्चत्त्वमागतः । कर्मभिस् स्वशरीरोत्थैस् तत्र का परिदेवना ॥
गन्त्री वसुमती नाशमुदधिर् दैवतानि च । फेनप्रक्ख्यः कथन् नाशम् मर्त्यलोको न यास्स्यति ॥
दुर्बलम् बलवन्तञ् च भीरुं शूरञ् जडङ् कविम् । अप्राप्तसर्वकामार्थम् मृत्त्युरादाय गच्छति ॥
पितृमातृसुतब्भ्रातृबन्धुदारादिसङ्गमः । प्रपायामिव जन्तूनान् नद्द्याङ् काष्ठौघवच् चलः ॥
अनित्त्ययँ यौवनं रूपञ् जीवितन् द्रव्यसञ्चयः । आरोग्यम् प्रियसवँवासो गृद्ध्येत् तत्र न पण्डितः ॥
क्व गताः पृथिवीपालास् सबन्धुबलवाहनाः । वियोगसाक्षिणी येषाम् भूमिरद्द्यापि तिष्ठति ॥
सर्वे क्षयान्ता निचयाः पतनान्तास् समुच्छ्रयाः । सयँयोगा विप्रयोगान्ता मरणान्तं हि जीवितम् ॥
श्लेष्माश्रु बान्धवैर् मुक्तम् प्रेतो भुङ्क्ते यतोऽवशः । अतो न रोदितव्व्यं हि क्रिया कार्या स्वशक्तितः ॥
प्रेतस्स्य श्राद्धकर्तुश्च पृथक् श्राद्धे कृते शुभम् । तस्माच् छ्राद्धं सदा कार्यं शोकन् त्यक्त्वा निरर्थकम् ॥
एतावदेव कर्तव्यं सदा प्रेतस्स्य बन्धुभिः । नोपकुर्यान् नरः शोचन् प्रेतस्स्यात्मन एव च ॥
पश्श्यन्नपि प्प्रस्खलति शृण्वन्नपि न बुद्ध्यते । पठन्नपि न जानाति देवमायाविमोहितः ॥
जातानापद्गतानार्तान् दृष्ट्वाऽपि व्यथितान् मृतान् । गाढमोहसुराग्रस्तो लोकश् चेतयते न च ॥
यावतः कुरुते जन्तुस् सम्बन्धान् मनसः प्रियान् । तावन्तोऽस्स्य निखन्यन्ते हृदये शोकशङ्कवः ॥
दृष्ट्वा लोकमनानन्दम् म्रियमाणाँश् च बान्धवान् । धर्ममेकं सहायार्थे चरयद्ध्वं सदा नराः ॥
मृतोऽपि बान्धवः शक्तो नाऽनुगन्तुम् मृतन् नरम् । जायावर्जं हि सर्वस्स्य याम्म्यः पन्था विभिद्द्यते ॥
धर्म एकोऽनुयात्त्येनयँ यत्रक्क्वचनगामिनम् । ततोऽसारे त्रिलोकेऽस्मिन् धर्मङ् कुरुत मा चिरम् ॥
श्वः कार्यमद्द्य कुर्वीत पूर्वाह्ण्णे चाऽऽपराह्ण्णिकम् । नहि प्प्रतीक्षते मृत्त्युः कृतमस्स्य न वा कृतम् ॥
क्षेत्त्रापणगृहासक्तमन्यत्त्रगतमानसम् । वृकीवोरणमासाद्द्य मृत्त्युरादाय गच्छति ॥
मा शोकङ् कुरुताऽनित्त्ये सर्वस्मिन् प्राणधारिणि । धर्मङ् कुरुत यत्नेन यो वः सङ्गं समेष्यति ॥

(प्रेतपिण्डदानमन्त्राः)

[पिण्डपितृयज्ञावृता प्रेतपिण्डदाने प्रेतस्स्यावनेजने मन्त्रः(पार.३।१०।२७,काश्रौ.४।१।१०,शत. २।४।२।१६)]

७४३. अस्म्मत्पितः अमुकशर्म्मन् अमुकगोत्त्रप् प्रेत अवनेनिक्क्ष्व[1] ।

---

१. यत् तु "(मोटकतिलजलान्यादाय) ॐअद्द्यामुकगोत्र पितरमुकप्रेत शिरःपूरकप्रथमपिण्डस्थानेऽत्रावनेनिक्ष्व ते मया दीयते तवोपतिष्ठताम्" इत्यादिकवँ वाक्क्यमदृष्टस्वशाखाश्रुतिसूत्रै रुद्द्रधरादिभिर् वाक्क्यरचना-ज्ञानविधुरैः प्रदर्शितम् (द्र.-श्राद्धविवेके, पृ. ६६), तदेव च नैपालीय-श्राद्ध-

[प्रेतपिण्डदाने मन्त्रः (पार. ३।१०।२७, काश्रौ. ४।१।११ शत. २।४।२।१९)]

७४४. अस्म्मत्पितः अमुकशर्म्मन् अमुकगोत्रप् प्रेत एतत् ते अन्नम्[1] ।

[प्रेतपिण्डदाने प्रेतस्स्य प्रत्त्यवनेजने मन्त्रः (पार. ३।१०।२७, काश्रौ. ४।१।१०, १५; शत. ४।२।२।२३)]

७४५. अस्म्मत्पितः अमुकशर्म्मन् अमुकगोत्रप् प्रेत अवनेनिक्क्ष्व ।

[प्रेतपिण्डदाने पिण्डोपरि ऊर्णासूत्त्राणाम् प्रदाने[2] मन्त्रः (काश्रौ. ४।१।१६)]

७४६. एतद् वः पितरो[3] वासः ॥ मासं. २।३२॥

[प्रथमपिण्डदानदिनस्स्य रात्त्रौ प्रेतार्थवँ विहायसि मृन्मये पात्त्रे क्षीरोदकयोर् मिश्श्रितयोर्[4] निधाने मन्त्रः (पार. ३।१०।२८)]

७४७. प्रेताऽत्त्रस्न् नाहि[5] ।

पद्धत्त्यादिसम्पादकैः कैश्चनाऽन्धतयाऽनुसृतम् , तत् सर्वं स्वशाखाश्रुति-सूत्त्राऽननुकूलत्त्वादसङ्गतत्त्वाच् च सर्वथा हेयम् ।

१. यद्द्यपि हरिहरादिभिः स्वशाखाश्रुतिसूत्त्रानुसरणस्खलद्गतिभिः "अमुकसगोत्त्रामुकशर्मन् प्रेत एष ते शिरःपूरकः पिण्डो मया दीयते" (हरिहरभाष्यपद्धतौ ३।१०) इत्त्यादिकानि "अमुकगोत्त्रामुकप्रेत रौरव-नामक-नरकोत्तारणार्थं मूर्धावयवनिष्पत्त्यै एप पूरकपिण्डो मद्दत्तस् तवोपतिष्ठताम्" (नित्त्यानन्दकृतेऽन्त्यकर्मदीपके पृ.३६) इत्त्यादिरूपाणि च पिण्डदानवाक्क्यानि प्रदर्शितानि तथापि तानि स्व-शाखाश्रुतिसूत्त्रानुसरणपरायणैरस्म्माभिरवधीरितानि ।

२ "पिण्डयज्ञावृता देयम् प्रेतायाऽन्नन् दिनत्त्रयम्" इति याज्ञवल्क्यस्मृतिवचनस्स्य (३।१६) दर्शनात् "प्रेताय पिण्डन् दत्त्वाऽवनेजनदानप्रत्त्यवनेजनेषु नामग्ग्राहम्" इति वदता पारस्क्करेण (३।१०।२७) प्रेतपिण्डदानेऽन्येषां श्राद्धकल्पसूत्त्रोक्तैकोद्दिष्टश्राद्धधर्माणामपोदितत्त्वेऽपि पिण्डपितृयज्ञे पिण्डोपरि सूत्त्राणान् दानस्स्य विहितत्त्वात् (काश्रौ. ४।१।१६), स्मृतिषु पुराणेषु च प्रेतपिण्डदानेऽपि पिण्डोपरि ऊर्णासूत्त्रदानस्स्याऽनुविहितत्त्वादस्माभिरेष उल्लेखः कृतो बोद्ध्यः । तदनन्तरन् तूष्णीमेवोदस्थाल्ल्या पिण्डमूले आपो निषेचनीया इति च बोद्ध्यम् ।

३. लोकान्तरगतमात्त्रे पितृशब्दप्प्रयोगो नाऽनुपपन्न इत्त्यत्त्र ऊहो न कृत इति बोद्ध्यम्। ऊहविषयेऽपि शाखाभेदाद् विविधा व्यवस्था भवतीत्त्यपि स्मर्तव्व्यम् । एष मन्त्रो न वा प्रयोज्ज्यो याज्ञवल्क्यस्मृतौ पिण्डयज्ञावृतेति आवृत एव विधानात् ।

४. पित्र्यकर्मणि मिश्श्रितयोः क्षीरोदकयोः प्रयोगस्स्य कात्त्यायनश्रौतसूत्त्रे (२१।४।२१), कौषीतकिगृह्य्यसूत्त्रे (५।५।५), आश्श्वलायनगृह्य्यसूत्त्रे (४।५।३), जैमिनिगृह्य्यसूत्त्रे (२।५) च दृश्श्यमानत्त्वात् , पारस्क्करेण क्षीरोदकयोस् समासेन निर्दिष्टत्त्वाद् (३।१०।२८), मन्त्रस्स्य चैकस्स्यैवोपदिष्टत्त्वात् , विश्श्वरूपाचार्येण याज्ञवल्क्यस्मृतिटीकायाम् बालक्क्रीडायाम् (३।१४-१५) कर्कोपाद्ध्यायेन जयरामेणापि पारस्क्करगृह्य्यसूत्त्रव्याक्ख्याने च मन्त्रान्तरस्स्याऽप्रदर्शितत्त्वात् , शाखान्तरगृह्य्याद्द्युक्तविधेस् स्वगृह्य्योक्तविधौ मिश्श्रणस्स्याऽन्याय्यत्वात् , स्वशाखाविद्ध्यननुकूलानां स्मृत्त्यन्तरविधीनाम् पुराणविधीनाञ् च शाखान्तरमूलकताया अवसीयमानत्त्वाच् च पारस्क्करगृह्य्यसूत्त्रानुसारिणाङ् क्षीरोदकयोः पारस्क्करेण समासेन निर्दिष्टत्त्वात् समपरिमाणयोर् मिश्श्रितयोरेव एकस्मिन्नेव मृन्मये पात्त्रे एकेनैव मन्त्रेण निधानमिति निश्चीयते । हरिहरोऽपि व्याक्ख्याने तु स्वमतं स्फुटतयाऽऽह- "यस्मिन् दिने प्रेतोऽभूत् तत्सम्बन्धिनीं रात्त्रीं क्षीरञ्च उदकञ्च क्षीरोदके दुग्धपानीये पात्त्रैकवचनसामर्थ्यादेकीकृते विहायसि आकाशे निदद्ध्युः स्थापयेयुः । कथम् ? प्रेताऽत्र स्नाहीत्त्यनेन मन्त्रेण" इति । हरिहरस्स्येदम् मतम् "हरिहरस्तु मृन्मय इति पात्त्रैकवचनसामर्थ्यात् प्रेताऽत्रस्नाहीति मन्त्रेणैकत्त्रोभयनिधानं मन्यते" इति शुद्धिमयूखेऽपि उल्लिखितम् (पृ. ४०) । गारुडे मात्स्ये च पयस एव स्थापनमुक्तमिति च तत्त्रैव ।

५. उदकदाने पारस्क्करेण "प्रेतायोदक[6] सकृतत् प्रसिञ्चन्त्यञ्जलिनाऽसावेतत् त उदकमिति" (३।१०।२१) इति सर्वनामग्ग्रहणात् , अवनेजनदाने च कात्त्यायनेन "उदपात्त्रेणावनेजयत्त्यपसव्व्य[6] →

(ऐकादशाहिक-प्रेतैकोद्दिष्ट- श्राद्धमन्त्रा:[1])

[ब्राह्म्मणनिमन्त्रणे मन्त्रः (काश्राकसू., क. १)]

७४८. श्वः[2] (अद्य वा) प्रेततृप्त्यादिकामः अस्म्मत्पितुः[3] अमुकशर्म्मणः अमुकगोत्त्रस्स्य प्रेतस्स्य ऐकादशाहिकश्श्राद्धङ् कर्त्तास्म्मि (करिष्ष्ये वा), तत्त्र मया प्रेतब्राह्म्मणत्त्वे भवन्त आमन्त्रिताः ।

[आमन्त्रणस्वीकारे ब्राह्म्मणेन प्प्रयोज्ज्यो मन्त्रः]

७४९. आमन्त्रिताः स्मः ।

[स्वागतप्प्रश्ने मन्त्रः]

७५०. स्वागता भवन्तः ?

[प्रतिवचने ब्राह्म्मणेन प्प्रयोज्ज्यो मन्त्रः]

७५१. सुस्स्वागता वयम् ।

[ब्राह्म्मणोपवेशने श्राद्धकर्त्रा प्रयोज्ज्यो मन्त्रः]

७५२. एतदासनम् , उपविशन्तु भवन्तः ।

सव्व्येन वोद्धरणसामर्त्थ्यादसाववनेनिक्क्ष्वेति" (काश्रौ. ४।१।१०) इति सर्वनामग्ग्रहणात् , पिण्डदाने च पारस्क्करेण "प्रेताय पिण्डन् दत्त्वाऽवनेजनदानप्प्रत्त्यवनेजनेषु नामग्ग्राहम्" (३।१०।२७) इत्त्युक्तत्त्वात्, कात्त्यायनेन च "यथावनिक्क्तम् पिण्डन् ददात्त्यसावेतत् त इति" (काश्रौ. ४।१।११) इति सर्वनामग्ग्रहणात् , स्वसम्बन्धादिवाचकशब्दप्प्रयोगनिषेधस्स्य च शाखान्तरमूलकताया अवगम्म्यमानत्त्वात् स्वसम्बन्धनामगोत्रप्रेतत्त्वोल्लेखेन सम्बोधनम् ; क्षीरोदकनिधाने तु पारस्क्करेण सर्वनाम्नोऽगृहीतत्त्वात् पारस्क्करनिर्देशानुसारमेवाऽयम् मन्त्रोऽत्त्र प्प्रदर्शितो बोद्ध्यः ।

1. उपदेशातिदेशयोरभावादनाहिताग्नेरस्थिसञ्चयनस्स्य पारस्क्करगृह्म्यसूत्त्रानुसारिभिरकर्तुं शक्क्यत्त्वस्स्य कर्कोपाद्ध्यायेनोक्तत्त्वात् (पार. ३।१०।२-४), नवश्श्राद्धादीनामन्न्येषाञ्च च कर्मणामस्मच्छाखायामदर्शनाद् अतः परमैकादशाहिकश्श्राद्धमन्त्रा लिक्ख्यन्ते । ऐकादशाहिक-श्श्राद्धञ् च कात्त्यायनश्श्राद्धकल्पसूत्त्रचतुर्थकण्डिकोक्तप्प्रकारेण कर्तव्व्यम् ; तस्स्याः कण्डिकायाः प्रेतैकोद्दिष्टान्न्यैकोद्दिष्टसाधारणता च शाङ्खायनगृह्म्यसूत्त्रसवंवादाद् , उत्तरकण्डिकास्थततश्शब्ददर्शनाद् , हेमाद्द्र्यादिकृतव्याक्ख्यानात् (च.चि. श्रा.ख. पृ. १६०६), वीरमित्त्रोदयशुद्धिप्रकाशस्थ- (पृ. २१८) मत्स्यपुराण-मार्कण्डेयपुराणवचनात् , ऐकादशाहिकश्श्राद्धप्रकारविशेषस्स्य पारस्क्करगृह्म्यसूत्त्रे कात्त्यायनश्श्राद्धकल्पसूत्त्रे चाऽनुपलब्भ्यमानत्त्वात् , लघुस्मृतिपुराणादिस्थविधिनिषेधविशेषाणाञ्च च शाखान्तरविधिनिषेधविशेषमूलकताया अवसीयमानत्त्वाद् धर्मशास्त्रनिबन्धकाराणाम् पद्धतिकाराणाञ्च च गतानुगतिकताया व्यामूढतायाश् च दृश्श्यमानत्त्वान् निश्चीयते ।

2. दशमे दिने रात्त्रौ ब्राह्म्मणनिमन्त्रणार्थं शुद्धिर्भवतीति प्रतिपादकन् "दशमम् पिण्डमुत्सृज्ज्य रात्त्रिशेषे शुचिर् भवेत्" (नि. सि. पृ. ४१७) इति स्मृतिवचनं स्मर्तव्व्यम् ।

3. "आशिषो (आवाहो ?) द्विगुणा दर्भा जपाशीः स्वस्तिवाचनम् । पितृशब्दः स्वसम्बन्धः शर्मशब्दस् तथैव च । पात्त्रालम्भोऽवगाहश् च उल्मुकोल्लेखनादिकम् । तृप्तिप्प्रश्नश् च विकिरः शेषप्प्रश्नस् तथैव च । प्रदक्षिणा विसर्गश् च सीमान्तगमनन् तथा । अष्टादशपदार्थांस् तु प्रेतश्श्राद्धे विवर्जयेत्" इति वचनन् तु कात्त्यायन-श्राद्धकल्पसूत्त्रानुसारिणामैकादशाहिके प्रेतश्राद्धे न प्रवर्तते, स्वसूत्त्रे आवाहनादीनान् त्रयाणामेव पदार्थानान् निषिद्धत्त्वात् ; रुद्द्रधरोऽपि ऐकादशाहिकश्श्राद्धविषये एतद् वचनं न योजयति ; तथैव विश्श्वनाथोऽपि ; तथैव छन्दोगश्श्राद्धपद्धतौ श्रीदत्तोऽपि ; नित्त्यानन्दोऽपि आब्भ्युदयिकश्श्राद्धविषये तु अन्न्यवचन-निषिद्धमपि स्वसूत्त्राऽनिषिद्धत्त्वादनुष्ठेयमिति वदत्त्येव (सं.दी., प्र.भा. पृ.६१, १२४) ।

[प्रैपस्स्वीकारे ब्राह्म्मणेन प्प्रयोज्ज्यो मन्त्रः]

७५३. ओम् , उपविशामः ।

[अर्घपात्त्रेऽपामासेचने मन्त्रः (काश्राकसू., क. २)

७५४. शन् नो देवीरभिष्ट्टयऽ आपो भवन्तु पीतये ।
शय्योरभिसस्स्रवन्तु नः ॥ मासं. ३६।१२॥

[अर्घपात्त्रे तिलानामावपने मन्त्रः (काश्राकसू., क. २)

७५५. तिलोऽसि सोमदैवत्त्यो गोसवो देवनिर्म्मितः ।
प्रत्त्नमद्द्भिः पृक्क्तः स्वधया पितॄल्ँ लोकान्न् प्रीणाहि नः स्वाहा ॥

[ब्राह्म्मणहस्तेऽर्घनिनयने मन्त्रौ (काश्राकसू., क. २)]

७५६. या दिव्व्याऽआपःपयसा सम्बभूवुर्य्या याऽअन्तरिक्क्ष्याऽउत पार्त्थवीर्य्या याः ।
हिरण्ण्यवर्ण्णा यज्ज्ञियास्त् ता नऽआपः शिवाः शꣳ स्योनाः सुहवा भवन्तु ॥

७५७. (अद्यैकादशाहिकश्श्राद्धे) अस्म्मत्पितः अमुकशर्म्मन् अमुकगोत्त्रप् प्रेत एष तेऽर्ग्घः ।

[अर्घपात्त्रन्युब्जीकरणे मन्त्रः (काश्राकसू., क. २)]

७५८. पितृब्भ्यस्त् थानमसि[1] ।

[ब्राह्म्मणम् परितस् तिलानाम् प्रकरणे मन्त्रः (काश्राकसू., क. ३)]

७५९. अपहताऽ असुरा रक्क्षाꣳसि बेदिषदः ॥ मासं. २।२९॥

[ब्राह्म्मणाय सुखोष्णयँ यथेष्टयँ यथाशक्ति वाऽन्नन् दत्त्वा अशने ब्राह्म्मणस्य प्रेरणे मन्त्रः]

७६०. अश्नन्तु भवन्तः (यथासुखञ् जुषन्ताम् भवन्तः) ।

[ब्राह्म्मणेषु अश्नत्सु श्राद्धकर्त्रा जपनीया मन्त्राः[2] (काश्राकसू., क. ३)]

७६१. भूर्व् भुवः स्वः ॥ ओ३म् ॥ तत्सवितुर्व् बरेण्ण्यम् भर्ग्गो देवस्स्य धीमहि । धियो यो नः प्रचोदयात् ॥ मासं. ३६।३॥

(राक्क्षोग्घ्न्य ऋचः [मासं. १३।१०-१३])

७६२. कृणुष्ष्व पाजः प्रसितिन् न पृत्थ्वीयँ याहि राजेवाऽमवाँऽ इभेन ।
तृष्ष्वीमनुप् प्रसितिन् द्रूणानोऽस्त्तोऽसि बिद्ध्य रक्क्षसस्त् तपिष्ट्ठैः ॥

७६३. तवब् भ्रमासऽ आशुया पतन्त्यनुस् पृश धृषता शोशुचानः ।
तपूꣳष्ष्यग्ग्ने जुह्वा पतङ्गानसन्दितो बिसृज बिष्ष्वगुल्क्काः ॥

७६४. प्रतिस्पशो बिसृज तूर्ण्णितमो भवा पायुर्ब् बिशोऽअस्स्याऽअदब्धः ।
यो नो दूरेऽ अघशꣳसो योऽ अन्त्यग्ग्ने मा किष्ट्टेब् ब्यथिरादधर्षीत् ॥

---

१. पितृशब्दो न केवलङ् कृतसपिण्डीकरणकपित्त्रादिवाचकः, किन्तु लोकान्तरगतसर्वपित्त्रादिसाधारण इति मन्न्यामहे, निरपत्त्यत्त्वादिनाऽकृतसपिण्डीकरणानाम् (द्र-पार.३।१०।५०; मनु. ३।२४७; काश्राकसू. कर्कोपाद्ध्यायभाष्ष्यम्, क. ५) अपि पितृशब्देन व्यवहार्यत्त्वात् ।

२. "अश्नत्सु जपेद् व्याहृतिपूर्व्वाङ् गायत्रीꣳ सप्रणवाꣳ सकृत् त्रिर्व् बा राक्क्षोग्घ्नीः पित्त्र्यमन्त्रान्न् पुरुषसूक्क्तमप्रतिरथमन्न्यानि च पवित्त्राणि" इति कात्त्यायनश्राद्धकल्पसूत्त्रे, क. ३ ।

७६५. उदग्ग्ने तिष्ट्ठप् प्रत्त्या तनुष्ष्वन् न्युमित्त्रा२ाँऽ ओषतात् तिग्ग्महेते ।
यो नोऽरातिꣳ समिधान चक्क्रे नीचा तन् धक्क्ष्यतसन् न शुष्क्कम् ॥
७६६. ऊर्द्ध्वो भवप् प्रतिविद्ध्याद्ध्यस्म्मदाविष्क्कृणुष्ष्व दैब्व्यान्न्यग्ग्ने ।
अवस्त् थिरा तनुहि यातुजूनाञ् जामिमजामिम् प्रमृणीहि शत्त्रून् ॥ १३।१३॥

(पित्र्यमन्त्राः [मासं. १९।४९-६१])

७६७. उदीरतामवरऽ उत्त् परासऽ उन्न् मद्ध्यमाः पितरः सोम्म्यासः ।
असुयँ यऽ ईयुरवृकाऽ ऋतज्ज्ञासुन्त् तेनोऽवन्तु पितरो हवेषु ॥ १९।४९॥
७६८. अङ्गिरसो नः पितरो नवग्ग्वाऽ अथर्ब्बाणो भृगवः सोम्म्यासः ।
तेषावँ वयꣳ सुमतौ यज्ज्ञियानामपि भद्द्रे सौमनसेस् स्याम ॥ १९।५०॥
७६९. ये नः पूर्ब्बे पितरः सोम्म्यासोऽनूहिरे सोमपीथवँ वसिष्ट्ठाः ।
तेभिर्य् यमः सꣳरराणो हवीꣳष्युशन् नुशद्द्भिः प्रतिकाममत्तु ॥१९।५१॥
७७०. त्वꣳ सोमप् प्रचिकितो मनीषात् त्वꣳ रजिष्ट्ठमनुनेषि पन्थाम् ।
तवप् प्रणीती पितरो नऽ इन्दो देवेषु रत्त्नमभजन्त धीराः ॥ १९।५२॥
७७१. त्वया हि नः पितरः सोम पूर्ब्बे कर्म्माणि चक्क्रुः पवमान धीराः ।
बन्न्वन् नवातः परिधी१ाँऽरपोर्ण्णु वीरेभिरश्श्वैर्म् मघवा भवा नः॥१९।५३॥
७७२. त्वꣳ सोम पितृभिः सवँविदानोऽनुद् द्यावापृथिवीऽ आ ततन्थ ।
तस्म्मै तऽ इन्दो हविषा बिधेम बयꣳ स्याम पतयो रयीणाम् ॥१९।५४॥
७७३. बर्हिषदः पितरऽ ऊत्त्यर्ब्बागिमा वो हब्व्या चकृमा जुषद्ध्वम् ।
तऽ आगताऽवसा शन्तमेनाऽथा नः शय्योररपो दधात ॥ मासं. १९।५५॥
७७४. आऽहम् पितॄन् त्सुविदत्त्रा२ाँऽअवित्त्सि नपातञ्च बिक्क्रमणञ्च बिष्ष्णोः ।
बर्हिषदो येस् स्वधया सुतस्स्य भजन्त पित्त्वस्त् तऽ इहागमिष्ट्ठाः ॥
७७५. उपहूताः पितरः सोम्म्यासो बर्हिष्ष्येषु निधिषुप् प्रियेषु ।
तऽ आगमन्तु तऽ इहश् श्रुवन्त्वधिब् ब्रुवन्तु तेऽवन्त्वस्म्मान् ॥१९।५७॥
७७६. आ यन्तु नः पितरः सोम्म्यासोऽग्ग्निष्ष्वात्ताः पथिभिर्द् देवयानैः ।
अस्म्मिन् न्यज्ज्ञेस् स्वधया मदन्तोऽधिब्ब्रुवन्तु तेऽवन्त्वस्म्मान् ॥
७७७. अग्ग्निष्ष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्प्रणीतयः ।
अत्ता हवीꣳषिप् प्रयतानि बर्हिष्ष्यथा रयिꣳ सर्ब्बवीरन् दधातन ॥
७७८. येऽअग्ग्निष्ष्वात्ता येऽअनग्ग्निष्ष्वात्ता मद्ध्ये दिवः स्वधया मादयन्ते ।
तेब्भ्यः स्वराडसुनीतिमेतायँ यथावशन् तनन्वङ् कल्प्पयाति ॥ १९।६०॥
७७९. अग्ग्निष्ष्वात्तानृतुमतो हवामहे नाराशꣳसे सोमपीथयँ यऽ आशुः ।
ते नो बिप्प्रासः सुहवा भवन्तु बयꣳ स्याम पतयो रयीणाम् ॥ १९।६१॥

(पुरुषसूक्तम् [मासं. ३१।१-१६])

७८०. सहस्स्रशीर्षा पुरुषः सहस्स्राक्क्षः सहस्स्रपात् ।
स भूमिꣳ सर्ब्बतस् पृत्त्वाऽत्त्यतिष्ट्ठद् दशाङ्गुलम् ॥३१।१॥

७८१. पुरुषऽ एवेदꣳ सर्ब्बयँ यद्द् भूतयँ यच् चे भाब्व्यम् ।
उताऽमृतत्त्वस्स्येशानो यदन्नेनाऽतिरोहेति ॥ मासं. ३१।२॥
७८२. एतावानस्स्य महिमाऽतोज् ज्यायाँश्च् च पूरुषह् ।
पादोऽस्स्य बिश्श्वा भूतानित् त्रिपादस्स्याऽमृतन् दिवि ॥ मासं. ३१।३॥
७८३. त्रिपादूर्द्ध्वऽ उदैतत् पुरुषह् पादोऽस्स्येहाऽभवतत् पुनः ।
ततो विष्ष्वङ् ङ्व्यक्क्रामत् त्साशनानशनेऽ अभि ॥ मासं. ३१।४॥
७८४. ततो बिराडजायत बिराजोऽ अधि पूरुषह् ।
स जातोऽ अत्त्यरिच्च्यत पश्च्चादद् भूमिमथो पुरः ॥ मासं. ३१।५॥
७८५. तस्म्माद् यज्ज्ञात् त्सर्ब्बहुतह् सम्भृतम् पृषदाज्ज्यम् ।
पशूँस्त् ताँश्च् चेक्क्रे बायव्व्यानारण्ण्याग् ग्राम्म्याश्च् च ये ॥३१।६॥
७८६. तस्म्माद् यज्ज्ञात् त्सर्ब्बहुतऽ ऋचह् सामानि जज्ज्ञिरे ।
छन्दाꣳसि जज्ज्ञिरे तस्म्माद् यजुस्त् तस्म्मादजायत ॥मासं. ३१।७॥
७८७. तस्म्मादश्श्वाऽ अजायन्त ये के चोभयादतह् ॥
गावो ह जज्ज्ञिरे तस्म्मात् तस्म्माज् जाताऽ अजावयः ॥मासं. ३१।८॥
७८८. तयँ यज्ज्ञम् बर्हिषिप् प्रौक्क्षन्न् पुरुषञ् जातमग्ग्रतः ।
तेन देवाऽ अयजन्त साद्ध्याऽ ऋषयश्च् च ये ॥ मासं. ३१।९॥
७८९. यत्त् पुरुषवँ व्यदधुह् कतिधाब् ब्यकल्प्पयन् ।
मुखङ् किमस्स्याऽऽसीत्त् किम् बाहू किमूरू पादाऽ उच्च्येते ॥ ३१।१०॥
७९०. ब्राह्म्मणोऽस्स्य मुखमासीदद् बाहू राजन्न्यः कृतः ।
ऊरू तदस्स्य यद् वैश्श्यः पद्द्भ्याꣳ शूद्द्रोऽ अजायत ॥ मासं.३१।११॥
७९१. चन्द्रमा मनसो जातश्च् चक्क्षोह् सूर्य्योऽ अजायत ।
श्रोत्त्राद् द्वायुश्च् चप् प्राणश्च् च मुखादग्ग्निरजायत ॥ मासं.३१।१२॥
७९२. नाब्भ्याऽ आसीदन्तरिक्क्षꣳ शीर्ष्ष्णोद् द्यौः समवर्त्तत ।
पद्द्भ्याम् भूमिर्द् दिशह् श्रोत्त्रात् तथा लोकाꣳऽ अकल्प्पयन् ॥ ३१।१३॥
७९३. यत्त् पुरुषेण हविषा देवा यज्ज्ञमतन्न्वत ।
बसन्तोऽस्स्याऽऽसीदाज्ज्यङ् ग्रीष्म्मऽ इद्ध्मः शरद् धविः ॥ मासं.३१।१४॥
७९४. सप्प्ताऽस्स्याऽऽसन्न् परिधयस्त् त्रिः सप्प्त समिधः कृताः ।
देवा यद् यज्ज्ञन् तन्न्वानाऽ अबध्नन्न् पुरुषम् पशुम् ॥ मासं.३१।१५॥
७९५. यज्ज्ञेन यज्ज्ञमयजन्त देवास्त् तानि धर्म्माणिप् प्रथमान्न्यासन् ।
ते ह नाकम् महिमानः सचन्त यत्र पूर्ब्बे साद्ध्याः सन्ति देवाः ॥

(अप्प्रतिरथमन्त्राः [इन्द्रसूक्तम् , मासं. १७।३३-४४])

७९६. आशुः शिशानो बृषभो न भीमो घनाघनः क्क्षोभणश्च् चर्षणीनाम् ।
सङ्क्रन्दनोऽनिमिषऽ एकवीरः शतꣳ सेनाऽ अजयत् त्साकमिन्द्रः ॥
७९७. सङ्क्रन्दनेनाऽनिमिषेण जिष्ण्णुना युत्त्कारेण दुश्च्च्यवनेन धृष्ण्णुना ।
तदिन्द्रेण जयत तत् त्सहद्ध्वयँ युधो नरऽ इषुहस्त्तेन बृष्ण्णा ॥

७९८. सऽ इषुहस्त्तैः स निषङ्गिभिर्ब् बशी स७ स्रष्ट्टा सयुधऽ इन्द्रो गणेनं ।
सꣳसृष्ट्टजित् त्सोमपा बाहुशर्द्ध्युग्ग्रधन्न्वाप् प्रतिहिताभिरस्त्ता ॥
७९९. वृहस्प्पते परिदीया रथैन रक्क्षोहाऽमित्त्राँ२ऽ अपबाधमानः ।
प्रभञ्जन् त्सेनाः प्रमृणो युधा जयन् नसम्माकमेद्ध्यविता रथानाम् ॥
८००. बलविज्ज्ञायस्त् थविरः प्रवीरः सहस्स्वान् न्वाजी सहमानऽ उग्ग्रः ।
अभिवीरोऽ अभिसत्त्वा सहोजा जैत्त्रमिन्द्र रथमातिष्ट्ठ गोवित् ॥
८०१. गोत्त्रभिदङ् गोविदवँ व्वज्ज्रबाहुञ् जयन्तमज्ज्मप् प्रमृणन्तमोजसा ।
इमꣳ सजाताऽ अनु वीरयद्ध्वमिन्द्रꣳ सखायोऽ अनु सꣳरभद्ध्वम् ॥
८०२. अभि गोत्त्राणि सहसा गाहमानोदयो बीरः शतमन्न्युरिन्द्रः ।
दुश्च्च्यवनः पृतनाषाडयुद्ध्योसम्माकꣳ सेनाऽ अवतुप् प्रयुत्त्सु ॥
८०३. इन्द्रऽआसान् नेता वृहस्प्पतिर्द् दक्क्षिणा यज्ज्ञः पुरऽ एतु सोमः ।
देवसेनानामभिभञ्जतीनाञ् जयन्तीनाम् मरुतो यन्त्वग्ग्रम् ॥
८०४. इन्द्रस्स्य बृष्ण्णो बरुणस्स्य राज्ज्ञऽ आदित्त्यानाम् मरुताꣳ शर्द्धऽ उग्ग्रम् ।
महामनसाम् भुवनच्च्यवानाङ् घोषो देवानाञ् जयतामुदस्त्थात् ॥
८०५. उद्धर्षय मघवन् नायुधान्न्युत् त्सत्त्वनाम् मामकानाम् मनाꣳसि ।
उद् द्वृत्रहन् न्वाजिनावँ वाजिनान्न्युद् द्रथानाञ् जयतायँ यन्तु घोषः ॥
८०६. अस्म्माकमिन्द्रः समृतेषुद् ध्वजेष्ष्वस्म्माकयँ याऽ इषवस्त् ता जयन्तु ।
अस्म्माकवँ वीराऽ उत्तरे भवन्त्वस्म्माँ२ऽ उ देवाऽ अवता हवेषु ॥
८०७. अमीषाञ् चित्तम् प्रति लोभयन्ती गृहाणाङ्गान्न्यप्प्वे परेहि ।
अभिप् प्रेहि निर्द्दह हृत्त्सु शोकैरन्धेनाऽमित्त्रास्त् तमसा सचन्ताम् ॥

(अन्यानि पवित्राणि [काश्राकसू., क. ३])[1]

[रुद्रसूक्तम् (मासं. १६।१-१६)]

८०८. नमस्त् ते रुद्द्र मन्न्यवऽ उतो तऽ इषवे नमः ।
बाहुब्भ्यामुत ते नमः ॥ मासं.१६।१॥
८०९. या ते रुद्द्र शिवा तनूरघोरा पापकाशिनी ।
तया नस्त् तनन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥ मासं.१६।२॥
८१०. यामिषुङ् गिरिशन्त हस्त्ते बिभर्ष्ष्यस्त्तवे ।
शिवाङ् गिरित्त्र ताङ् कुरु मा हिꣳसीः पुरुषञ् जगत् ॥ मासं.१६।३॥
८११. शिवेन बचसात् त्वा गिरिशाऽच्छा बदामसि ।
यथा नः सर्व्वमिज् जगदयक्ष्मꣳ सुमनाऽ असत् ॥ मासं. १६।४॥

---

१. स्वसूत्रे "अन्यानि च पवित्राणि" इति अपरिगणनेनोक्तत्त्वात् मत्स्यपुराणादिषु च- "ब्रह्म्म-विष्णिवन्द्ररुद्द्राणां स्तोत्त्राणि विविधानि च । इन्द्रेशसोमसूक्तानि पावमानीश्च शक्तितः ॥ तथैव शान्तिकाद्ध्यायम् मधुब्राह्म्मणमेव च । मण्डलब्ब्राह्म्मणन् तद्वत् प्रीतिकारि च यत् पुनः ॥ विप्प्राणामात्मनश्चाऽपि तत् सर्वं समुदीरयेत् । भारताद्ध्ययनङ् कार्यम् पितृणाम् परमम् प्रियम्" इत्त्यादीनावँ वचनानान् दर्शनाच् च ब्राह्म्मणभोजनकाले पठनेन समापयितुं शक्क्या रुद्द्रसूक्तादिमन्त्रा अत्त्र सङ्गृहीता बोद्ध्याः ।

८१२. अद्ध्यवोचदधिवक्क्ताप् प्रथमो दैब्व्यो भिषक् ।
अहीँश्च् च सर्ब्बान् जम्भयन् त्सर्ब्बाश्च् च यातुधान्न्योऽधराचीः परासुव ॥
८१३. असौ यस्त् ताम्म्रोऽ अरुणऽ उत बब्भ्रुः सुमङ्गलः ।
ये चैनꣳ रुद्द्राऽ अभितो दिक्क्षुश् श्रिताः सहस्स्रशो वैषाꣳ हेडऽ ईमहे ॥
८१४. असौ यौऽवसर्प्पति नीलग्ग्रीवो बिलोहितः ।
उतैनङ् गोपाऽ अदृशश्रन् नदृश्श्रन् नुदहार्य्यः स दृष्ट्टो मृडयाति नः ॥
८१५. नमोऽस्त्तु नीलग्ग्रीवाय सहस्स्राक्क्षाय मीढुषे ।
अथो येऽ अस्स्य सत्त्वानोऽहन् तेब्भ्योऽकरन् नमः ॥ मासं.१६।८॥
८१६. प्रमुञ्च् धन्न्वनस्त् त्वमुभयोरार्त्त्न्योर्ज् ज्याम् ।
याश्च् च ते हस्त्त इषवः परा ता भगवो बप ॥ मासं.१६।९॥
८१७. बिज्ज्यन् धनुः कपर्द्दिनो बिशल्ल्यो बाणवाँऽ उत ।
अनेशन् नस्स्य याऽ इषवऽ आभुरस्स्य निषङ्गधिः ॥ मासं. १६।१०॥
८१८. या ते हेतिर्म् मीढुष्ट्टम हस्त्ते बभूव ते धनुः ।
तयाऽस्म्मान् न्विश्श्वतस्त् त्वमयक्क्ष्मया परिभुज ॥ मासं.१६।११॥
८१९. परि ते धन्न्वनो हेतिरस्म्मान् न्वृणक्क्तु बिश्श्वतः ॥
अथो यऽ इषुधिस्त् तवाऽऽरेऽ अस्म्मन् निधेहि तम् ॥ मासं.१६।१२॥
८२०. अवतत्त्य धनुष्ट् ट्वꣳ सहस्स्राक्क्ष शतेषुधे ।
निशीर्य्य शल्ल्यानाम् मुखा शिवो नः सुमना भव ॥ मासं.१६।१३॥
८२१. नमस्त् तऽ आयुधायाऽनातताय धृष्ण्णवे ।
उभाब्भ्यामुत ते नमो बाहुब्भ्यान् तव धन्न्वने ॥ मासं.१६।१४॥
८२२. मा नो महान्तमुत मा नोऽअर्ब्भकम् मा नऽउक्क्षन्तमुत मा नऽउक्क्षितम् ।
मा नो बधीः पितरम् मोत मातरम् मा नःप् प्रियास्त् तन्न्वो रुद्द्र रीरिषः ॥
८२३. मा नस्त् तोके तनये मा नऽ आयुषि मा नो गोषु मा नोऽ अश्श्वेषु रीरिषः ।
मा नो बीरान् न्रुद्द्र भामिनो बधीर् हविष्म्मन्तः सदमित् त्वा हवामहे ॥

[सोमसूक्तम् ,मासं ३४।२०-२३]

८२४. अषाढय्ँ युत्त्सु पृतनासु पप्प्रिꣳ स्वर्षामप्प्सावँ वृजनस्स्य गोपाम् ।
भरेषुजाꣳ सुक्क्षितिꣳ सुश्श्रवसञ् जयन्तन् त्वामनुमदेम सोम ॥
८२५. सोमो धेनुꣳ सोमोऽ अर्ब्बन्तमाशुꣳ सोमो बीरङ् कर्म्मण्ण्यन् ददाति ।
सादन्न्यवँ विदत्थ्यꣳ सभेयम् पितृश्श्रवण्णय्ँ यो ददाशदस्म्मै ॥
८२६. त्वमिमाऽ ओषधीः सोम बिश्श्वास्त् त्वमपोऽ अजनयस्त् त्वङ् गाः ।
त्वमाततन्थोर्व्वन्तरिक्क्षन् त्वञ् ज्योतिषा बि तमो बवर्त्थ ॥
८२७. देवेन नो मनसा देव सोम रायो भागꣳ सहसावन् नभियुद्ध्य ।
मात् त्वा तनदीशिषे बीर्य्यस्स्योभयेब्भ्यःप् प्रचिकित्त्सा गविष्ट्टौ ॥

[ब्रह्मस्तोत्रम्, मासं. १३।३]

८२८. ब्रह्मम्मं जज्ज्ञानम् प्रथमम् पुरस्त्ताद् व्रिसीमतः सुरुचो वेनऽ आवः।
स बुद्ध्न्याऽ उपमाऽ अस्स्य विष्ठाः सतश्च च योनिमसतश्च च बि वः॥

[विष्णुस्तोत्रम्]

८२९. तद् विष्ण्णोः परमम् पद सदा पश्श्यन्ति सूरयः।
दिवीव चक्क्षुराततम्॥ मासं. ६।५॥

[शिवस्तोत्रम्]

८३०. नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्क्कराय च
नमः शिवाय च शिवतराय च॥ मासं. १६।४१॥

[सूर्यस्तोत्रम्, मासं. ३३।४३]

८३१. आ कृष्ण्णेन रजसा बर्त्तमानो निवेशयन् नमृतम् मर्त्त्यञ्च च।
हिरण्ण्ययेन सविता रथेना देवो याति भुवनानि पश्श्यन्॥

[पावमानीनामृचामाद्यास्[1] तिस्र ऋचः]

८३२. पुनन्तु मा पितरः सोम्म्यासः पुनन्तु मा पितामहाः
पुनन्तुप् प्रपितामहाः। पवित्त्रेण शतायुषा॥ मासं. १९।३७॥

८३३. पुनन्तु मा पितामहाः पुनन्तुप् प्रपितामहाः।
पवित्त्रेण शतायुषा बिश्श्वमायुर्ब्ब्यश्नवै॥ मासं. १९।३७॥

८३४. अग्ग्नऽ आयूंषि पवसऽ आसुवोर्ज्जमिषञ्च च नः।
आरे बाधस्स्व दुच्छुनाम्॥ मासं. १९।३८॥

[ईशावास्स्योपनिषत्[2] (मासं. ४०।१-१७)]

८३५. ईशा बास्स्यमिदं सर्ब्बयँ यत्त् किञ्च जगत्त्याञ्जगत्।
तेनत् त्यक्क्तेन भुञ्जीथा मा गृधः कस्स्येस् स्विद् धनम्॥ मासं. ४०।१॥

८३६. कुर्ब्बन् नेवेह कर्म्माणि जिजीविषेच्छतं समाः।
एवन् त्वयि नाऽन्न्यथेतोऽस्त्ति न कर्म्म लिप्प्यते नरे॥ मासं. ४०।२॥

८३७. असुर्य्या नाम ते लोकाऽ अन्धेन तमसा बृताः।
ताँस्त् तेप् प्रेत्त्याऽपि गच्छन्ति ये के चात्तमहनो जनाः॥मासं. ४०।३॥

---

१. पावमानीनां षोडशानामृचाम् पाठेऽशक्तौ एता आद्यास् तिस्र ऋचः पठनीया इति हारीत-धर्मसूत्रे प्रोक्तमिति चतुर्वर्गचिन्तामणौ श्राद्धखण्डे यजमानजप्प्यनिरूपणे हेमाद्रिः। तथैव वीरमित्रोदये श्राद्धप्रकाशे मित्त्रमिश्रश्च।

२. ब्रह्मोद्द्यकथायास् स्वाद्ध्यायस्स्य च सामान्यतया "यद्यद् रोचेत विप्प्रेब्भ्यस् तत्तद् दद्द्यादमत्सरः। ब्रह्मोद्द्याश् च कथाः कुर्यात् पितृणामेतदीप्सितम्॥ स्वाद्ध्यायं श्रावयेत् पित्र्ये धर्मशास्त्राणि चैव हि। आख्यानानीतिहासाँश्च पुराणानि खिलानि च॥" (मनु. ३।२३१, २३२) इत्त्यादिभिर् वचनैः श्राद्धे ब्राह्मणेषु अश्नत्सु जप्प्यत्वेन विहितत्त्वाद्, उपनिषदश्च ब्रह्मोद्द्यकथारूपत्त्वात् स्वाद्ध्यायसारत्त्वात् परमपवित्रत्त्वाद् आत्मनः प्रीतिकारित्त्वाच् चाऽस्माभिरत्त्र सङ्ग्रहः कृतो बोद्ध्यः।

८३८. अनेजदेकम् मनसो जवीयो नैनद् देवाऽ आप्प्नुवन् पूर्व्बमर्शत् ।
तद् धावतोऽन्यानत्त्येति तिष्ट्ठत् तस्म्मिन्नपो मातरिश्श्वा दधाति ॥

८३९. तदेजति तन् नैजति तद् दूरे तद्द्वन्तिके ।
तदन्तरस्य सर्व्वस्य तदु सर्व्वस्याऽस्य बाह्यतः ॥ ४०।५॥

८४०. यस्त् तु सर्व्वाणि भूतान्यात्तम्मन्येवाऽनु पश्श्यति ।
सर्व्वभूतेषु चात्तमानन् ततो न विचिकित्सति ॥ मासं. ४०।६॥

८४१. यस्म्मिन् त्सर्व्वाणि भूतान्यात्तमैवाभूद् द्विजानतः ।
तत्र को मोहः कः शोकऽ एकत्त्वमनुपश्श्यतः ॥ मासं. ४०।७॥

८४२. स पर्य्यगाच् छुक्क्रमकायमव्व्रण-
मस्न्नाविरं शुद्धमपापविद्धम् ।
कविर्म् मनीषी परिभूः स्वयम्भूर्य्
याथातत्थ्यतोर्त्थान् व्यदधाच् छाश्श्वतीब्भ्यः समाब्भ्यः ॥ ४०।८॥

८४३. अन्धन् तमः प्रविशन्ति येऽसम्भूतिमुपासते ।
ततो भूयऽ इव ते तमो यऽ उ सम्भूत्त्याँ रताः ॥ मासं. ४०।९॥

८४४. अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात् ।
इति शुश्श्रुम धीराणायँ ये नस्त् तद् द्विचचक्क्षिरे ॥ मासं. ४०।१०॥

८४५. सम्भूतिञ् च विनाशञ् च यस्त् तद् द्वेदोभयं सह ।
विनाशेन मृत्त्युन् तीर्त्त्वा सम्भूत्त्याऽमृतमश्नुते ॥मासं. ४०।११॥

८४६. अन्धन् तमः प्रविशन्ति येऽविद्द्यामुपासते ।
ततो भूयऽ इव ते तमो यऽ उ विद्द्यायाँ रताः ॥ मासं. ४०।१२॥

८४७. अन्यदेवाहुर्व् विद्द्यायाऽ अन्यदाहुरविद्द्यायाः ।
इति शुश्श्रुम धीराणायँ ये नस्त् तद् द्विचचक्क्षिरे ॥ मासं. ४०।१३॥

८४८. विद्द्याञ् चाऽविद्द्याञ् च यस्त् तद् द्वेदोभयं सह ।
अविद्द्यया मृत्त्युन् तीर्त्त्वा विद्द्ययाऽमृतमश्नुते ॥ मासं. ४०।१४॥

८४९. वायुरनिलममृतमथेदम् भस्म्मान्तं शरीरम् ।
ओ३म् । क्रतोस्म् मर । क्लिबेस्म् मर । कृतँ स्मर ॥ मासं. ४०।१५॥

८५०. अग्ग्ने नय सुपथा रायेऽ अस्म्मान् व्विश्श्वानि देव वयुनानि विद्द्वान् ।
युयोद्ध्यस्म्मज् जुहुराणमेनो भूयिष्ट्ठान् ते नमऽ उक्क्तिव्ँ विधेम ॥

८५१. हिरण्ण्मयेन पात्त्रेण सत्त्यस्याऽपिहितम् मुखम् ।
योऽसावादित्त्ये पुरुषः सोऽसावहम् ॥ ओ३म् ॥ खम् ब्रह्म्म[1] ॥ ४०।१७॥

---

१. माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशतपथब्राह्म्मणान्तर्गतानाम् प्रजापतिमित्त्यादिक-पिण्डपितृ-यज्ञब्राह्म्मण(२।४।२)-महाहविषेत्त्यादिक-महापितृयज्ञब्राह्म्मण(२।६।१)-यदेतन्न्मण्डलमित्त्यादिक-मण्डलब्राह्म्मण(१०।५।२)-पञ्चैवमहायज्ज्ञाइत्त्यादिक-ब्रह्मयज्ञब्राह्म्मणे(११।५।६)-न्द्रस्स्यवैयत्रे-त्यादिकसुराहोमब्राह्म्मणे(१२।८।१)-यम्पृथिवीसर्व्वेषाम्भूतानाम्मद्ध्वित्त्यादिक-मधुब्राह्म्मणानाम् (१४।५।५) अपि ब्राह्म्मणेषु अश्नत्सु पाठः "अन्त्यानि च पवित्त्राणि" इति स्वशाखीय-श्राद्धकल्प-
→

[अन्नम् प्रकीर्य ब्राह्मणाय सकृदपो दत्त्वा श्राद्धकर्त्रा जपनीया मन्त्राः (काश्राकसू.,क.३)]

८५२. भूर्ब् भुवः स्वः। ओ३म्। तत् त्सवितुर्ब् बरेण्ण्यम् भर्ग्गो देवस्स्य धीमहि। धियो यो नः प्रचोदयात्॥ मासं. ३६।३॥

८५३. मधु बाताऽ ऋतायते मधुक् क्षरन्ति सिन्धवः। माद्ध्वीर्न् नः सन्त्वोषधीः॥ मासं. १३।२७॥

८५४. मधु नक्क्तमुतोषसो मधुमत्त् पार्त्थिवꣳ रजः। मधुद् द्यौरस्तु नः पिता॥ मासं. १३।२८॥

८५५. मधुमान् नो बनस्पतिर्म् मधुमाꣳ२ऽ अस्तु सूर्य्यः। माद्ध्वीर्ग् गावो भवन्तु नः॥ मासं.१३।२९॥

८५६. मधु मधु मधु॥ द्र.मासं. ३७।१३॥

[तृप्तिप्रश्ने श्राद्धकर्त्रा प्प्रयोज्ज्यो मन्त्रः (काश्राकसू.,क. ३,४)]

८५७. स्वदितम् ?

[अनुज्ञाने ब्राह्मणेन प्प्रयोज्ज्यो मन्त्रः (काश्राकसू.,क. ३,४)]

८५८. सुस्स्वदितम्।

[शेषान्नोपयोजने ब्राह्मणानुज्ज्ञाप्रार्थने मन्त्रः (काश्राकसू., क. ३)]

८५९. शेषमन्नम् पिण्डदानादिष्ष्वहमुपयोक्क्ष्ये[1] .

[शेषान्नोपयोगानुज्ज्ञाप्रदाने ब्राह्मणेन प्रयोज्ज्यो मन्त्रः]

८६०. उपयुङ्क्ष्व।

[पिण्डदानस्थाने दक्षिणाग्ग्राया लेखाया करणे मन्त्रः (काश्रौ. ४।१।७)]

८६१. अपहताऽ असुरा रक्क्षांꣳसि बेदिषदः॥ मासं. २।२९॥

सूत्र-वचनेनाऽनुमतोऽस्ति; स च आचारपरम्पराप्राप्तोऽप्यस्तीति च लघुस्मृतिपुराणादि- वचनाच् चतुर्वर्गचिन्तामणौ श्राद्धखण्डे हेमाद्रेरुल्लेखादपि (पृ.१०७६)अवगम्यते च; तथापीदानीं शतपथ-ब्राह्मणग्रन्थस्स्य गुरुमुखोच्चारणानूच्चारण-रूपमद्ध्ययनङ् कृतवतान् द्विजानां सुदुर्लभत्त्वात् तेषामुपयोगस् सुदुश्शक इति तानि ब्राह्मणानि अत्र न सङ्गृहीतानि। वेदाद्ध्ययनाधिकारिणान् द्विजानाङ् कृते पुराणविहित-पौराण-सप्तार्चिमन्त्र-विष्णुहृदयमन्त्र- सप्तार्चिस्तोत्र-रुचिकृत-पितृस्तव-सप्तव्याधाक्ख्यान-पितृगाथादिजपात् स्वशाखाश्राद्धकल्पसूत्र-विहितराक्क्षोघ्घ्नर्चादिजप एव समुचिततर इति पौराणसप्तार्चिमन्त्रादयोऽप्यत्र न सङ्गृहीताः। सत्कर्मरत्नावलौ परिशिष्टे प्रचलितनैपालीय-श्राद्ध-पद्धत्यादिषु च पितृ-सूक्तत्त्वेन पितृ-संहितात्त्वेन वा निर्दिष्टेषु मन्त्रेषु स्वशाखीयश्राद्धकल्पसूत्राऽननुगतत्त्वं स्वशाखोक्तकर्मादरवद्भिरवगन्तव्व्यम्। अनधीतस्वशाखा-वेदमन्त्रसंहितैरशक्तैश्च "अभावे सर्वविद्यानाङ् गायत्रीजपमाचरेत्" इति पुराणादिवचनाद् राक्षोघ्घ्नर्चादिस्स्थानेऽपि गायत्रीजप एव कार्यः।

१. पारस्क्करगृह्ह्यसूत्रे "एकादश्श्यामयुग्ग्मान्न् ब्राह्मणान्न् भोजयित्त्वा माꣳसवत्। प्रेतायोद्दिश्श्य गामप्प्येके घ्घ्नन्ति"(३।१०।४८-४९) इत्त्युक्तत्त्वाद् ऐकादशाहिकश्राद्ध-शेषभोजन-निषेधोऽस्मच्छाखायान्न प्प्रवर्तत इति प्प्रतीयते। दृश्श्यते च पक्क्षान्तरप्रदर्शकं "श्रोत्रिया भोजनीयास् तु नव सप्त त्त्रयोदश। ज्ञातयो बान्धवा वाऽपि तथा वाऽतिथयो परे" इति वृहस्पतिवचनन् चतुर्वर्गचिन्तामणौ श्राद्धखण्डे (पृ. १६०९), ब्रह्मपुराणवचन् च "सपिण्डास्तु सजातीयास्तथाऽन्येऽपि बुभुक्षिताः। दीनानाथाश्च कृपणास् तथान्नमुपभुञ्जते" इति तत्त्रैव (पृ. १६००)। प्रेतश्श्राद्धेऽपि गोत्त्रिणाम् भोजनꣳ वाराहपुराणेऽपि प्रतिपादितमस्ति १८८।३१, ३२।

[लेखायाः परस्तादुल्मुकस्य स्थापने मन्त्रः (काश्रौ. ४।१।८, मासं. २।३०)]

८६२. ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति ।
परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात् प्रणुदात्यस्मात् ॥

[प्रेतस्यावनेजने मन्त्रः (काश्रौ. ४।१।१०, .१५)]

८६३. अस्मत्पितः अमुकशर्म्मन् अमुकगोत्रप् प्रेत अवनेनिक्क्ष्व ।

[उपमूलं सकृदाच्छिन्नानि वर्हिस्तृणानि लेखायाङ् कृत्त्वा तदुपरि पिण्डस्स्य दाने मन्त्रः (काश्रौ. ४।१।११)]

८६४. अस्मत्पितः अमुकशर्म्मन् अमुकगोत्रप् प्रेत एतत् ते अन्नं स्वधा नमः[1] ।

[पिण्डोपभोगाय पिण्डोपभोक्त्रे वचनस्स्य दाने मन्त्रः (काश्रौ. ४।१।१३)]

८६५. अत्र पितरो मादयद्ध्वयँ यथाभागमावृषायद्ध्वम् ॥ मासं. २।३१॥

[वामावर्तेनोत्तराभिमुखे निरुद्धश्श्वासे श्राद्धकर्तरि पिण्डोपभोक्त्रा पिण्डोपभोगे कृते दक्क्षिणावर्तेन पिण्डाभिमुखो भूत्त्वा श्राद्धकर्त्रा जपनीयो मन्त्रः (काश्रौ. ४।१।१४)]

८६६. अमीमदन्त पितरो यथाभागमावृषायिषत ॥ मासं. २।३१॥

[पिण्डोपभोगानन्तरेऽवनेजने मन्त्रः (काश्रौ. ४।१।१५)]

८६७. अस्मत्पितः अमुकशर्म्मन् अमुकगोत्रप् प्रेत अवनेनिक्क्ष्व ।

[नीवीवँ विस्रंस्य षट्कृत्त्वः पुटाञ्जलिकरणे (नमस्करणे) मन्त्राः[2] (काश्रौ. ४।१।१५, ५।९।२०, मासं. २।३२)]

८६८. नमो वः पितरो रसाय ॥ ८६९. नमो वः पितरः शोषाय ॥ ८७०. नमो वः पितरो जीवाय ॥ ८७१. नमो वः पितरः स्वधायै ॥ ८७२. नमो वः पितरो घोराय ॥ ८७३. नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वः॥

[पिण्डस्स्याऽवेक्क्षणङ् कुर्वाणेन श्राद्धकर्त्रा जपनीयो मन्त्रः (काश्रौ. ४।१।१५,५।९।२०)]

८७४. गृहान् नः पितरो दत्त सतो वः पितरो देष्म ॥ मासं. २।३२॥

---

१. यत् तु रुद्रधरेण श्राद्धविवेके "ॐ अद्यामुकगोत्र पितरमुकप्रेत आद्यश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठताम्" इति (पृ.१०३) वाक्क्यम् प्रदर्शितम् , तथैव सत्कर्मरत्नावलौ (प्र.भा.पृ.५३६) अन्त्यकर्मदीपके (पृ.५७), नैपालीयान्त्यपद्धतिषु , वायुनन्दनमिश्रकृतश्राद्धसङ्ग्रहे (पृ.११४) च वाक्क्यं प्रयुक्तम् , तत् सर्वं स्वशाखाश्रुतिसूत्राननुकूलत्त्वादस्माभिरवधीरितम् , कात्त्यायनश्राद्धकल्पसूत्रस्थैकोद्दिष्टकण्डिकायाः प्रेतैकोद्दिष्टश्राद्धसाधारणताया अवगम्म्यमानत्वात् , तत्र पिण्डदाने "उपतिष्ठताम्" इति प्रयोगस्स्याऽविहितत्त्वात् , पिण्डदाने स्वधाशब्दप्प्रयोगस्स्याऽनिषिद्धत्त्वात् , आब्भ्युदयिके एव तस्स्य निषिद्धत्त्वेन एकोद्दिष्टेऽपि स्वधाशब्दप्प्रयोगस्स्याऽवगम्म्यमानत्त्वात् , वैजवापवाजसनेयिनां सूत्रे प्रेतोदकाञ्जलिदानेऽपि "तस्मिँस्त्त्वेकमुदकाञ्जलिम् प्रेताय दद्युरमुस्मै स्वधेति" (चतुर्वर्गचिन्तामणौ, श्राद्धखण्डे, पृ. १५८५) स्वधाशब्दप्रयोगविधेर्दृश्श्यमानत्त्वेन शाखाव्यवस्थया उदक-पिण्डादिदानवाक्क्यानावँ वैविद्ध्यस्स्यावगम्म्यमानत्त्वात् , स्वशाखाविधेरेव बलवत्तमत्त्वाच् च ।

२. एतत्कर्मविषयेऽपरिशीलितस्वशाखाश्रुतिसूत्रग्रन्था रुद्रधराद्यनुयायिनः सत्कर्मरत्नावलीकारप्प्रभृतयो नैपालीयश्राद्धपद्धतिसम्पादकाः सर्वेऽपि व्यामूढाः प्रतीयन्ते ।

[पिण्डे सूत्राणामुपासने मन्त्रः (काश्रौ. ४।१।१६-१८)]

८७५. एतद् वः पितरो वासः ॥ मासं.२।३२॥

[ब्राह्मणमाचमय्य ब्राह्मणहस्ते उदकम्, पुष्पाणि, अक्षतांश् च दत्त्वा अक्षय्योकस्य दाने मन्त्रः (काश्राकसू., क. ३,४)]

८७६. अद्यैकादशाहिकश्राद्धे अस्मत्पितुः अमुकशर्म्मणः अमुकगोत्रस्य प्रेतस्य दत्तमेतदन्नपानादिकमुपतिष्ठताम् ।

[ब्राह्मणेन प्रतिवचने प्रयोज्यो मन्त्रः]

८७७. उपतिष्ठताम् ।

[आशीःप्रार्थने श्राद्धकर्त्रा आशीर्वचने ब्राह्मणेन च यथायथम् प्रयोज्या मन्त्रा : (काश्राकसू., क. ३)]

८७८. अघोराः पितरः सन्तु । ८७९. सन्तु ।

८८०. गोत्रन् नो वर्द्धताम् । ८८१. वर्द्धताम् ।

८८२. दातारो नोऽभिवर्द्धन्ताम् । ८८३. अभिवर्द्धन्ताम् ।

८८४. वेदाश्च् च नोऽभिवर्द्धन्ताम् । ८८५. अभिवर्द्धन्ताम् ।

८८६. सन्ततिश्च् च नोऽभिवर्द्धताम् । ८८७. अभिवर्द्धताम् ।

८८८. श्रद्धा च नो माव् व्यगमत् । ८८९. मा विगमत् ।

८९०. बहुदेयञ् च नोऽस्तु । ८९१. अस्तु[1] ॥

[स्वधावाचनीयान् सपवित्रान् कुशानास्तीर्य स्वधावाचनानुज्ज्ञाप्रार्थने मन्त्रः (काश्राकसू., क. ३)]

८९२. स्वधावँ वाचयिष्ष्ये ।

[स्वधावाचनानुज्ज्ञाप्रदाने ब्राह्मणेन प्रयोज्यो मन्त्रः (काश्राकसू., क. ३)]

८९३. वाच्च्यताम् ।

[स्वधावाचने प्रयोज्य ऊहमन्त्रः]

८९४. पितृब्भ्यःप् प्रेतेब्भ्यः स्वधोच्च्यताम् ।

[स्वधावचने ब्राह्मणेन प्प्रयोज्यो मन्त्रः (काश्राकसू., क.३)]

८९५. अस्तुस् स्वधा पितृब्भ्यःप् प्रेतेब्भ्यः ।

[अस्तु स्स्वधेत्युच्च्यमाने स्वधावाचनीयेषु कुशेष्ष्वपान् निषेचने मन्त्रः (काश्राकसू., क. ३)]

८९६. ऊर्ज्जवँ वहन्तीरमृतङ् घृतम् पयः कीलालम् परिस्स्रुतम् ।
स्वधास्त् थ तर्प्पयत मे पितॄन् ॥ मासं. २।३४॥

[ब्राह्मणविसर्जने मन्त्रः (काश्राकसू., क. ४)]

८९७. अभिरम्म्यताम् ।

[ब्राह्मणेन प्प्रतिवचने प्प्रयोज्यो मन्त्रः (काश्राकसू., क. ४)]

८९८. अभिरताः स्मः ।

---

१. अन्नञ्च नो बहु भवेदित्त्यादिकं स्वसूत्रेऽनुपदिष्टत्त्वादनावश्श्यकम् ।

[विसृष्टब्राह्म्मणानुव्व्रजनमन्त्रः (काश्राकसू., क. ३, मासं-९।१९)]

८९९. आ मा वाजस्स्यप् प्रसवो जगम्म्यादेमेद् द्यावापृथिवी विशश्वरूपे।
आ मा गन्ताम् पितरा मातरा चा मा सोमोऽ अमृतत्त्वेन गम्म्यात् ॥

[ब्राह्म्मणनमस्कारात् पूर्वं श्राद्धकर्त्रा प्रयोज्ज्यलं लौकिकम् प्रियवाक्क्यम्[1]]

९००. अद्य मे सफलञ् जन्म भवत्पादाब्जवन्दनात्।
अद्य मे वंशजास् सर्वे याता वोऽनुग्ग्रहाद् दिवम्॥
पत्त्रशाकादिदानेनक् क्लेशिता यूयमीदृशाः।
तत् क्लेशमिह सञ्जातवँ विस्मृत्त्यक् क्षन्तुमर्हथ ॥

(प्रेतमुद्दिश्श्य सवँवत्सरम् अहरहर् अन्नस्स्य उदकुम्भस्स्य च दाने मन्त्राः[2])

[द्वादशेऽह्नि सपिण्डने कर्तव्व्ये प्रथमेऽब्दे प्रत्त्यहङ् कर्तव्व्यस्स्य अन्नस्स्योदकुम्भस्स्य च दानस्स्य एकादशेऽह्नि अपकर्षङ् कृत्त्वा एकादशाहप्प्रभृत्त्यब्दपूर्तिदिनपर्यन्तदिनसङ्ख्यासमसङ्ख्यानि सोपस्करा-मान्नपात्त्राणि तत्सङ्ख्यासम सङ्ख्याकानुदकुम्भाँश्च मण्डले स्थापयित्त्वा कुशवटुरूपम् ब्राह्म्मणञ् च स्थापयित्त्वा ब्राह्म्मणन् देयामान्नपात्त्रोदकुम्भाँश् च गन्धादिभिः सम्पूज्ज्य ब्राह्म्मणाय दाने[3] तदङ्गदक्क्षिणादाने च कर्त्रा प्रयोज्ज्ये वाक्क्ये]

९०१. इहाऽद्य लोकान्तरगमनैकादशाहप्प्रभृत्त्यब्दपूर्तिदिनपर्यन्त-दिनसङ्ख्या-समसङ्ख्याकानि एतानि सोपस्क्करामान्नपात्त्राणि तत्सङ्ख्यासमसङ्ख्या-नेतानुदकुम्भाँश्च लोकान्तरगमनैकादशाहप्प्रभृत्त्यब्दपूर्तिदिनपर्यन्तम् प्रत्त्यहम् अस्मत्पितुः अमुकशर्म्मणः अमुकगोत्त्रस्स्यप् प्रेतस्स्य क्षुत्-पिपासयोरुपशमाय कुशवटुशर्म्मणे काश्श्यपगोत्त्राय सुपूजिताय ब्राह्म्मणाय तुभ्यमहं सम्प्रददे[4] तत् सन् न मम।

---

१. "इत्त्युक्त्वोक्त्वा प्रिया वाचः प्रणिपत्त्य विसर्जयेत्" इति याज्ञवल्क्यस्मृतौ (१।२४७)।

२. एकादशेऽह्नि कर्तव्व्यत्त्वेन लघुस्मृतिपुराणादिषु प्रतिपादितानि शय्यादानवृषोत्सर्गादीनि कर्माणि स्वसूत्रे एकादशेऽह्नि नियततया नोक्तानीति तानि कर्माणि एकादशेऽह्नि कृताकृतानि। अतस् तन्मन्त्रा अत्र न सङ्गृहीताः।

३. वस्तुतः एतद्दानेनैव पारस्क्करगृह्य्यसूत्र-कात्त्यानश्राद्धकल्पसूत्त्रानुसारिणाम् माद्ध्यन्दिनीय-वाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिनान् द्विजानां स्मृत्त्यन्तरपुराणाद्युक्तमासिकोनमासिकादि-श्राद्धफलसिद्धिर् मुक्ख्यकल्पसन्निहिततरानुकल्पानुष्ठानजा भवतीति मासिकादिश्राद्धकरण-मनावश्श्यकम्, मासिकादिश्राद्धविधेः पारस्क्करगृह्य्यसूत्त्रेऽभावात्, अहरहर् अन्नस्स्योदकुम्भस्स्य च दानस्स्यैव पिण्डदानेन सहितस्स्य रहितस्स्य वा विधेस् तत्र सत्त्वात्, मासिकादिश्श्राद्धानाम् प्रतिदिनं सान्नोदकुम्भदानङ् कर्तुमशक्तानाङ् कृतेऽनुकल्पतया विहितत्त्वस्स्य श्रुतिस्मृतिपुराणादि-ग्रन्थपर्यालोचनेन युक्त्यनुशीलनेन च प्प्रतीयमानत्त्वाच् च। कैश्चित् तु "अत ऊर्ध्वम् प्रत्त्यहवँ वा प्रतिमासमथाऽपि वा। यावत्सवँवत्सरन् दद्याच् श्राद्धमस्मै स्वशक्तितः" इति स्फुटमुक्तम् (वसिष्ठस्मृतौ ६।३७४, स्मृतिसन्दर्भे, पृ. २२२०) इत्त्यप्प्यत्र स्मर्तव्व्यम्। याज्ञवल्क्यस्मृतावपि शुक्लयजुर्वेदपञ्चदश-शाखासाधारणतयाऽभिमतायाम् पारस्क्कर-गृह्य्यसूत्र-कात्त्यायनश्राद्धकल्प-सूत्त्राऽननुकूलानावँ विधीनामपि दर्शनादननुकूलांशे तस्स्या बैजवापादि-शाखान्तरमूलताया निश्चयात् तस्स्या अपि माद्ध्यन्दिनीयवाजसनेयिभिस् सर्वथैवाऽनुसरणीयता तु नास्तीत्त्यपि बोध्यम्। एतेनाऽन्य-लघुस्मृति-पुराणादिविधयोऽपि व्याक्ख्याताः।

४. यद्यपि उदकुम्भदाने रुद्रधर-विश्श्वनाथ-सत्कर्मरत्नावलीकारादिभिः "ॐ अद्याऽमुकगोत्र पितरमुकप्रेताऽयं सान्नोदकुम्भस्ते मया दीयते तवोपतिष्ठताम्" (श्राद्धविवेके, पृ. १०८,

९०२. इहाऽद्य कृतस्यैतस्य सोपस्करामान्नपात्राणामुदकुम्भानाञ्च दानस्य प्रभावस्य सम्पत्तये एतानि रौप्यखण्डानि चन्द्रदैवतानि (रौप्यखण्डनिष्क्रय-रूपनाणकपत्राणि विष्णुदैवतानि) कुशवटुशर्मणे काश्यपगोत्राय सुपूजिताय ब्राह्मणाय तुभ्यमहं सम्प्रददे तत् सन् न मम ।

[अब्दपूर्तौ सपिण्डने कर्तव्ये प्रथमेऽब्दे एकादशाहात् प्रभृति प्रत्यहङ् कर्तव्ये अन्नस्य उदकुम्भस्य च दाने तथा कर्तुमशक्तौ प्रथममासे प्रत्यहम् एकादशाहप्रभृति कर्तव्यस्य अन्नस्योदकुम्भस्य च दानस्य एकादशेऽह्नि अपकर्षङ् कृत्वा एकादशाहप्रभृतिद्वितीयमासिकक्षयाहपूर्वदिनपर्यन्तदिन-सङ्ख्यासमसङ्ख्यानि सोपस्करामान्नपात्राणि तत्सङ्ख्यासमसङ्ख्याकानुदकुम्भाँश्च मण्डले स्थापयित्वा कुशवटुरूपम् ब्राह्मणञ्च स्थापयित्वा ब्राह्मणन् देयामान्नपात्रोदकुम्भाँश्च गन्धादिभिः सम्पूज्य ब्राह्मणाय दाने तदङ्गदक्षिणादाने च कर्त्रा प्रयोज्ये वाक्ये]

९०३. इहाऽद्य लोकान्तरगमनैकादशाहप्रभृतिद्वितीयमासिकक्षयाहपूर्वदिनपर्यन्त-दिनसङ्ख्यासमसङ्ख्याकानि एतानि सोपस्करामान्नपात्राणि तत्सङ्ख्या-सम-सङ्ख्याकानेतानुदकुम्भाँश्च लोकान्तरगमनैकादशाहप्रभृतिद्वितीय-मासिकक्षयाहपूर्वदिनपर्यन्तम् प्रत्यहम् अस्मत्पितुः अमुकशर्मणः अमुक-गोत्रस्य प्रेतस्य क्षुत्पिपासयोरुपशमाय कुशवटुशर्मणे काश्यप-गोत्राय सुपूजिताय ब्राह्मणाय तुभ्यमहं सम्प्रददे तत् सन् न मम ।

९०४. इहाऽद्य कृतस्यैतस्य सोपस्करामान्नपात्राणामुदकुम्भानाञ्च दानस्य प्रभावस्य सम्पत्तये एतानि रौप्यखण्डानि चन्द्रदैवतानि (रौप्यखण्ड-निष्क्रयरूप-नाणकपत्राणि विष्णुदैवतानि) कुशवटुशर्मणे काश्यपगोत्राय सुपूजिताय ब्राह्मणाय तुभ्यमहं सम्प्रददे तत् सन् न मम[1] ।

विश्वनाथभाष्ये, पृ. ३८४, सत्कर्मरत्नावलौ प्रथमे भागे, पृ. ५३९) इत्येवम्प्रकारकवँ वाक्यम् प्रदर्शितम् , तदनुरूपाण्येव वाक्यानि नैपालीयान्त्यपद्धतिष्वपि प्प्रदर्शितानि; तथापि पारस्करेण "अहरहरन्नमस्मै ब्राह्मणायोदकुम्भञ्च दद्यात्" इति (३।१०।५४) प्रेत-मुद्दिश्यान्नस्योदकुम्भस्य च ब्राह्मणाय दानमेव मुख्यतया विहितम् , तद्व्याख्याने कर्कोपाध्यायानुयायिना जयरामेण हरिहरेण च प्रेतमुद्दिश्य सम्प्रदानभूताय ब्राह्मणाय दानमेव प्प्रतिपादितमिति तदनुरूपमेव दानवाक्यमत्राऽस्माभिः प्रतिपादितमिति सुधीभिर् विवेक्तव्यम् । मतान्तरे पिण्डदानस्याऽपि प्रदर्शनेन सूत्रकारेण सूचितमन्नोदकुम्भदानसहितस्य अहरहश्श्राद्धस्य प्रयोगम् प्रदर्शयन् नित्यानन्दो यद्यपि तत्र "अद्येह अमुकगोत्राय अस्मत्पित्रे अमुकशर्मणे वसुस्वरूपाय इदमन्नं सोदकुम्भं सोपस्करं यत् परिविष्टं यत् परिवेक्ष्यमाणममृतस्वरूपं ते स्वधा" इति व्यामूढतयेव प्रयुक्तं वाक्यम् प्रदर्शयति (अन्त्यकर्मदीपके, पृ. ९९), तथापि पिण्डदानाभावे सान्नोदकुम्भमात्रदाने तु तेनाऽपि कपिलादानानन्तरवँ वृषोत्सर्गात् प्रागेव सान्नोदकुम्भदानम् प्रदर्शयता मरणदिनादारभ्येति च प्प्रयुञ्जानेन अस्मत्प्रदर्शितवाक्यसदृशमेव वाक्यम् प्रदर्शितमस्ति (अन्त्यकर्मदीपके, पृ. ४५) ।

१. अब्दपूर्तावेव सपिण्डने कर्तव्ये सति एवमेव "द्वितीयमासिकक्षयाहप्रभृति-तृतीयमासिकक्षयाह-पूर्वदिनपर्यन्तम्" इत्यादीनां यथोचितपदानाम् प्रयोगेण द्वितीयमासिकादिषु वाक्यानि प्रयोक्तव्यानि ।

[द्वादशेऽहन्नि सपिण्डने सर्वँवत्सरम् प्रत्यहङ् कर्तव्व्यस्स्य अन्नस्स्योदकुम्भस्स्य च दानस्स्याऽपि अपकर्षङ् कृत्त्वा[1] कृतेऽपि प्रथमेऽब्दे प्रत्त्यहमन्नस्स्योदकुम्भस्स्य च दाने कर्तव्व्ये सति[2] तथा कर्तुमशक्तौ प्रथममासे प्रत्त्यहङ् कर्तव्व्यस्स्य अन्नस्स्योदकुम्भस्स्य च दानस्स्य द्वादशेऽहन्नि अपकर्षङ् कृत्त्वा लोकान्तरगमनद्वादशाहप्रभृतिद्वितीयमासिकक्षयाहपूर्वदिनपर्यन्तदिनसङ्ख्यासमसङ्ख्याकानि सोपस्करामान्नपात्त्राणि तत्सङ्ख्यासमङ्ख्याकानुदकुम्भाँश्च मण्डले स्थापयित्त्वा कुशवटुरूपम् ब्राह्म्मणञ्च स्थापयित्त्वा ब्राह्म्मणन् देयसोपस्करामान्नपात्त्रोदकुम्भाँश्च गन्धादिभिः सम्पूज्ज्य ब्राह्म्मणाय दाने तदङ्गदक्षिणादाने च कर्त्रा प्रयोज्ज्ये वाक्क्ये]

९०५. इहाऽद्द्य लोकान्तरगमनद्वादशाहप्रभृतिद्वितीयमासिकक्षयाहपूर्वदिनपर्यन्त-दिनसङ्ख्या-समसङ्ख्याकानि एतानि सोपस्करामान्नपात्त्राणि तत्सङ्ख्या-समसङ्ख्याकानुदकुम्भाँश्च लोकान्तरगमनद्वादशाहप्प्रभृतिद्वितीयमासिकक्-क्षयाहपूर्वदिनपर्यन्तम् प्रत्त्यहम् अस्मत्पितुः अमुकशर्मणः अमुकगोत्त्रस्स्य क्षुत्पिपासयोरुपशमाय कुशवटुशर्मणे काश्श्यपगोत्त्राय सुपूजिताय ब्राह्म्मणाय तुब्भ्यमहं सम्प्रददे तत् सन् न मम[3]।

---

१. द्वादशेऽह्न्नि सपिण्डने कर्तव्व्ये सत्त्यपि सर्वँवत्सरम् प्रत्त्यहङ् कर्तव्व्यस्स्य अन्नस्स्योदकुम्भस्स्य च दानस्स्य एकादशेऽहन्नि अपकर्षङ् कृत्त्वैव द्वादशेऽहन्नि सपिण्डनङ् कर्तव्व्यमिति नियमो नास्ति, अशक्तिकृत एव एकादशेऽहन्नि तदपकर्ष इति वीरमित्त्रोदये समयप्रकाशे उक्तम् (पृ. २१७)। तन्मते द्वादशेऽहन्नि सपिण्डने कर्तव्व्येऽपि एकादशेऽहन्नि तद्दिनसम्बद्धस्स्य एकस्स्यैव सोपस्करामान्नपात्त्रस्स्य उदकुम्भस्स्य च दानङ् कर्तव्व्यम्। शक्त्तेन सर्वँवत्सरयँ यावत् प्रतिदिनमेव च सोपस्करामान्नपात्त्रस्स्य उदकुम्भस्स्य च दानङ् कर्तव्व्यम्। तत्पक्क्षे सोपस्करामान्नपात्त्रमुदकुम्भञ्च मण्डले स्थापयित्त्वा कुशवटुरूपम् मुक्ख्यमेव वा ब्राह्म्मणं च स्थापयित्त्वा गन्धादिभिः सम्पूज्ज्य "इहाऽद्द्य एतत् सोपस्करमामान्नम् एतमुद-कुम्भञ्च अस्मत्पितुः अमुकशर्मणः अमुकगोत्त्रस्स्य (प्रेतस्स्य) क्षुत्पिपासयो-रुपशमाय कुशवटुशर्मणे (अमुकशर्मणे) काश्श्यपगोत्त्राय (अमुकगोत्त्राय) सुपूजिताय ब्राह्म्मणाय तुब्भ्यमहं सम्प्रददे तत् सन् न मम" इति दानवाक्क्यम्। "इहाऽद्द्य कृतस्स्यैतस्स्य सोपस्करामान्नस्स्य उदकुम्भस्स्य च दानस्स्य प्रभावस्स्य सम्पत्तये एतद् रौप्प्यखण्डञ् चन्द्रदैवतम् (रौप्प्यखण्डनिष्क्रय-रूपनाणकपत्त्रवँ विष्णुदैवतम्) कुशवटुशर्मणे (अमुकशर्मणे) काश्श्यपगोत्त्राय (अमुकगोत्त्राय) सुपूजिताय ब्राह्म्मणाय तुब्भ्यमहं सम्प्रददे तत् सन् न मम" इति दानप्रतिष्ठावाक्क्यञ् च प्रयोक्त्तव्व्यम्। अस्माभिस्तु मासिकोनमासिकश्श्राद्धादीनि सान्नोद-कुम्भश्श्राद्धस्स्यैवाऽनुकल्पा इति विचार्य ऊनमासिकादिश्श्राद्धापकर्षवचनान्येव सान्नोद-कुम्भदानापकर्षस्स्याऽऽक्क्षेपकाणि वचनानीति स्वीकृत्त्याऽपकर्षपक्क्षे वाक्क्यम् प्रदर्शितम्।

२. "अहरहरन्नमस्म्मै ब्राह्म्मणायोदकुम्भञ् च दद्द्यात्" इति पारस्क्करसूत्र- (३।१०।५४)स्वरसात् "अर्वाक् सपिण्डीकरणयँ यस्स्य सर्वँवत्सराद् भवेत्। तस्स्याऽप्प्यन्नं सोदकुम्भन् दद्द्यात् सर्वँवत्सरन् द्विजे" इति याज्ञवल्क्यस्मृति-(१।२५५)-वचनाच् च द्वादशाहे सपिण्डने सान्नोदकुम्भदानापकर्षे कृतेऽपि तदुत्तरम् प्रेतमुद्दिश्श्य अन्नस्स्योदकुम्भस्स्य च वत्सरम् प्रत्त्यहन् दानङ् कर्तव्व्यमेव शक्त्तेनेति गम्म्यते।

३. एवमेव द्वितीयमासिकक्क्षयाहप्रभृतितृतीयमासिकक्षयाहपूर्वदिनपर्यन्तदिनसङ्ख्यासमसङ्ख्याकादी-नां सोपस्करामान्नपात्त्राणामुदकुम्भानाञ्च दानेषु द्वितीय-तृतीय-चतुर्थ-पञ्चम-षष्ठ-सप्तमा-ऽष्टम-नवम-दशमै-ऽकादश-द्वादशमासिकक्षयाहेषु वाक्क्यान्यूह्म्यानि।

१०६. इहाऽद्य कृतस्स्यैतस्स्य सोपस्करामान्नपात्त्राणामुदकुम्भानात्र् च दानस्स्य प्रभावस्स्य सम्पत्तये एतानि रौप्यखण्डानि चन्द्रदैवतानि (रौप्य-खण्ड-निष्क्रय-रूपनाणकपत्त्राणि विष्णुदैवतानि) कुशवटुशर्मणे काश्शयपगोत्त्राय सुपूजिताय ब्राह्म्मणाय तुब्भ्यमहं सम्प्रददे तत् सन् न मम[1]।

(सपिण्डीकरणे श्राद्धे[2] आवश्श्यका अवशिष्टा मन्त्राः)

[विश्श्वेषान् देवानामावाहनेऽनुज्ञायाः प्रार्थने मन्त्रः (काश्राकसू., क. २)]

१०७. विश्श्वान् देवानावाहयिष्ष्ये ।

---

१. एवङ् कर्तुमशक्तौ द्वादशाह-द्वितीयमासिकक्क्षयाहादिषु एकैक एव सोपस्करामान्नसहित उदकुम्भो वचनोहेन ब्राह्म्मणाय दातव्य इत्त्यापत्कल्पो मासिकश्राद्धविधायकस्मृतिवचनाकूतानुगृहीतोऽवगन्तव्यः ।

२. "श्राद्धानि षोडशाऽदत्त्वा नैव कुर्यात् सपिण्डताम् । श्राद्धानि षोडशाऽऽपाद्य विदधीत सपिण्डताम्" (मिताक्षरायाम् १।२५५) इत्त्यादीनावँ वचनानामर्वाचीनानान् निवन्धेषु सत्त्वेऽपि षोडशानां श्राद्धानाङ् गणनायामेव ब्रह्म्मपुराणवचने, भविष्य्यपुराणवचने, छन्दोगपरिशिष्टवचने, मदनरत्नादिधृतजातूकर्ण्यवचने, व्यासवचनादिषु च (द्र.- निर्णयसिन्धौ पृ. ४२२; वीरमि. शुद्धिप्र. पृ. २३०-२३२ , समयप्र. पृ. २०८-२१३, चतुर्वर्गचिन्तामणौ श्राद्ध. पृ. २९४-२९९) विगानस्स्य दर्शनात् , कुत्र चित् "यस्स्य सवँवत्सरादर्वाक् सपिण्डीकरणम् भवेत् । मासिकञ् चोदकुम्भञ् च देयन् तस्स्याऽपि वत्सरम्" इत्त्यादिके वचने (द्र. मिताक्षरायाम् १।२५५; गरुडपुराणप्रेतखण्डे वेङ्कटेश्शवरसँस्करणे ५।६४, वीरमि. शुद्धि. पृ. २३२, समय. पृ. २१५, चतुर्. श्राद्ध. पृ. १६१५) विष्णुधर्मसूत्त्रादौ च मासिकश्श्राद्ध-सान्नोदकुम्भदानयोः समुच्चयस्स्य प्रतीयमानत्त्वेऽपि ऋषिणा पारस्क्करेण अन्नोदकुम्भयोर् दानस्स्यैव विहितत्त्वाद् मासिकश्श्राद्धस्स्याऽविहितत्त्वात्, गौतम-पितृमेधसूत्त्रे बौधायनपितृमेधसूत्त्रमूलभागे च मासिकानामेव विहितत्त्वात् सान्नोदकुम्भ-दानस्स्याऽविहितत्त्वाद् यथाशाखवँ व्यवस्थया तयोर् द्वयोः पक्षयोरेकतरस्स्यैवाऽनुष्ठानेन प्रेतोपकारसिद्धेरवगम्म्यमानत्त्वात्, मासिकश्श्राद्धानाम् पारस्क्करोक्तदैनिकपिण्डदानसान्नोदकुम्भ-दानपक्षानुकल्पतायाः "अत ऊर्ध्वम् प्रत्यहवँ वा प्रतिमासमथाऽपि वा । यावत् सवँवत्सरन् दद्याच् छ्राद्धमस्मै स्वशक्तितः" इत्त्यादेर् (वसिष्ठस्मृतौ ६।३७४, स्मृतिसन्दर्भे, पृ. २२२०) "द्वादशाहे कृतं सर्ववँ वर्षयँ यावत् सपिण्डनम् । पुनः कुर्यात् सदा नित्त्यङ् घटान्नम् प्रतिमासिकम्" (गरुड. प्रेत. वेङ्कट. २६।६४) इत्त्यादेश् च वचनादपि प्रतीयमानत्त्वात् , मानुषमासेन पितॄणामेकोऽह्नोरात्त्र इति व्यवस्थाया इव मानुषमासेन प्रेतानामेकोऽह्नोरात्त्र इति व्यवस्थायाश् शास्त्रेऽदर्शनात् ; प्रत्त्युत "गानुषेण दिनेनैव प्रेतलोके दिनं स्गृतग् । तस्गाद् दिनेदिने देयग् प्रेतायाऽन्नात्र् च वत्सरग् " इत्याद्युक्तीनागेव स्कान्दादिषु दर्शनात् (स्क. १।२।५०।८६, विष्णुधर्गोत्तरे २।११३।१४-, २।११६।३५); श्राद्धषोडशक-वाचोयुक्तावपि"मलिनश्श्राद्धसञ्ज्ञानम् पूर्वषोडशकन् तथा । स्थाने द्वारे चार्धमार्गे चितायां शवहस्तके ॥ श्मशानवासिभूतेब्भ्यः पञ्चमम् प्रातिवेश्श्यकम् । षष्ठं सञ्चयने प्रोक्तन् दश पिण्डा दशाहिकाः ॥ श्राद्धषोडशकन् चैतत् प्रथम् परिकीर्तितम् । अन्न्यच्च षोडशम् मद्ध्ये द्वितीयन् तार्क्ष्य मे शृणु ॥ कर्तव्व्यानीह विधिना श्राद्धान्येकादशैव तु । ब्रह्म्मविष्णु-शिवादीनान् तथान्न्यच् छ्राद्धपञ्चकम् ॥ एवं षोडशकम् प्राहुरेतत् तत्त्वविदो जनाः । द्वादश प्प्रतिमास्स्यानि श्राद्धमेकादशे तथा ॥ त्रिपक्षसम्भवञ् चैव द्वे रिक्ते खग षोडश । आद्यं शवविशुद्ध्यर्थङ् कृत्त्वान्य्यच्च त्रि- (द्वि ?-) षोडशम् ॥ पितृपङ्क्तिविशुद्ध्यर्थं शतार्धेन तु योजयेत् । शतार्धेन विहीनो यो मिलितः पितृभाङ् न हि ॥ चत्त्वारिंशत् तथैवाष्ट श्श्राद्धम् प्रेतत्त्वनाशनम् । सकृदूनशतार्धेन सम्भवेत् पितृसन्निधिः । मेलनीयः शतार्धेन सद्भिः श्राद्धेन तत्त्वतः" (गरुड. प्रेत. वेङ्कट. ३५।३३-४०, जीवानन्द. २५।३२-४०; द्र. गरुड.प्रेत. वेङ्कट. ५।३०-५४; सङ्क्षिप्तप्रेतखण्डगरुडपुराणे १२।५९-७०) इति गरुडपुराणवाचोयुक्ताविव स्वशाखासूत्त्राऽननुकूलताया दर्शनात् ; "दक्षिणाग्ग्रहस्तयोस् तु कृत्त्वाऽथ सतिलञ् जलम् । आदायाञ्जलिना याम्म्यान् दुःखी पैतृकतीर्थतः ॥ एकवारन् त्रिवारवँ वा दशवारमथाऽपि वा । भूमावश्मनि वा सर्वे क्षिपेयुर् वाग्यताः खग ॥ तृप्य्यतु तृप्य्यतावँ वाऽपि तर्पयाम्म्युपतिष्ठताम् । प्रेतैतदमुक-

[विश्श्वेषान् देवानामावाहनेऽनुज्ञायाः प्रदाने मन्त्रः[1] (काश्राकसू., क. २)]

१०८. आवाहय ।

[विश्श्वेषान् देवानामावाहने मन्त्रः (काश्राकसू., क. २)]

१०९. विश्श्वे देवासऽ आगत शृणुता मऽ इमᳪ हवम् ।
एदम् बर्हिर्न् निषीदत ॥ मासं.७।३४॥

गोत्रेत्युक्तेष्वेवं समुच्चरेत्" (गरुड. प्रेत. वेङ्कट. ४।७५-७७) इत्यत्रोक्तानाम् पक्षाणाम् मद्ध्ये यथा स्वशाखानुकूलस्यैव पक्षस्स्याऽनुष्ठेयत्त्वन् तथैव लघुस्मृति-पुराणाद्युक्तानाङ् कर्मणाम् मद्ध्येऽपि स्वशाखोक्तस्स्यैव कर्मणः अनुष्ठेयत्त्वमित्त्यवगमात्, "यावदुक्तं स्वस्वसूत्रे न कृतन् तावदेव तत्। परोक्तवं वा विमिश्श्रवं वा कृतमप्यकृतम् भवेत्" इति कल्पसूत्रकृदृषिहृदयविदाम् मनीषिणामुक्तेर् दर्शनात्; याज्ञवल्क्यस्मृतौ अर्वाक्सपिण्डीकरणमित्त्यादिश्लोकानन्तरम् मृतेऽहनि प्रकर्तव्व्यमित्त्यादेर् मृताहनि तु कर्तव्व्यमित्त्यादेर् वा श्लोकस्स्य पठितत्त्वात्, प्रतिदिनं सोदकुम्भान्नदानङ् कर्तुमशक्तौ मृताहनि तु प्रतिमासवं वत्सरयं यावत् सोदकुम्भान्नदानमवश्श्यङ् कर्तव्व्यमिति अनुकल्पविधानपरेययं याज्ञवल्क्यस्मृत्त्युक्तिरिति स्फुटम् प्रतीयमानत्त्वात्, तस्स्यास् तु स्मृत्यन्तरविहित-मासिकैकोद्दिष्टश्राद्धवासनापहृतबुद्धिभिरन्न्यथाव्याक्ख्यायाः कृतत्त्वस्स्य प्रतीयमानत्त्वात्, मृताहनीत्त्यादिश्लोकपाठेऽपि विश्श्वरूपविज्ञानेश्श्वरयोर् महतो विगानस्स्य दर्शनात्, याज्ञवल्क्यस्मृतिवचनस्स्य मासिकसान्नोदकुम्भदानभिन्नमासिकैकोद्दिष्टश्राद्ध-विधानपरत्त्वेऽपि तत्र ऊनमासिकत्रैपक्षिकोनषाण्मासिकोनाब्दिकानामनुल्लेखाद् याज्ञवल्क्य-वचनस्स्य श्राद्धषोडशकवाचोयुक्त्यननुकूलताया दर्शनात्, याज्ञवल्क्य-स्मृत्त्युक्तमासिकानान् च वैजवापवाजसनेयिशुक्लयजुर्वेद-शाखाद्ध्याय्यादिभिरनुष्ठेयत्त्वेऽपि माद्ध्यन्दिनीय-वाजसनेयिभि-रनुष्ठातुमनावश्श्यकत्त्वस्स्याऽवगमात्, विज्ञानेश्श्वरेणाऽपि मिताक्षरायाम् "सवंवत्सरादर्वाक् सपिण्डीकरणयं यस्स्य कृतन् तस्स्य तदुद्देशेन *प्रतिदिवसम् प्रतिमासवं वा* यावत्सवंवत्सरं शक्त्यनुसारेणाऽन्नमुदकुम्भसहितम् *ब्राह्म्मणाय दद्यात्*" इत्त्युक्तत्त्वाद् (१।२५५) मासिकोदकुम्भ-श्राद्धस्स्य दैनिकोदकुम्भश्राद्धानुकल्पताया एव प्रतीयमानत्त्वात्, आचारेऽपि अनुमासिकेषु तु सान्नोदकुम्भश्श्राद्धस्स्यैव नैपालद्विजेषु दृश्श्यमानत्त्वात्; "तत्र सपिण्डीकरणङ् कृत्त्वा स्वकाल एवैतानि कर्तव्व्यानीति प्रथमः कल्पः, अप्राप्तकालत्त्वेन प्रागनधिकारात्; यद्यपि वचनं षोडशश्राद्धानि कृत्त्वैव सपिण्डीकरणं सवंवत्सरात् प्रागपि कर्तव्व्यमिति सोऽयमापत्कल्पः" इति च मिताक्षरायामुक्तत्त्वाच् (१।२५५) च सपिण्डीकरणात् पूर्वं श्राद्धषोडशकं सवैरेव कर्तव्व्यमेवेति नियमस्स्याऽभावस्स्य स्फुटत्त्वात्; निर्णयसिन्धावपि मासिकादिश्राद्धषोडशकविषये "अत्र देशकुल-शाखाभेदाद् व्यवस्थेति सर्वनिबन्धाः" (पृ. ४२२) इत्त्युक्तत्त्वात्, वस्तुतस्तु "नवश्श्राद्धादिश्राद्धानि न कृतानि तु यस्स्य वै। नाऽधिकारी भवेत् तत्र मासषाण्मासिकाब्दिके" इति वचने (चतुर्वर्ग-चिन्तामणौ श्राद्धखण्डे, पृ. १५९८) सत्त्यपि तेषान् नवश्श्राद्धानावं विषमश्श्राद्धापराभिधानानाम् माद्ध्यन्दिनीय-वाजसनेयि-शाखा-सूत्रादिषु अविहितत्त्वात् तेषामकरणेनैव माद्ध्यन्दिनीय-वाजसनेयिनामुत्तरकर्मसु अधिकारस्स्य सिद्धेरिव श्राद्धषोडशकपक्षस्स्यैव परोक्तत्त्वा-दननुष्ठानेनैव स्वशाखोक्त-सवंवत्सरावधिकदैनिकान्नोदकुम्भदानानुष्ठानेनैव माद्ध्यन्दिनीय-वाजसनेयिनां सपिण्डनेऽधिकारस्स्य सिद्धेर् न्याय्यत्त्वाच् श्राद्धषोडशकादिविधायकवचनानान् च स्वस्वसूत्राद्युक्तपूर्वसम्पादनीयावश्श्यककर्मसम्पादना नन्तरमेव सामान्यतयोत्तरकर्मस्स्वधिकार इति प्रतिपादने एव तात्पर्यस्स्य गृह्य्यमाणत्त्वाच् च पारस्करगृह्य्यसूत्र-कात्त्यायनश्राद्ध-कल्पसूत्रानुसारिणाम् माद्ध्यन्दिनीय-वाजसनेयिशुक्ल-यजुर्वेद-शाखाद्ध्यायिनान् द्विजानाङ् कृते श्राद्धषोडशकस्स्याऽनावश्श्यकत्त्वाच् श्राद्धषोडशक-सम्पादनायाऽवश्श्यकानि वाक्क्यानि असङ्-गृह्य्यैवाऽत्र सपिण्डीकरणायाऽऽवश्श्यका मन्त्रास् सङ्गृहीता इति बोद्ध्यम्।

१. वैश्श्वदेवब्राह्म्मण-पितृपितामहप्प्रपितामहब्राह्म्मणनिमन्त्रणादिवाक्क्यानि ऐकादशाहिकश्राद्धप्रकरणे प्रदर्शितेषु वाक्क्येषु ऐकादशाहिकश्राद्धपदोद्वापेन सपिण्डीकरणश्राद्धपदावापेन प्रेतपदोद्वापेन वसुस्स्वरूपादिपदावापेन चेति यथार्थङ् कल्पयित्वा सपिण्डीकरणश्श्राद्धे प्रयोक्तव्व्यानि।

[वैश्शवदेवश्राद्धदेशे तिलान्[1] विकीर्य जपनीयो मन्त्रः (काश्राकसू., क. २, मासं. ३३।५३)]

९१०. बिश्श्वे देवाः शृणुतेम हवम् मे येऽ अन्तरिक्क्षे यऽ उपद् द्यविष्ट् ठ ।
येऽअग्ग्निजिह्वाऽउत वा यजत्त्राऽआसद्द्याऽस्म्मिन्न्बर्हिषि मादयद्ध्वम् ॥

[पितॄणामावाहनेऽनुज्ज्ञायाः प्रार्थने मन्त्रः (काश्राकसू., क. २)]

९११. पितॄनावाहयिष्ष्ये ।

[पितॄणामावाहनेऽनुज्ज्ञायाः प्रदाने मन्त्रः (काश्राकसू., क. २)]

९१२. आवाहय ।

[पितॄणामावाहने मन्त्रः (काश्राकसू., क.२)]

९१३. उशन्तस्त् त्वा निधीमह्युशन्तः समिधीमहि ।
उशन् नुशतऽ आ वह पितॄन् न्हविषेऽ अत्तवे ॥ मासं. १९।७० ॥

[पितृश्राद्धदेशे तिलान् विकीर्य जपनीयो मन्त्रः (काश्राकसू.क.२, मासं. १९।५८)]

९१४. आ यन्तु नः पितरः सोम्म्यासोऽग्ग्निष्ष्वात्ताः पथिभिर्द् देवयानैः ।
अस्म्मिन् न्यज्ज्ञेस् स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्म्मान् ॥

[विश्श्वेब्भ्यो देवेब्भ्योऽर्घस्स्य दाने मन्त्रः (काश्राकसू., क. २)]

९१५. (अद्द्याऽस्मत्पितुरमुकशर्म्मणोऽमुकगोत्त्रस्स्य प्रेतस्स्य[2] सपिण्डीकरणन् निमित्त-मनुसृत्त्य क्रियमाणेन अस्मत्पितासह-प्रपितामह-वृद्धप्रपितामहानाममुकशर्मा-मुकशर्मामुकशर्मणाममुकगोत्त्राणावँ वसुस्स्वरूपरुद्द्रस्स्वरूपादित्त्यस्स्वरूपाणाम् पार्वणश्श्राद्धेन प्रेतश्श्राद्धसहितेन सम्वद्धे वैश्शवदेविकश्श्राद्धे) विश्श्वे देवा एष वोऽर्ग्घः ।

---

१. वैश्शवदेवश्श्राद्धदेशे यवा विकरणीया इत्त्यन्न्ये मन्न्यन्ते, स्वसूत्त्रे विशेषस्याऽनुक्तत्वात् तिला एव विकरणीया न यवा इति वयम् मन्न्यामहे , कर्कोपाद्ध्यायसम्मतश् चाऽयम् पक्क्षः ।

२. "पिण्डकरणेप् प्रथमःप् प्रेतः स्यातत् पुत्त्रवाँश्च् चेत्" इति पारस्क्करवचनात् (३।१०।५०) पुत्त्रदौहित्त्रादिपार्वणश्राद्धाधिकारिणां सत्त्वे एव पुरुषाणां सपिण्डीकरणम् भवति । कात्त्यायन-श्राद्धकल्पसूत्रपञ्चमकण्डिकाव्याक्ख्याने कर्कोपाद्ध्यायेन, श्राद्धकाशिकायां कृष्णमिश्श्रेण चाऽयमेव पक्षः प्रतिपादितोऽस्ति । स्त्रीणान् तु "जीवत्पिता पितामह्य्या मातुः कुर्यात् सपिण्डताम् । प्रमीतपितृकः पित्रा पितामह्य्याऽथवा सुतः" इत्त्यादिकाद् वचनजाताद् विधवानाम् पुत्त्रेण सपिण्डीकरणे पत्त्या एकेन सह श्वश्श्र्वादिभिः सह वा सपिण्डनम् भवति (द्र. चतुर्वर्गचि. श्राद्धखण्डम् , पृ. १६५३), सधवानान् तु पार्वणश्राद्धाधिकारि-स्वपुत्त्र-सपत्नीपुत्त्र-दौहित्त्र-ज्येष्ठकपुत्त्र-देवरपुत्त्राऽऽदियुतानां श्वश्श्र्वादिभिः सह सपिण्डनम् भवति अन्वष्टकातीर्थ-श्राद्धादिषु पङ्क्तिसिद्ध्यर्थम् इत्त्यन्न्ये मन्न्यन्ते; वयन् तु स्त्रीणां पुत्त्रादिमतीनामपि विधवानां सधवानाञ्च च सर्वथा सपिण्डीकरणाभावः, पत्त्युः सपिण्डीकरणेनैव सपिण्डीकरणस्स्य सिद्धेः स्वश्श्रुतिसूत्त्रानुकूलतरतायाः प्रतीयमानत्त्वादिति मन्न्यामहे । दृश्श्यन्ते हि "मृते पितरि मातुस् तु न कार्या सहपिण्डता । पितुरेव सपिण्डत्त्वे तस्स्या अपि कृतम् भवेत्" इत्त्यादीनि वचनानि च निर्णयसिन्ध्वादिषु (पृ. ४३०) । यदि मातुः सपिण्डीकरणमकर्तुङ् कथमपि न शक्क्येत तर्हि पितरि उपरते पित्त्रादिपार्वणङ् कृत्त्वा पित्त्रा एकेन सहैव सपिण्डीकरणं कर्तव्यम् पित्त्रादिभिस् त्रिभिरेव वा; स्वसूत्त्रे स्त्रीपार्वणस्स्य जीवत्पितृकविषयकस्स्य कुत्त्राप्प्यदृश्श्यमानत्त्वात् , पिण्डपितृयज्ञे, अपरपक्क्षश्राद्धे, आब्भ्युदयिकश्श्राद्धे च स्वसूत्त्रे स्त्रीपार्वणस्स्याऽविहितत्वात् ; सपिण्डीकरण-कण्डिकायामपि स्त्रीसपिण्डीकरणविषये विशिष्य्याऽप्रतिपादितत्त्वात् ।

[पितामहायाऽर्घस्स्य[1] दाने मन्त्रः (काश्राकसू., क. २,५)]

९१६. (अद्द्याऽस्मत्पितुरमुकशर्म्मणोमुकगोत्रस्स्य प्रेतस्स्य सपिण्डीकरणे श्राद्धे)
अस्मत्पितामहाऽमुकशर्म्मन् अमुकगोत्र वसुस्स्वरूप एष तेऽर्ग्घः ।

[प्रपितामहायाऽर्घस्स्य दाने मन्त्रः (काश्राकसू., क. २,५)]

९१७. (अद्द्याऽस्मत्पितुरमुकशर्म्मणोऽमुकगोत्रस्स्य प्रेतस्स्य सपिण्डीकरणे श्राद्धे)
अस्मत्प्रपितामहाऽमुकशर्म्मन् अमुकगोत्र रुद्द्रस्स्वरूप एष तेऽर्ग्घः ।

[वृद्धप्प्रपितामहायाऽर्घस्स्य दाने मन्त्रः (काश्राकसू., क. २, ५)]

९१८. (अद्द्याऽस्मत्पितुरमुकशर्म्मणोऽमुकगोत्रस्स्य प्रेतस्स्य सपिण्डीकरणे श्राद्धे)
अस्मद्वृद्धप्प्रपितामहाऽमुकशर्म्मन् अमुकगोत्र आदित्त्यस्स्वरूप एष तेऽर्ग्घः ।

[पित्त्रे प्रेतायाऽर्घस्स्य दाने मन्त्रः (काश्राकसू., क. २,५)]

९१९. (अद्द्य सपिण्डीकरणे श्राद्धे) अस्मत्पितः अमुकशर्म्मन् अमुकगोत्र प्प्रेत एष तेऽर्ग्घः ।

[प्रेतार्घदानोत्तरम् प्रेतार्घपात्त्रेऽवशेषितस्स्य सतिलगन्धोदकस्स्य तृतीयस्स्यतृतीयस्स्य भागस्स्य पितामह-प्प्रपितामह-वृद्धप्प्रपितामहार्घपात्त्रेषु क्रमेणासेचने, प्रेताय दत्तस्स्य सुवर्णशलाकया वा रजतशलाकया वा कुशशलाकया वा त्रिधा विभक्तस्स्य प्रेतपिण्डस्स्य तृतीयस्स्यतृतीयस्स्य भागस्स्य पितामहपिण्डे प्रपितामहपिण्डे वृद्धप्प्रपितामहपिण्डे च क्रमेण मेलने प्रतिकर्म आवृत्त्या प्रयोज्ज्यौ मन्त्रौ (काश्राकसू., क. ५)]

९२०. ये स॒मा॒नाः᳚ सम॑नसः᳚ पि॒तरो॑ यम॒राज्ज्ये᳚ ।
तेषाल्ँ॒ लो॒कः᳚ स्व॒धा नमो॑ य॒ज्ञो दे॒वेषु॑ कल्प्पताम् ॥ मासं. १९।४५॥

९२१. ये स॒मा॒नाः᳚ सम॑नसो जी॒वा जी॒वेषु॑ माम॒काः᳚ ॥
तेषा॒ꣳ श्रीर्म् मयि॑ कल्प्पताम॒स्मिल्ँ॒ लो॒के श॒तꣳ᳚ समाः॑ ॥मासं.१९।४६॥

[पितामहाद्द्यर्घपात्त्राणां संस्रवान् प्रथमेऽर्घपात्त्रे (वैश्श्वदेवार्घपात्त्रे) समवनीय तस्स्य पात्त्रस्स्य न्युब्जीकरणे मन्त्रः (काश्राकसू., क. २)]

९२२. पितृब्भ्यस्त् थानमसि ।

[अग्नौकरणे मन्त्रौ (काश्राकसू., क. ३, काश्रौ. ४।१।६)]

९२३. अ॒ग्ग्ँनये॑ कव्व्य॒वाह॑नाय॒स् स्वाहा॑ ॥ मासं. २।२९॥

९२४. सोमा॑य पितृ॒मते॒स् स्वाहा॑ ॥ मासं. २।२९॥

[प्रेतब्राह्म्मणभोजनपात्त्रवर्जव्वें वैश्श्वदेवब्राह्म्मणादिब्राह्म्मणभोजनपात्त्रेषु हुतशेषमन्नमुद्धृत्त्य तेब्भ्यो दत्त्वा प्रत्त्येकं पात्त्रमालब्भ्योत्सृज्ज्य जपनीयो मन्त्रः (काश्राकसू., क. ३)]

९२५. पृथिवी ते पात्त्रन् द्यौरपिधानम् ब्राह्म्मणस्स्य मुखेऽ अमृतेऽ अमृतञ् जुहोमिस् स्वाहा ।

[दत्ते हुतशेषान्ने ब्राह्म्मणाङ्गुष्ठावगाहने मन्त्रः (काश्राकसू., क. ३)]

---

१. "एतेनैव पिण्डो व्याक्ख्यातः" इति कात्त्यायनश्राद्धकल्पसूत्त्रवचनाद् अर्घपिण्डयोस् सदृशस्स्य प्रयोगस्स्याऽवगम्म्यमानत्त्वात् , पिण्डस्स्य च दाने कृते सत्त्येव मेलनाद् अर्घस्स्याऽपि दाने कृते सत्त्येव मेलनम् इति, "त्रीणि पितृणामेकम् प्रेतस्स्य" इति अर्घाणाम् पूरणे क्रमस्स्य प्रतिपादितत्त्वाद् अर्घाणान् दानेऽपि एष एव क्रम इति चाऽवसीयते ।

१२६. इदवँ विष्ण्णुर्व्विचक्क्रमेत् त्रेधा निर्दधे पुदम् ।
समूढमस्स्य पाँसुरे ॥ मासं. ५।१५॥

[सान्नपात्त्रम् ब्राह्म्मणम् परितस् तिलानाम् प्रकरणे मन्त्रः (काश्राकसू., क. ३)]

१२७. अपहताऽ असुरा रक्क्षाँसि बेदिषदः ॥ मासं. २।२९॥

[तृप्तिप्रश्ने श्राद्धकर्त्रा ब्राह्म्मणान् प्रति प्रयोज्ज्यो मन्त्रः (काश्राकसू., क. ३)]

१२८. तृप्प्तास्त् थ ?

[अनुज्ज्ञाने ब्राह्म्मणैः प्रयोज्ज्यो मन्त्रः (काश्राकसू., क. ३)]

१२९. तृप्प्ताः स्मः ।

[अवनेजनमन्त्राः (काश्रौ. ४।१।१०,१५)]

१३०. (अद्द्याऽस्मत्पितुः अमुकशर्म्मणः अमुकगोत्त्रस्स्य प्रेतस्स्य सपिण्डीकरणे श्राद्धे) अस्मत्पितामह अमुकशर्म्मन् अमुकगोत्त्र वसुस्स्वरूप अवनेनिक्क्ष्व ।

१३१. (अद्द्याऽस्मत्पितुः अमुकशर्म्मणः अमुकगोत्त्रस्स्य प्रेतस्स्य सपिण्डीकरणे श्राद्धे) अस्मत्प्रपितामह अमुकशर्म्मन् अमुकगोत्त्र रुद्द्रस्स्वरूप अवनेनिक्क्ष्व ।

१३२. (अद्द्याऽस्मत्पितुः अमुकशर्म्मणः अमुकगोत्त्रस्स्य प्रेतस्स्य सपिण्डीकरणे श्राद्धे) अस्मद्वृद्धप्प्रपितामह अमुकशर्म्मन् अमुकगोत्त्र आदित्त्यस्स्वरूप अवनेनिक्क्ष्व ।

१३३. (अद्द्य सपिण्डीकरणे श्राद्धे) अस्मत्पितः अमुकशर्म्मन् अमुकगोत्त्र प्प्रेत अवनेनिक्क्ष्व ।

[पिण्डदाने मन्त्राः (काश्रौ. ४।१।११)]

१३४. (अद्द्याऽस्मत्पितुः अमुकशर्म्मणः अमुकगोत्त्रस्स्य प्रेतस्स्य सपिण्डीकरणे श्राद्धे) अस्मत्पितामह अमुकशर्म्मन् अमुकगोत्त्र वसुस्स्वरूप एतत् ते अन्नम् (अमृतस्स्वरूपम् अक्क्षय्यतृप्तिकरम्) स्वधा नमः ।

१३५. (अद्द्याऽस्मत्पितुः अमुकशर्म्मणः अमुकगोत्त्रस्स्य प्रेतस्स्य सपिण्डीकरणे श्राद्धे) अस्मत्प्रपितामह अमुकशर्म्मन् अमुकगोत्त्र रुद्द्रस्स्वरूप एतत् ते अन्नम् (अमृतस्स्वरूपम् अक्क्षय्यतृप्तिकरम्) स्वधा नमः ।

१३६. (अद्द्याऽस्मत्पितुः अमुकशर्म्मणः अमुकगोत्त्रस्स्य प्रेतस्स्य सपिण्डीकरणे श्राद्धे) अस्मद्वृद्धप्प्रपितामह अमुकशर्म्मन् अमुकगोत्त्र आदित्त्यस्स्वरूप एतत् ते अन्नम् (अमृतस्स्वरूपम् अक्क्षय्यतृप्तिकरम्) स्वधा नमः ।

१३७. (अद्द्य सपिण्डीकरणे श्राद्धे) अस्मत्पितः अमुकशर्म्मन् अमुकगोत्त्र प्प्रेत एतत् ते अन्नम् (अमृतस्स्वरूपम् अक्क्षय्यतृप्तिकरम्) स्वधा नमः ।

[वैश्श्वदेवब्राह्म्मणहस्ते अक्क्षय्योदकस्स्य दाने मन्त्रोऽर्थाक्षिप्तः (काश्राकसू., क. ३)]

१३८. अद्द्य अस्मत्पितामहप्प्रपितामहवृद्धप्प्रपितामहानां श्राद्धेन प्रेतश्राद्ध-सहितेन सम्बद्धानावँ विश्श्वेषान् देवानान् दत्तमेतदन्नपानादिकम् अक्क्षय्यमस्तु ।

[प्रतिवचने वैश्श्वदेवब्राह्म्मणेन प्रयोज्ज्यो मन्त्रोऽर्थाक्षिप्तः]

१३९. अस्त्वक्क्षय्यम् ।

[पितामहादिब्राह्म्मणहस्ते अक्षय्योदकस्स्य दाने मन्त्रोऽर्थाक्षिप्तः (काश्राकसू., क. ३)]

१४०. अद्याऽस्मत्पितुः अमुकशर्म्मणः अमुकगोत्रस्स्य प्रेतस्स्य सपिण्डीकरणे श्राद्धे अस्मत्पितामह-प्प्रपितामह-वृद्धप्प्रपितामहानाम् अमुकशर्मा-ऽमुकशर्माऽमुकशर्मणाम् अमुकगोत्राणावँ वसुस्स्वरूपरुद्द्रस्स्वरूपाऽऽ-दित्त्यस्स्वरूपाणान् दत्तमेतदन्नपानादिकम् अक्षय्यमस्तु[1] ।

[प्रतिवचने पितामहादिब्राह्म्मणेन प्रयोज्ज्यो मन्त्रोऽर्थाक्षिप्तः]

१४१. अस्त्वक्षय्यम् ।

[प्रेतब्राह्म्मणहस्ते अक्षय्योदकस्स्य दाने मन्त्रोऽर्थाक्षिप्तः]

१४२. अद्य सपिण्डीकरणे श्राद्धे अस्मत्पितुः अमुकशर्म्मणः अमुकगोत्रस्स्य प्रेतस्स्य दत्तमेतदन्नपानादिकम् उपतिष्ट्ठताम् ।

[प्रतिवचने प्रेतब्राह्म्मणेन प्रयोज्ज्यो मन्त्रोऽर्थाक्षिप्तः]

१४३. उपतिष्ट्ठताम् ।

[पिण्डमेलनान्ते स्वधावाचने ऊहनीयो मन्त्रः]

१४४. पितामहेब्भ्यःप् प्रपितामहेब्भ्यो वृद्धप्प्रपितामहेब्भ्यः पितृब्भ्यश्च् च स्वधोच्च्यताम् ।

[स्वधावाचने ब्राह्म्मणैः प्रयोज्ज्यो मन्त्रः]

१४५. अस्त्तुस् स्वधा पितामहेब्भ्यःप् प्रपितामहेब्भ्यो वृद्धप्प्रपितामहेब्भ्यः पितृब्भ्यश्च् च ।

[दक्षिणादानान्ते वैश्श्वदेवब्राह्म्मणवाचने मन्त्रः (काश्राकसू., क. ३)

१४६. बिश्श्वे देवाःप् प्रीयन्तामित्त्युच्च्यताम् ।

[वैश्श्वदेवब्राह्म्मणेन वचनीयो मन्त्रः (काश्राकसू., क. ३)]

१४७. बिश्श्वे देवाःप् प्रीयन्ताम् ।

[पितामहादिपार्वणश्राद्धब्राह्म्मणविसर्जने मन्त्रः (काश्राकसू., क. ३, मासं. ९।१८)]

१४८. बाजेवाजेऽवत बाजिनो नो धनेषु बिपप्राऽ अमृताऽ ऋतज्ज्ञाः ।
अस्य मद्ध्वः पिबत मादयद्ध्वन् तृप्प्ता यात पथिभिर्द् देवयानैः[2] ॥

---

1. पितामहादीनाङ् कृते प्रत्येकमेकैकस्मिन् ब्राह्म्मणे वर्तमाने तु तदनुसारवँ वचनानि ऊह्य्यानि । अक्षय्योदकदाने तन्त्रस्स्य निवृत्तेः पक्षे च । किन्त्वयमक्षय्योदकदाने तन्त्रस्स्य निवृत्तेः पक्षः स्वसूत्रसूचितो नास्तीति बोद्ध्यम् ।

2. पितृव्व्यज्येष्ठभ्रात्त्रादीनाम् बालपुत्त्रादीनां सपिण्डीकरणे यथायथवँ वाक्क्यानि ऊह्य्यानि । तथैव मातुः पृथक् सपिण्डीकरणस्स्य "मातुः सपिण्डीकरणं कथं कार्यं भवेत् सुतैः । पितामह्य्यादिभिः सार्धं सपिण्डीकरणं स्मृतम्" इति शङ्खवचनानुसारिणि वा "जीवत्पिता पितामह्य्या मातुः कुर्यात् सपिण्डनम् । प्रमीतपितृकः पित्रा पितामह्य्याऽथवा सुतः" इति यमवचनानुसारिणि वा "जीवत्पिता पितामह्य्या मातुः कुर्यात् सपिण्डनम् । प्रमीतपितृकः पित्त्रा तत्पित्त्रा पुत्त्रिकासुतः" इति वचनानुसारिणि वा "अर्धाङ्गमात्मनो ह्य्येष यज् जायेति ह वै नृप । तस्मात् पत्त्या सहैवाऽस्स्याः सपिण्डीकरणं स्मृतम्" इति भविष्य्यपुराणवचनानुसारिणि "पत्त्या चैकेन कर्तव्व्यं

(सावूँवत्त्सरिकक्क्षयाहैकोद्दिष्टश्राद्धे प्रयोज्ज्यो विशिष्टो मन्त्रः)

[ब्राह्म्मणनिमन्त्रणे मन्त्रः (काश्राकसू., क. १)]

९४९. श्वः [अद्द्य] पितृतृप्तिकामः अस्मत्पितुः अमुकशर्म्मणः अमुकगोत्त्रस्स्य सावूँवत्त्सरिकङ् क्षयाहश्श्राद्धङ् कर्ताऽस्मि [करिष्ष्ये], तत्त्र मया पितृब्राह्म्मणत्त्वे भवन्त आमन्त्रिताः[१]।

(पार्वणश्राद्धे आवश्श्यका विशिष्टा[२] मन्त्राः)

[विश्श्वेब्भ्यो देवेब्भ्योऽर्घस्स्य दाने मन्त्रः (काश्राकसू., क. २]

९५०. (अद्द्याऽस्मत्पितृ-पितामह-प्प्रपितामहानाममुकशर्मामुकशर्मामुकशर्मणाममुकगोत्त्राणावूँ वसुस्स्वरूप-रुद्द्रस्स्वरूपा-ऽऽदित्त्यस्स्वरूपाणां श्राद्धेन, अस्मन्-मातामह-प्प्रमातामह-वृद्धप्प्रमातामहानाममुकशर्मामुकशर्मामुकशर्मणाममुकगोत्त्राणावूँ वसुस्स्वरूप-रुद्द्रस्-स्वरूपा-ऽऽदित्त्यस्स्वरूपाणां श्राद्धेन च सम्बद्धे वैश्श्वदेविकश्श्राद्धे) विश्श्वे देवा एष वोऽर्ग्घः ।

[पित्त्रेऽर्घस्स्य दाने मन्त्रः (काश्राकसू., क. २)]

९५१. (अद्द्य पार्वणश्श्राद्धे) अस्मत्पितः अमुकशर्म्मन् अमुकगोत्त्र वसुस्स्वरूप एष तेऽर्ग्घः[३]।

[पितुरवनेजने मन्त्रः (काश्रौ. ४।१।१०,१५)]

९५२. (अद्द्य पार्वणश्श्राद्धे) अस्मत्-पितः अमुकशर्म्मन् अमुकगोत्त्र वसुस्स्वरूप अवनेनिक्क्ष्व[४]।

[पित्त्रे पिण्डस्स्य दाने मन्त्रः (काश्रौ. ४।१।११)]

९५३. (अद्द्य पार्वणश्श्राद्धे) अस्मत्-पितः अमुकशर्म्मन् अमुकगोत्त्र वसुस्स्वरूप एतत् ते अन्नम् (अमृतस्स्वरूपम् अक्क्षय्यतृप्तिकरं) स्वधा नमः[५]।

[वैश्श्वदेवब्राह्म्मणहस्ते अक्क्षय्योदकस्स्य दाने मन्त्रोऽर्धाक्क्षिप्तः (काश्राकसू., क. ३)]

९५४. अद्द्य अस्मत्पितृपितामहप्प्रपितामहानां श्राद्धेन अस्मन्-मातामह-प्रमातामह-वृद्धप्प्रमातामहानां श्राद्धेन च सम्बद्धानावूँ विश्श्वेषान् देवानान् दत्तमेतदन्नपानादिकमक्क्षय्यमस्तु ।

सपिण्डीकरणं स्त्रियाः । सा मृताऽपि हि तेनैक्यं गता मन्त्राहुतिव्व्रतैः" इति शातातपवचनानुकूले वा पक्षे यथायथवूँ वाक्क्यानि ऊह्य्यानि । मातुः पृथक् सपिण्डीकरणस्स्याऽनावश्श्यकत्वम् माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाश्रुतिसूत्त्राद्द्यनुकूलमिति त्त्ववगन्तव्व्यम् ।

१. एवमेवैकादशाहिकश्राद्धप्रकरणे प्रदर्शितानि अन्न्यान्यपि वाक्क्यानि यथायथम् ऐकादशाहिक-श्राद्धपदोद्वापेन सावूँवत्त्सरिकक्क्षयाहैकोद्दिष्टश्राद्धपदावापेन वसुस्स्वरूपपदावापेन च कल्पयित्त्वा सावूँवत्त्सरिकक्क्षयाहैकोद्दिष्टश्श्राद्धे प्रयोज्ज्यानि ।

२. वैश्श्वदेवब्राह्म्मण-पित्त्रादिब्राह्म्मण-मातामहादिब्राह्म्मणनिमन्त्रणादिवाक्क्यानि ऐकादशाहिक-श्राद्धप्रकरणे सपिण्डीकरणश्राद्धप्रकरणे च प्रदर्शितेषु वाक्क्येषु ऐकादशाहिकश्राद्ध-सपिण्डीकरण-श्राद्धपदोद्वापेन पार्वणश्राद्धपदावापेन प्रेतपदोद्वापेन वसुस्स्वरूपादिपदावापेन चेति यथार्थङ् कल्पयित्त्वा पार्वणश्राद्धे प्रयोक्तव्व्यानि ।

३. एवमेव पितामहादिब्भ्यश् चाऽर्घदाने यथार्थम् पदानि प्रयुज्ज्य वाक्क्यानि रचनीयानि ।

४. एवमेव पितामहादीनाञ् चाऽवनेजने यथार्थम् पदानि प्रयुज्ज्य वाक्क्यानि रचनीयानि ।

५. एवमेव पितामहादिब्भ्यः पिण्डदाने यथार्थम् पदानि प्रयुज्ज्य वाक्क्यानि रचनीयानि ।

[पित्त्रादिब्राह्म्मणहस्ते अक्षय्योदकस्स्य दाने मन्त्रोऽर्थाक्षिप्तः (काश्राकसू. क. ३)]

९५५. अद्द्य पार्वणश्श्राद्धे अस्मत्-पितृ-पितामह-प्प्रपितामहानाम् अमुकशर्मा-मुकशर्मामुकशर्मणाम् अमुकगोत्त्राणावँ वसुस्स्वरूप-रुद्द्रस्स्वरूपा-ऽऽदित्त्य-स्स्वरूपाणान् दत्तमेतदन्नपानादिकमक्क्षय्यमस्तु ।

[मातामहादिब्राह्म्मणहस्ते अक्षय्योदकस्स्य दाने मन्त्रोऽर्थाक्षिप्तः (काश्राकसू., क. ३)]

९५६. अद्द्य पार्वणश्श्राद्धे अस्मन्-मातामह-प्प्रमातामह-वृद्धप्प्रमाता-महानाम् अमुकशर्मामुकशर्मामुकशर्मणाम् अमुकगोत्त्राणावँ वसुस्स्वरूप-रुद्द्रस्स्वरूपा-ऽऽदित्त्यस्स्वरूपाणान् दत्तमेतदन्नपानादिकमक्क्षय्यमस्तु ।

[स्वधावाचने मन्त्रः (काश्राकसू., क. ३)]

९५७. पितृब्भ्यः पितामहेब्भ्यःप् प्रपितामहेब्भ्यो मातामहेब्भ्यःप् प्रमातामहेब्भ्यो बृद्धपप्रमातामहेब्भ्यश्च् चस् स्वधोच्च्यताम् ।

[स्वधावचने ब्राह्म्मणप्प्रयोज्ज्यो मन्त्रः (काश्राकसू., क. ३)]

९५८. अस्त्तुस् स्वधा पितृब्भ्यः पितामहेब्भ्यःप् प्रपितामहेब्भ्यो मातामहेब्भ्यःप् प्रमातामहेब्भ्यो बृद्धपप्रमातामहेब्भ्यश्च् च ।

(आब्भ्युदयिकश्श्राद्धे आवश्श्यका विशिष्टा मन्त्राः)

[पित्त्रावाहनानुज्ज्ञाप्रार्थने मन्त्रः (काश्राकसू., क. ६)]

९५९. नान्दीमुखान्न् पितॄनावाहयिष्ष्ये ।

[अर्घे यवप्प्रक्षेपे प्रयोज्ज्यो मन्त्रः (काश्राकसू., क. २,६)]

९६०. यवोऽसि सोमदैवत्त्यो गोसवो देवनिर्म्मितः ।
प्रत्त्नँमदद्भिः पृक्क्तः स्वधया पितॄल्ँ लोकान्न् प्रीणाहि नः स्वाहा[1] ॥

[विश्श्वेब्भ्यो देवेब्भ्योऽर्घस्स्य प्रदाने मन्त्रः (काश्राकसू. क. २,६)]

९६१. (अद्द्याऽमुककर्मपूर्वाङ्गतया क्रियमाणे नान्दीमुखानाम् अस्मत्पितृपिता महप्प्रपितामहानाम्[2] अमुकशर्मामुकशर्मामुकशर्मणाम् अमुकगोत्त्राणावँ वसुस्स्वरूपरुद्द्रस्स्वरूपाऽऽदित्त्यस्स्वरूपाणाम् आब्भ्युदयिकेन श्राद्धेन तथा नान्दीमुखानाम् अस्मन्मातामहप्प्रमातामहवृद्धप्प्रमातामहानाम् अमुकशर्मामुकशर्मामुकशर्मणाम् अमुकगोत्त्राणावँ वसुस्स्वरूप-रुद्द्रस्स्वरूपा-ऽऽदित्त्यस्स्वरूपा-णाम् आब्भ्युदयिकेन श्राद्धेन च[3] सम्बद्धे वैश्वदेविक-श्श्राद्धे) विश्श्वे देवा एष वोऽर्ग्घः ।

---

१. एतस्स्य मन्त्रस्स्याऽऽब्भ्युदयिके "यवोऽसि सोमदैवत्त्यो गोसवो देवनिर्म्मितः । प्रत्नमदद्भिः पृक्तः पुष्ट्या नान्दीमुखान् पितॄल्ँ लोकान् प्रीणाहि नः स्वाहा ॥ (नमो वृद्धिवृद्धिश्रियै)" इति रूपेण प्रयोग इति रुद्द्रधर-नित्त्यानन्दपर्वतीयादयः प्रतिपादयन्ति, किन्तु तादृशः प्रयोगो न स्वसूत्र-सूचित इति सोऽस्माभिरवधीरितः ।

२. यद्द्यपि आब्भ्युदयिकश्राद्धे अस्मच्छब्द-पितृनाम-गोत्त्राद्द्युच्चारणनिषेधा लघुस्मृतिपुराणादिषु दृश्श्यन्ते, तथाऽपि ते शाखान्तरादिविषयाः, कात्त्यायनश्राद्धकल्पसूत्त्रे स्वधाशब्दमात्त्रस्स्य निषिद्धत्त्वात् (क. ६), अस्मच्छब्दादीनामनिषिद्धत्त्वात् । एष एव सिद्धान्तो मदनरत्न-टोडरमिश्श्रपद्धति-गदाधरपद्धत्त्यादिषु चाऽवलम्बित इति नित्त्यानन्दपर्वतीयोऽपि आह स्म (संस्कारदीपके, प्रथमभागे, पृ. ६१,द्र. पृ. १२४) ।

३. माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिनाङ् कात्त्यायनश्राद्धकल्पसूत्त्रानुयायिनान् द्विजानाम् पित्त्रादीनान् त्रयाणाम् मातामहादीनान् त्रयाणामिति षण्णामेव आब्भ्युदयिकं श्राद्धम् भवति न मात्त्रादीनाम् , नान्दीमुखपितृवाचनसूत्त्रस्स्वरसात् ।

[नान्दीमुखाय पित्रेऽर्घस्स्य दाने मन्त्रः (काश्राकसू., क. २)]

९६२. (अद्याऽमुककर्मपूर्वाङ्गतया क्रियमाणे आब्भ्युदयिकश्श्राद्धे) नान्दीमुख अस्मत्पितः अमुकशर्मन् अमुकगोत्र वसुस्स्वरूप एष तेऽर्ग्घः[1] ।

[तृप्तिप्रश्ने मन्त्रः (काश्राकसू., क. ६)]

९६३. सम्पन्नम् ?

[अनुज्ज्ञाने ब्राह्म्मणैः प्रयोज्ज्यो मन्त्रः (काश्राकसू., क. ६)]

९६४. सुसम्पन्नम् ।

[नान्दीमुखस्स्य पितुरवनेजने मन्त्रः]

९६५. (अद्याऽमुककर्मपूर्वाङ्गतया क्रियमाणे आब्भ्युदयिकश्श्राद्धे) नान्दीमुख अस्मत्पितः अमुकशर्मन् अमुकगोत्र वसुस्स्वरूप अवनेनिक्क्ष्व[2] ।

[नान्दीमुखाय पित्रे पिण्डस्स्य दाने मन्त्रः]

९६६. (अद्यामुककर्मपूर्वाङ्गतया क्रियमाणे आब्भ्युदयिकश्श्राद्धे) नान्दीमुख अस्मत्पितः अमुकशर्मन् अमुकगोत्र वसुस्स्वरूप एतत् ते अन्नम् (अमृतस्स्वरूपम् अक्षय्यतृप्तिकरम्) नमः[3] ।

[वैश्श्वदेवब्राह्म्मणहस्तेऽर्घवदेव अक्षय्योदकस्य दाने मन्त्रः]

९६७. अद्यामुककर्मपूर्वाङ्गतया कृताब्भ्यामस्मत्पितृपितामहप्प्रपितामहाना-मस्मन्मातामहप्प्रमातामहवृद्धप्प्रमातामहानाञ्च चाब्भ्युदयिकश्श्राद्धाब्भ्यां सम्बद्धे वैश्श्वदेविकश्श्राद्धे दत्तैरेतैरन्नपानैर् विश्श्वे देवाःप् प्रीयन्ताम् ।

[पित्रादिब्राह्म्मणहस्तेऽर्घवदेव अक्षय्योदकस्स्य दाने मन्त्रः (काश्राकसू., क. ६)]

९६८. अद्यामुककर्मपूर्वाङ्गतया कृते आब्भ्युदयिकश्श्राद्धे दत्तैरेतैरन्नपानैर् नान्दीमुखाः पितरःप् प्रीयन्ताम् ।

[मातामहादिब्राह्म्मणहस्तेऽर्घवदेव अक्षय्योदकस्स्य दाने मन्त्रः]

९६९. अद्याऽमुककर्मपूर्वाङ्गतया कृते आब्भ्युदयिकश्श्राद्धे दत्तैरेतैरन्नपानैर् नान्दीमुखा मातामहाःप् प्रीयन्ताम् ।

[नान्दीमुखपितृवाचनानुज्ज्ञाप्रार्थने मन्त्रः (काश्राकसू., क. ६)]

९७०. नान्दीमुखान्न् पितॄन् न्वाचयिष्ष्ये ।

---

१. एवमेव पितामहाद्यर्घदानमन्त्रा ऊह्य्याः ।

२. एवमेव पितामहाद्यवनेजनमन्त्रा ऊह्य्याः ।

३. एवमेव पितामहादिपिण्डदानमन्त्रा ऊह्य्याः । आब्भ्युदयिकश्श्राद्धे स्वधाशब्दप्रयोगः स्वसूत्त्रेऽपि आब्भ्युदयिककण्डिकायान् निषिद्धोऽस्ति । माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिनाङ् कात्त्यायनश्राद्धकल्पसूत्त्रानुयायिनान् द्विजानाम् आब्भ्युदयिकश्श्राद्धन् दधिबदराक्षतमिश्श्र-पायसाद्यन्नपिण्डदानयुतमेव भवति ; अत्यन्ताशक्तावेव "मुक्ख्यो विधिस् स्वशास्त्रोक्त इतरस् स्यात् तु सङ्कटे" (भट्टगोपीनाथदीक्षितकृतसंस्काररत्नमालायाम् , पृ. १७९) इत्यादि-वचनानुसारम् अपिण्डकमपि भवितुमर्हतीति च बोद्ध्यम् , आचारपरम्परातोऽपि स्वशाखासूत्त्रस्मृतेर् बलीयस्त्वात् ।

[नान्दीमुखपितृवाचने मन्त्रः (काश्राकसू., क. ६)]

९७१. नान्दीमुखाः पितरः पितामहाःप् प्रपितामहा मातामहाःप् प्रमातामहा बृद्धप्प्रमातामहाश्च् चप् प्रीयन्तामित्त्युच्च्यताम् ।

[नान्दीमुखपितृप्रीतिवचने पित्रादिब्राह्मणैः प्रयोज्ज्यो मन्त्रः]

९७२. प्रीयन्तान् नान्दीमुखाः पितरः पितामहाःप् प्रपितामहा मातामहाःप् प्रमातामहा बृद्धप्प्रमातामहाश्च् च ॥

इत्त्यचिन्त्यापरिमितमायाशक्तिकपरमात्मलीलामयेच्छासृष्टानन्तकोटिब्रह्म्माण्डैकतमब्रह्म्माण्डोदरवर्तिचतुर्दशभुवनाभोगमद्ध्यस्स्थभूर्लोककुक्षिगतजम्बूद्वीपघटकभारतवर्षस्थकुमारिकाखण्डोत्तरभागस्थितहिमवत्खण्डस्स्थनेपालदेशमद्ध्यवर्तिगण्डकीप्रदेशान्तर्गतत्रितुङ्गाचलाङ्कितजनपदान्तःपातिताम्म्रकूटग्ग्रामाभिजनेन काष्ठमण्डपनगरान्तर्गतराजमातृपत्तनटोल्लकान्तर्वर्तिसरस्स्वतीमार्गस्स्थस्वाद्ध्यायशालावास्तव्व्येन गुरुमुखोच्चारणानूच्चारणरूपाद्ध्ययनगृहीतस्वशाखामन्त्रब्राह्म्मणकल्पसूत्त्रेण श्रुतिस्मृतिपुराणादिपारायणपरायणेन नैपालीयभाषाऽऽदिकविभानुभक्ताचार्यप्रविक्ख्यापिते कान्न्यकुब्जोच्चकुलीनविद्द्याधुरीणब्राह्म्मणश्रीकृष्णाचार्यवंशे जातेन सूर्योपाद्ध्यायात् पञ्चदशेन नारनाथिना गाङ्गेयेन वासिष्ठ-मैत्त्रावरुण-कौण्डिन्न्येति-त्रिप्प्रवरेण कौण्डिन्न्यायनेनाऽऽचार्येण शिवराजशर्मणा द्विजोत्तमेन सङ्गृहीते माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिनिरग्निकद्विजसदाचारकर्म-संस्कारकर्म-श्राद्धकर्मादिवैदिकमन्त्रसङ्ग्रहे तृतीयं श्राद्धकाण्डं सम्पूर्णम् ॥ ३ ॥

(कर्मणि मन्त्रस्स्य परमाऽऽवश्श्यकता)

अकर्म मन्त्ररहितन् नाऽतो मन्त्रम् परित्त्यजेत् ।
मन्त्रवँ विना कर्म कुर्याद् भस्मन्न्याहुतिवद् भवेत् ॥

(नारदपरिव्राजकोपनिषदि ३ । ७)

देश-काल-क्रिया-द्रव्य-कर्तॄणां शुद्धता यदि ।
मन्त्राणाञ् च तदा पूर्णङ् कर्मणाम् फलमश्नुते ॥

(देवीभागवते ४ । ४ । ४५ - ४६)

परिशिष्टम्

अथ कतिपय-पौराण-नित्त्यकृत्त्य-शान्तिकपौष्टिकादिकृत्त्य-मन्त्राः

(पाश्चात्त्ये यामिनीयामे जागरितैर् वेदनिष्ठैश् शुद्धकुलीनैस्
सुसंस्कृतैर् वैदिकैर् ब्राह्मणैः पठनीयम् प्रातस्सूक्तम्)

प्रातरग्ग्निम् प्रातरिन्द्रँ हवामहेप् प्रातर्म् मित्त्रावरुणाप् प्रातरश्श्विना ।
प्रातर्ब् भगम् पूषणम् ब्रह्मणस्पतिम् प्रातः सोममुत रुद्द्रँ हुवेम ॥ मासं.३४।३४॥
प्रातर्ज्जितम् भगमुग्ग्रँ हुवेम बयम् पुत्त्रमदितेर्य् यो विधर्त्ता ।
आद्ध्रश्च् चिद् यम् मन्न्यमानस्त् तुरश्च् चिद् द्राजा चिद् यम् भगम् भक्क्षीत्त्याह ॥
भगप् प्रणेतर्ब् भग सत्त्यराधो भगेमान् धियमुद्वादन्न् नः ।
भगप् प्र नो जनय गोभिरश्श्वैर्ब् भगप् प्र नृभिर्न् नृवन्तः स्याम ॥ मासं. ३४।३६॥
उतेदानीम् भगवन्तः स्यामोतप् प्रपित्त्वऽ उत मद्ध्येऽ अह्नाम् ।
उतोदिता मघवन् त्सूर्य्यस्य बयन् देवानाँ सुमतौ स्याम ॥ मासं. ३४।३७॥
भगऽ एव भगवाँऽ अस्त्तु देवास्त् तेन बयम् भगवन्तः स्याम ।
तन् त्वा भग सर्व्वऽ इज् जोहवीति स नो भग पुरऽ एता भवेह ॥ मासं. ३४।३८॥
समद्ध्वरायोषसो नमन्त दधिक्क्रावेव शुचये पदाय ।
अर्व्वाचीनवँ वसुविदम् भगन् नो रथमिवाश्श्वा बाजिनऽ आवहन्तु ॥ मासं. ३४।३९॥
अश्श्वावतीर्ग् गोमतीर्न् नऽ उषासो बीरवतीः सदमुच्छन्तु भद्द्राः ।
घृतन् दुहाना बिश्श्वतः प् प्रपीता यूयम् पातस् स्वस्तिभिः सदा नः ॥ मासं.३४।४०॥

(सुप्प्रभातप्रार्थना वामनपुराणोक्ता)

ब्रह्म्मा मुरारिस् त्रिपुरान्तकारी भानु शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्क्रः शनिराहुकेतवः कुर्वन्तु सर्वे मम सुप्प्रभातम् ॥
भृगुर्वसिष्ठः क्रतुरङ्गिराश्च मनु पुलस्त्यः पुलहः सगोतमः ।
रैभ्यो मरीचिश्च्यवनो रिभुश्च कुर्वन्तु सर्वे मम सुप्प्रभातम् ॥
सनत्कुमारः सनकः सनन्दनस् सनातनोऽप्प्यासुरिपिङ्गलौ च ।
सप्त स्वराः सप्त कुलाचलाश्च कुर्वन्तु सर्वे मम सुप्प्रभातम् ॥
पृथ्वी सगन्धा सरसास्तथाऽऽपः स्पर्शी च वायुर् ज्वलितञ्च तेजः ।
नभस् सशब्दम् महता सहैव कुर्वन्तु सर्वे मम सुप्प्रभातम् ॥
सप्तार्णवाः सप्त कुलाचलाश्च सप्तर्षयो द्वीपवराश्च सप्त ।
भूरादिकृत्त्वा भुवनानि सप्त कुर्वन्तु सर्वे मम सुप्प्रभातम् ॥
इत्त्थम् प्रभाते परमम् पवित्त्रम् पठेत् स्मरेद् वा शृणुयाच् च भक्त्या ।
दुस्स्वप्ननाशोऽ नघ सुप्प्रभातम् भवेच् च सर्वम् भगवत्प्रसादात् ॥

(प्रातरुत्थाय पठनीया भारतसावित्त्री)

मातापितृसहस्राणि पुत्त्रदारशतानि च ।
संसारेष्वनुभूतानि यान्ति यास्स्यन्ति चाऽ परे ॥
शोकस्थानसहस्राणि हर्षस्थानशतानि च ।
दिवसेदिवसे मूढमापतन्ति न पण्डितम् ॥
ऊर्ध्वबाहुर् विरौम्म्येष न च कश्चिच् छृणोति मे ।
धर्मादर्थश् च कामश् च स किमर्थन् न सेव्यते ॥

न जातु कामान् न भयान् न लोभाद् धर्मन् त्यजेज् जीवितस्स्यापि हेतो ।
धर्मो नित्त्यः सुखदुखे त्वनित्त्ये जीवो नित्त्यो हेतुरस्स्य त्त्वनित्त्यः ॥
इमाम् भारतसावित्त्रीम् प्रातरुत्थाय यः पठेत् ।
स भारतफलम् प्राप्य परम् ब्रह्म्माऽधिगच्छति ॥
(प्रातरुत्थाय पठनीयानि द्वादशज्योतिर्लिङ्गनामानि शिवपुराणे ४।१।२१-२४)
सौराष्ट्रे सोमनाथञ् च श्रीशैले मल्लिकार्जुनम् ।
उज्जयिन्न्याम् महाकालमोङ्कारे परमेश्श्वरम् ॥
केदारं हिमवत्पृष्ठे डाकिन्न्याम् भीमशङ्करम् ।
वाराणस्स्याञ् च विश्श्वेशन् त्र्यम्बकङ् गौतमीतटे ॥
वैद्द्यनाथञ् चिताभूमौ नागेशन् दारुकावने ।
सेतुबन्धे च रामेशङ् घुश्मेशञ् च शिवालये ॥
द्वादशैतानि नामानि प्रातरुत्थाय यः पठेत् ।
सर्वपापविनिर्मुक्तस् सर्वसिद्धिफलल्ँ लभेत् ॥
(प्रातरुत्थाय ब्राह्म्मणैः पठनीयाः श्लोकाः)
नमो धर्माय महते वेदाय च स्वयम्भुवे ।
ऋषिब्भ्यश्च ब्ब्राह्म्मणेब्भ्यो वेदविद्भ्यो नमोनमः ॥
धर्मार्थकामास् सममेव सेव्व्या यो ह्येकभक्तस् स जनो जघन्न्यः ।
द्वयोस् तु दाक्ष्यम् प्रवदन्ति मद्ध्यं स उत्तमो योऽभिरतस् त्रिवर्गे ॥
धर्मार्थकामा असमन्न्विताश् चेद् धर्मो यतस् स्यात् तदुपक्क्रमेत ।
द्वेष्यो भवत्त्यर्थपरो हि लोके कामात्मता खल्ल्वपि न प्प्रशस्ता ॥
सत्त्यञ् च धर्मञ्च पराक्क्रमञ्च भूतानुकम्पाम् प्रियवादिताञ् च ।
द्विजातिदेवातिथिपूजनञ् च पन्थानमाहुस् त्रिदिवस्स्य सन्तः ॥
दानं स्वधर्मो नियमो यमश्च श्रुतञ्च कर्माणि च सद्व्रतानि ।
सर्वे मनोनिग्ग्रहलक्ष्णान्ताः परो हि योगो मनसः समाधिः ॥
धर्मे मतिर् भवतु वः सततोत्थितानां स ह्येक एव परलोकगतस्स्य बन्धुः ।
अर्थास् स्त्रियश्च निपुणैरपि सेव्व्यमाना नैवात्मभावमुपयान्ति न च स्स्थिरत्त्वम् ॥
धर्मश् शर्म परत्त्र चेह च नृणान् धर्मोऽन्धकारे रविस्
सर्वापत्प्रशमक्क्षमस् सुमनसान् धर्माभिधानो निधिः ।
धर्मो बन्धुरबान्धवे पृथुपथे धर्मस् सुहृन् निश्चलस्
संसारोरुमरुस्स्थले सुरतरुर् नास्त्येव धर्मात् परः ॥
आस्तिक्क्यम् प्रविभज्ज्य भोजनमनुत्तापश्च तत्थ्यव्ँ वचो
मेधा-बुद्धि-धृति-क्क्षमाश्च करुणा ज्ञानञ् च निर्दम्भता ।
कर्मानिन्दितमस्पृहा च विनयो धर्मस् सदैवाऽऽदरा-
देते सत्त्वगुणान्न्वितस्स्य मनसो गीता गुणा ज्ञानिभिः ॥
आशापाशविमुक्तिनिश्चलसुखा स्वायत्तचित्तस्थितिस्
स्नेहद्द्वेषविषादलोभरहितं सन्तोषतृप्तम् मनः ।
चिन्ता नित्त्यमनित्त्यतापरिचये सङ्गेऽपि निस्सङ्गता
सर्व्ँवित्सेकविवेकपूतमनसामित्त्येष मोक्षक्क्रमः ॥

वेदो नित्त्यमधीयतान् तदुदितङ् कर्म्म स्स्वनुष्ठीयतान्
तेनेशस्स्य विधीयतामपचितिः काम्म्ये मतिस् त्यज्ज्यताम् ।
पापौघः परिधूयताम् भवसुखे दोषोऽनुसन्धीयताम्
मोक्षेच्छा क्रियतान् दृढा निजगृहात् काले विनिर्गम्म्यताम् ॥
ब्राह्म्मण्यम् बहुभिरवाप्प्यते तपोभिस् तल् लब्ध्वा न रतिपरेण हेलितव्व्यम् ।
स्वाद्ध्याये तपसि दमे च नित्त्ययुक्तः क्षेमार्थी कुशलपरस् सदा यतस्स्व ॥
जातीशतेन लभते किल मानुषत्त्वन् तत्त्रापि दुर्लभतरङ् खग भो द्विजत्त्वम् ।
यस् तन् न पालयति लालयतीन्द्रियाणि तस्स्याऽमृतङ् क्षरति हस्तगतम् प्रमादात् ॥
विप्रो वृक्क्षस् तस्स्य मूलञ् च सन्ध्या वेदाश् शाखा धर्मकर्माणि पत्त्रम् ।
तस्मान् मूलयँ यत्नतो रक्क्षणीयञ् छिन्ने मूले नैव शाखा न पत्त्रम् ॥

(प्रभाते करदर्शने मन्त्र)

कराग्ग्रे वसते लक्ष्मी करमद्ध्ये सरस्स्वती ।
करमूले स्थितो ब्रह्म्मा प्रभाते करदर्शनम् ॥

(शय्योत्थायम् पृथिवीस्पर्शने मन्त्र)

समुद्द्रवसने देवि पर्वतस्तनमण्डले ।
विष्णुपत्नि नमस् तुब्भ्यम् पादस्पर्शङ् क्षमस्स्व मे ॥

(कार्तवीर्यस्मरणमन्त्र मत्स्यपुराणे ४३।५०,५१)

कार्तवीर्यार्जुनो नाम राजा बाहुसहस्स्रवान् । येन सागरपर्यन्ता धनुषा निर्जिता मही ॥
यस् तस्स्य कीर्तयेन् नाम कल्ल्यमुत्थाय मानवः ।
न तस्स्य वित्तनाशस् स्यान् नष्टञ् च लभते पुनः ॥

(पौराणास् स्नानमन्त्राः)

(उद्धृतेन साधारणजलेन मुखप्रक्षालने स्नाने च प्रयोज्ज्या मन्त्राः)

गङ्गा-प्रयाग-बदरी-कुरु-पुष्कराणि तीर्थानि चाऽत्त्र परमात्मसुसम्प्रसादात् ।
तिष्ठन्ति सन्तु करपद्मपुटे मदीये शारीरमद्य मम वाहयितुं हि रिप्प्रम् ॥
काशिः काशिः काशिरिति त्रिवारयँ यः पठेन् नरः ।
सोऽपि देशान्तरेवासी काशिवासफलल्ँ लभेत् ॥
गङ्गागङ्गेति यन् नाम योजनानां शतेष्ष्वपि ।
स्थितैरुच्चारितं हन्ति पापञ् जन्मत्त्रयार्जितम् ॥
आपो नारायणोद्भूतास् ता एवास्स्यायनम् पुनः ।
तस्मान् नारायणन् देवं स्नानकाले स्मरेद् बुधः ॥
प्रपद्द्ये वरुणन् देवमम्भसाम् पतिमूर्जितम् ।
याचितन् देहि मे तीर्थं सर्वपापापनुत्तये ॥
पुष्करादद्यानि तीर्थानि गङ्गाद्द्यास् सरितस् तथा ।
आगच्छन्तु पवित्त्राणि स्नानकाले सदा मम ॥
गङ्गे च यमुने चैव गोदावरि सरस्स्वति ।
नर्मदे सिन्धो कावेरि जलेऽस्मिन् सन्निधिङ् कुरु ॥
अपामधिपतिर् हि त्त्वमप्स्स्वेव वसतिस् तव ।
वरुणाय नमस् तुब्भ्यं स्नानानुज्ज्ञाम् प्रयच्छ मे ॥

(यस्मिन्कस्मिन्नपि जलाशये गङ्गाबुद्ध्या स्नाने मन्त्रा)
नन्दिनी नलिनी सीता मालती च मलापहा ।
विष्णुपादाब्जसम्भूता गङ्गा त्रिपथगामिनी ॥
भागीरथी भोगवती जाह्न्नवी त्रिदशेश्श्वरी ।
द्वादशैतानि नामानि यत्त्रयत्त्र जलाशये ॥
स्नानोद्यत पठेत् तत्त्र-तत्त्रैव निवसाम्म्यहम् ।
(ददामि मयि स्नानस्स्य फलं स्नानेन तत्त्र हि ॥)
नमामि गङ्गे तव पादपङ्कजं सुरासुरैर् वन्दितदिव्व्यरूपम् ।
भुक्तिञ् च मुक्तिञ् च ददासि नित्त्यम् भावानुसारेण सदा नराणाम् ॥
(यस्मिन्कस्मिन्नपि जलाशये धनुष्कोटिबुद्ध्या स्नाने मन्त्र स्कान्दे)
धनुष्कोटिर् धनुष्कोटिर् धनुष्कोटिरिति द्विजा ।
त्रि पठन्तो नरा ये तु यत्त्र क्क्वाऽपि जलाशये ॥
स्नान्ति सर्वे नरास् ते वै (भक्तिभावसमन्न्विता ।
धनुष्कोटिप्प्रभावेण) यास्स्यन्ति ब्रह्म्मण पदम् ॥
(यस्मिन्कस्मिन्नपि जलाशये रामसेतुस्मरणेन स्नाने मन्त्र स्कान्दे)
गङ्गे हरे रामसेतो इति सङ्कीर्तयन् नर ।
यत्त्र क्क्वापि बहि स्नायात् तेन याति पराङ् गतिम् ॥
सो ऽयं स्मृतश् श्रुतो वाऽपि दृष्टस् स्पृष्टोऽवगाहित ।
सर्वस्माद् दुरितात् पाति रामसेतुर् द्विजोत्तमा ॥
ब्रह्म्मादिदेवतावृन्दैस् सेवितम् भक्तिपूर्वकम्। पुण्ण्ययँ यो रामसेतुवँ वै संस्मरन् पुरुषो द्विजा ॥
स्नायाच् च यत्त्र कुत्त्रापि तटाकादौ जलाशये ।
न तस्स्य दुष्कृतङ् किञ्चिद् भविष्ष्यति कदाचन ॥
(प्रातकाले कुलदेवतादीपदाने मन्त्र-
जुहूपभृत्स्रुक्स्रुवपाद देव प्रभो प्रणीताचमसोत्तमाङ्ग ।
अग्न्यास्स्य सामस्स्वन यज्ञकाय वेदात्मक क्क्रोडतनो प्रसीद ॥)
(पुष्पावचयने वनस्पतिप्रार्थनायाम् मन्त्र कैश्चिदुक्त)
मा नु शोकङ् कुरुष्ष्व त्त्वं स्थानत्त्यागञ् च मा कुरु ।
देवार्थेऽवचिनोमीह त्वत्पुष्पाणि वनस्पते ॥
(तुलसीपत्त्रावचयने मन्त्र पाद्मे)
तुलस्स्यमृतनामाऽसि सदा त्वङ् केशवप्प्रिया ।
केशवार्थवँ विचिन्न्वामि वरदा भव शोभने ॥
त्वदङ्गसम्भवैर् नित्यम् पूजयामि यथा हरिम् ।
तथा कुरु पवित्त्राङ्गि कलौ मलविनाशिनि ॥
(बिल्ल्वपत्त्रावचयने मन्त्र कैश्चिदुक्त)
अमृतोद्भव श्रीवृक्ष महादेवप्रिय सदा । गृह्ण्णामि तव पत्त्राणि शिवपूजार्थमादरात् ॥
(अथ पञ्चायतनदेवतापूजामन्त्राः)
(पाद्यादिभिर् दीपपूजायाङ् कृतायान् दीपनमस्कारे मन्त्रा)
नमोऽस्त्वनन्ताय सहस्स्रमूर्तये सहस्स्रपादाऽक्षिशिरोरुबाहवे ।
सहस्स्रनाम्ने पुरुषाय शाश्श्वते सहस्स्रकोटीयुगधारिणे नम ॥

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमोनमः ॥
नमः कमलनाभाय नमस्ते जलशायिने ।
नमस्ते केशवाऽनन्त दीपज्ज्योतिर् नमोऽस्तु ते ॥
शुभम् भवतु कल्ल्याणमारोग्ग्यं सुखसम्पद ।
सर्वशत्त्रुविनाशाय दीपज्ज्योतिर् नमोऽस्तु ते ॥

(दीपप्रार्थनामन्त्रः)

भो दीप त्त्वम् ब्रह्म्मरूप अन्धकारनिवारक ।
इमाम् मया कृताम् पूजाङ् गृह्णँस् तेजः प्रवर्धय ॥

(तूष्णीं स्नपने स्वस्थाने स्थापने च कृते गणपतेरुन्मुखीकरणे मन्त्र आचारपरम्परयागत, मासं.२३।१९)

गणानान् त्वा गणपतिँ हवामहेप् प्रियाणान् त्वाप् प्रियपतिँ हवामहे निधीनान् त्वा निधिपतिँ हवामहे बसो मम । आहमजानि गर्ब्भधमात् त्वमजासि गर्ब्भधम् ॥

(द्विजातिसङ्गृहीतभोग्ग्यस्त्री-सच्छूद्द्रादिभिः गणपत्त्युन्मुखीकरणे प्रयोज्ज्यो मन्त्रः)

गणेश पूजयामि त्वां सर्वविघ्नविनायक ।
सिद्धि-बुद्धिपते देव प्रसन्नो वरदो भव ॥

(देव्व्युन्मुखीकरणे मन्त्र आचारपरम्परयाऽऽगत, मासं. २८।१३ ॥)

देवीर्द्द् द्वारऽ इन्द्रँ सङ्घाते बीड्ड्वीर्य् यामन् नवर्द्धयन् । आवत्त्सेन तरुणेन कुमारेण च मीवता पार्ब्बाणँ रेणुकक्काटन् नुदन्तावँ वसुवने बसुधेयस्स्यब् ब्यन्तु यज ॥

(द्विजातिसङ्गृहीतभोग्ग्यस्त्री-सच्छूद्द्रादिभिः देव्व्युन्मुखीकरणे प्रयोज्ज्यो मन्त्रः)

देवि देवेश्श्वरि शिवे अम्बिके सम्मुखा भव ।
जगत्प्रकृतिभूते त्वाम् पूजयामि कृपाङ् कुरु ॥

(विष्णून्मुखीकरणे मन्त्र आचारपरम्परयाऽऽगत)

बिष्ण्णो रराटमसि विष्ण्णोः श्नप्प्त्रेस्त् थो बिष्ण्णोः स्यूरसि बिष्ण्णोर्द्द् ध्रुवोऽसि । बैष्ण्णवमसि बिष्ण्णवेत् त्वा ॥ मासं. ५।२१॥

(द्विजातिसङ्गृहीतभोग्ग्यस्त्रीसच्छूद्द्रादिभिः विष्णून्मुखीकरणे प्रयोज्ज्यो मन्त्रः)

सम्मुखो भव श्रीविष्णोऽनन्त नारायणाऽच्च्युत ।
पूजयामि यथाज्ञानयँ यथाशक्त्युपचारकैः ॥

(सूर्योन्मुखीकरणे मन्त्र आचारपरम्परयाऽऽगत)

आकृष्ण्णेन रजसा बर्त्तमानो निवेशयन्नमृतम् मर्त्त्यञ्च च ।
हिरण्ण्ययेन सविता रथेना देवो याति भुवनानि पश्श्यन् ॥ मासं. ३३।४३,३४।३१.

(द्विजातिसङ्गृहीतभोग्ग्यस्त्रीसच्छूद्द्रादिभिः सूर्योन्मुखीकरणे प्रयोज्ज्यो मन्त्रः)

आविष्कुरु स्स्वं हि रूपम् पूजोद्द्युक्ते मयीश्श्वर ।
चराचरात्मन् सवितर् जगदाधार चिन्मय ॥

(शिवोन्मुखीकरणे मन्त्रः)

नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्क्कराय च
नमः शिवाय च शिवतराय च ॥ मासं. १६।४१॥

(द्विजातिसङ्गृहीतभोग्ग्यस्त्रीसच्छूद्द्रादिभिः शिवोन्मुखीकरणे प्रयोज्ज्यो मन्त्रः)

प्रेक्षस्स्व मान् देवदेव प्रभो साम्बसदाशिव ।
पूजयामि यथाशक्ति प्रसन्नः सम्मुखो भव ॥

(शिवपञ्चायतनदेवतादिभ्य पञ्चायतनदेवताभ्य पाद्यादीनां समर्पणे मन्त्र)

पाद्यम् , अर्घ्यम् , स्नानीयम् , आचमनीयम् , पुनराचमनीयम् , एतदनुलेपनम् , एतानक्षतान् , एतानि पुष्पाणि च समर्पये श्रीशिवपञ्चायतनदेवताभ्यो नम ।

एतान् दूर्वाङ्कुरान् समर्पये श्रीगणाधिपतये नम । एतान् तिलाक्षतान् समर्पये श्रीविष्णवे नम । तुलसीं हेमरूपाञ् च रत्नरूपाञ् च मञ्जरीम् । भवमोक्षप्प्रदान् तुभ्यमर्पयामि हरिप्प्रियाम् ॥ एतानि तुलसीपत्त्राणि समर्पये श्रीविष्णवे नम । त्रिदलन् त्रिगुणाकारन् त्रिनेत्त्रञ् च त्त्रियायुधम् । त्रिजन्मपापसंहारमेकबिल्ल्वं शिवार्पणम् ॥ एतानि बिल्ल्वपत्त्राणि समर्पये श्रीसाम्बसदाशिवाय नम ।

(धूपस्स्यार्पणे मन्त्र)

वनस्पतिरसोपेतो गन्धाड्ढ्यस् सुमनोहर ।
आग्घ्रेयस् सर्वदेवानान् धूपोऽयम् प्रतिगृह्य्यताम् ॥

(दीपस्स्यार्पणे मन्त्र)

आज्ज्यं सद्वर्तिसयुँयुक्तवँ वह्निना दीपितम् मया ।
दीपङ् गृहाण देवेश त्रैलोक्क्यतिमिरापहम् ॥

(नैवेद्यस्स्यार्पणे मन्त्र)

अन्नञ् च विविधं स्वादु रसैष् षड्भिस् समन्न्वितम् ।
भक्क्ष्यभोज्ज्यसमायुक्तन् नैवेद्यम् प्रतिगृह्य्यताम्॥

(क्षमापनमन्त्र)

भो भो श्रीशिवपञ्चायतनदेवता गन्धाक्षतपुष्पधूपदीपनैवेद्याादिभिर् यथामिलितोपचारै पूजितास् स्थ क्क्षमद्ध्वम् ॥

(आरार्तिकभ्रमणे मन्त्र आचारपरम्परयाऽऽगत)

अग्गॅंनिर्द् देवता बातो देवता सूर्य्यो देवता चन्द्रमा देवता बसवो देवता रुद्द्रा देवताऽऽदित्त्या देवता मरुतो देवता बिश्श्वे देवा देवता बृहस्प्पतिर्द् देवतेन्द्रो देवता बरुणो देवता ॥ मासं. १४।२०॥

(आरार्तिकभ्रमणे द्विजातिसङ्गृहीतभोग्ग्यस्त्रीसच्छूद्द्रादिभि प्रयोज्ज्यो मन्त्र)

चन्द्रादित्त्यौ च धरणी विद्द्युदग्निस् तथैव च ।
त्वमेव सर्वज्योतींषि तेन नीराजयाम्म्यहम् ॥

(तापसमर्पणपूर्वके तापग्ग्रहणे मन्त्र)

पापोऽहम् पापकर्माऽहम् पापात्मा पापसम्भव ।
त्राहि माम् पुण्डरीकाक्ष सर्वपापहरो भव ॥

(चागरान्दोलने मन्त्र आचारपरम्परयाऽऽगत)

अविनयमपनय विष्णो दमय मन शमय विषयमृगतृष्णाम् ।
भूतदयावँ विस्तारय तारय संसारसागरत ॥
दिव्व्यधुनीमकरन्दे परिमलपरिभोगसच्चिदानन्दे ।
श्रीपतिपदारविन्दे भवभयखेदच्छिदे वन्दे ॥
सत्त्यपि भेदापगमे नाथ तवाऽहन् न मामकीनस् त्वम् ।
सामुद्द्रो हि तरङ्ग क्व चन समुद्द्रो न तारङ्ग ॥
उद्धृतनग नगभिदनुज दनुजकुलामित्त्र मित्त्रशशिदृष्टे ।
दृष्टे भवति प्प्रभवति न भवति किम् भवतिरस्कार ॥

मत्स्यादिभिरवतारैरवतारवताऽवताऽखिलवसुधाम् ।
परमेश्श्वर परिपाल्ल्यो भवता भवतापभीतोऽहम् ॥
दामोदर गुणमन्दिर सुन्दरवदनारविन्द गोविन्द ।
भवजलधिमथनमन्दर परमन् दरमपनय त्वम् मे ॥
नारायण करुणामय शरणङ् करवाणि तावकौ चरणौ ।
इति षट्पदी मदीये वदनसरोजे सदा वसतु ॥

(प्रदक्षिणामन्त्र)

यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि सर्वाणि नश्श्यन्ति प्रदक्षिणपदेपदे ॥

(पुष्पाञ्जलिसहितायाम् प्रार्थनायाम् मन्त्र)

सम्मुखीकरणन् नाऽहञ् जानामि न च सेवनम् ।
समर्पणन् न जानामि प्रसीदन्तु सुरेश्श्वरा ॥
मन्त्रहीनङ् क्रियाहीनम् भक्तिहीनवँ विधिच्च्युतम् ।
यत् पूजितम् मया देवा परिपूर्णन् तदस्तु मे ॥
यदक्षरपदभ्भ्रष्टम् मात्त्राहीनञ् च यद् भवेत् ।
क्षन्तुमर्हथ देवेशा कस्स्य न स्खलितम् मन ॥

(शिवस्स्य विशेषनमस्कारे मन्त्रा)

वन्दे देवमुमापतिं सुरगुरुवँ वन्दे जगत्कारणवँ
वन्दे पन्नगभूषणम् मृगधरवँ वन्दे पशूनाम् पतिम् ।
वन्दे सूर्यशशाङ्कवह्न्निनयनवँ वन्दे मुकुन्दप्प्रियवँ
वन्दे भक्तजनाश्रयञ् च वरदवँ वन्दे शिवं शङ्करम् ॥
शान्तम् पद्मासनस्थं शशधरमुकुटम् पञ्चवक्त्रन् त्रिनेत्त्रं
शूलवँ वज्ज्रञ्च खड्गम् परशुमभयदन् दक्षिणाङ्गे वहन्तम् ।
नागम् पाशञ्च घण्टाण् डमरुकसहितां साङ्कुशावँ वामभागे
नानालङ्कारदीप्तं स्फटिकमणिनिभम् पार्वतीशन् नमामि ॥
कर्पूरगौरङ् करुणावतारं संसारसारम् भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवम् भवानीसहितन् नमामि ॥

(शिवपादोदकपाने मन्त्र)

अकालमृत्त्युहरणं सर्वव्याधिविनाशनम् ।
शम्भो पादोदकम् पीत्त्वा शिरसा धारयाम्म्यहम् ॥

(न्यूनतासम्पूरणे मन्त्र)

यस्स्य स्मृत्त्या च नामोक्त्या तपोयज्ञक्क्रियादिषु ।
न्यूनं सम्पूर्णतायँ याति सद्द्यो वन्दे तमच्च्युतम् ॥
ओ३म् । अच्च्युताय नम । ओ३म् । अच्च्युताय नम । ओ३म् । अच्च्युताय नम ॥

(सूर्यार्घदाने मन्त्र)

एहि सूर्य सहस्स्रांशो तेजोराशे जगत्पते ।
अनुकम्पय माम् भक्त्या गृहाणार्घन् दिवाकर ॥

(गोग्रासदाने मन्त्र)

सौरभेय्यस्सर्वहिता पवित्त्रा पुण्ण्यराशय । प्रतिगृह्ण्णन्तु मे ग्रासङ् गावस् त्रैलोक्क्यमातर ॥

सुरभी वैष्णवी माता नित्त्यवँ विष्णुपदे स्थिता ।
गोग्रासस् तु मया दत्तो गोविन्द प्रीयतामिति ॥

(तुलसीनमस्कारे मन्त्र)

या दृष्टा निखिलाघसङ्घशमनी स्पृष्टा वपुपावनी
रोगाणामपि वन्दिता निरसनी सिक्ताऽन्तकत्रासिनी ।
प्रत्त्यासत्तिविधायिनी भगवत कृष्णस्स्य संरोपिता
न्यस्ता तच्चरणे विमुक्तिफलदा तस्स्यै तुलस्स्यै नम ॥

(वटनमस्कारे मन्त्र सङ्कल्परत्नावली)

अकारमूलरूपाय उकारस्कन्धशाखिने । मकारफलपुष्पाय वटवृक्षाय ते नम ॥

(अश्वत्थाय जलदाने मन्त्र)

मूलतो ब्रह्म्मरूपाय मद्ध्यतो विष्णुरूपिणे ।
अग्ग्रतश् शिवरूपाय अश्श्वत्थाय नमोनम ।

(अश्वत्थ- (पिप्पल-) नमस्कारे मन्त्र सङ्कल्परत्नावली)

अश्श्वत्थ हुतभुग्वास गोविन्दस्स्य सदाश्श्रय ।
अशेषं हर मे पापवँ वृक्षराज नमोऽस्तु ते ॥

(धात्त्री-(आमलकी-) नमस्कारे मन्त्र)

गौरीबीजात् समुद्भूता विश्श्वधात्त्री प्रकीर्तिता ।
विष्णुसायुज्ज्यदात्त्री च धात्त्रि तुब्भ्यन् नमोनम ॥

(दुस्स्वप्ननाशनमन्त्र, ब्रह्म्मवैवर्तपुराणे)

शिवन्दुर्गाङ्गणपतिङ्कार्त्तिकेयन्दिनेश्श्वरम् ।
धर्मङ् गङ्गाञ् च तुलसीं राधालँ लक्ष्मीं सरस्स्वतीम् ॥
नामान्न्येतानि भद्द्राणि जले स्नात्त्वा च यो जपेत् ।
वाञ्छितञ्च लभेत् सोऽपि दुस्स्वप्नश्शुभवान् भवेत् ॥

(वैदिको दुस्स्वप्ननाशनमन्त्र, विष्णुधर्मोत्तरपुराणोक्त)

यज् जाग्ग्रतो दूरमुदैति दैवन् तदु सुप्प्तस्स्य तथैवैति ।
दूरङ्गमञ् ज्योतिषाञ् ज्योतिरेकन् तन्न् मे मन ÷ शिवसङ्कल्प्पमस्तु ॥ मासं.३४।१॥

(शनैश्चरपीडानाशनमन्त्र, शिवपुराणे)

गाधिश् च कौशिकश् चैव पिप्पलादो महामुनि ।
शनैश्चरकृताम् पीडान् नाशयन्ति स्मृतास् त्रय ॥

(मित्थ्यापवादनिराकरणाय जपनीयो मन्त्र)

सिंह प्रसेनमवधीत् सिंहो जाम्बवता हत ।
सुकुमारक मा रोदीस् तव ह्त्येष स्यमन्तक ॥

(औषधसेवनमन्त्र, अग्निपुराणे विष्णुधर्मोत्तरपुराणे च)

ब्रह्म्मदक्षाश्श्विरुद्द्रेन्द्रभूचन्द्रार्कानलानिला ।
देवाश् च सौषधिग्ग्रामा भूमिदेवाश् च पान्तु न ॥
रसायनमिवर्षीणान् देवानाममृतयँ यथा ।
सुधेवोत्तमनागानाम् भैषज्ज्यमिदमस्तु मे ॥

(केषाञ् चिन् मते औषधसेवनमन्त्र)

अच्च्युताऽनन्त गोविन्द नामोच्चारणभेषजात् ।
नश्श्यन्ति सकला रोगास् सत्त्यंसत्त्यवँ वदाम्म्यहम् ॥

धन्न्वन्तरिर् वृकोदास काशीराजश् च वीर्यवान् ।
नकुलस् सहदेवश् च पञ्चैते व्याधिघातका ॥
शरीरञ् च नवच्छिद्द्रव्ँ व्याधिग्ग्रस्तं हि केवलम् ।
औषधञ् जाह्न्नवीतोयं वैद्यो नारायणो हरि ॥

(औषधसेवने वैदिको मन्त्र, विष्णुधर्मोत्तरपुराणोक्त)

याऽओषधीः सोमराज्ञीर् बह्वी शतविचक्षणाः ।
तासामसित् त्वमुत्तमाऽरङ् कामाय शं हृदे ॥ मासं. १२।९२॥

(अथवा)

याऽओषधय सोमराज्ञीर् बह्वी शतविचक्षणा ।
बृहस्पतिप्रसूतास् ता नो मुञ्चन्त्वंहस ॥ शौ. अथर्व. ६।९६।१

(सर्पविषनाशनमन्त्र, विष्णुपुराणे)

नर्मदायै नम प्रातर् नर्मदायै नमो निशि ।
नमोऽस्तु नर्मदे तुभ्यं त्राहि मां विषसर्पत ॥

(सर्पभयनिवारको मन्त्रो महाभारते आदिपर्वणि)

असितञ् चाऽऽर्तिमन्तञ् च सुनीथञ् चाऽपि य स्मरेत् ।
दिवा वा यदि वा रात्त्रौ नाऽस्स्य सर्पभयम् भवेत् ॥

(याज्ञवल्क्यद्वादशनामस्मरणम् परम्पराऽऽगतम्)

वन्देऽहम् मङ्गलात्मानम् भास्वन्तव्ँ वेदविग्ग्रहम् ।
याज्ञवल्क्यम् मुनिश्श्रेष्ट्ठञ् जिष्ण्णुं हरिहरप्प्रभम् ॥
जितेन्द्रियञ् जितक्क्रोधं सदा ध्यानपरायणम् ।
आनन्दनिलयव्ँ वन्दे योगानन्दम् मुनीश्श्वरम् ॥
एवन् द्वादश नामानि त्रिसन्ध्ययँ य पठेन् नर ।
योगीश्श्वरप्प्रसादेन विद्द्यावान् धनवान् भवेत् ॥

(सायङ्काले लक्ष्म्यै दीपदाने मन्त्रा स्मृतिपुराणमहाभारतेभ्य)

सा लक्ष्मीस् सिन्धुसम्भूता भूतिधेनु प्रभुर् वसु ।
पद्मा विश्श्वावसुर् देवी सदा नो जुषताङ् गृहम् ॥
विष्णोर् वक्क्षसि पद्मे च शङ्खे चक्क्रे तथाऽम्बरे ।
लक्क्ष्मि नित्त्या यथाऽसि त्त्वम् मयि नित्त्या तथा भव ॥
लक्ष्मीर् वसेद् वै सुभगे प्प्रगल्भे दक्षे नरे कर्मणि वर्तमाने ।
अक्क्रोधने देवपरे कृतज्ञे जितेन्द्रिये नित्त्यमुदीर्णसत्त्वे ॥
स्वाद्ध्यायनित्त्येषु द्विजेषु लक्ष्मी क्षत्त्रे च धर्माभिरते वसेद् वै ।
वैश्श्ये च कृष्ष्यादिरते तथैव शुश्श्रूषके शिल्पपरे च शूद्द्रे ॥
सम्मृष्टवेश्मासु सुतान्विवतासु क्षान्तासु दान्तास्स्वबलासु लक्ष्मी ।
सत्त्यस्स्वभावार्जवसय्ँयुतासु वसेच् च देवद्द्विजपूजिकासु ॥
जितेन्द्रियासु प्प्रियवादिनीषु सौभाग्ग्ययुक्तासु अलोलुपासु ।
लक्ष्मीर् वसेत् स्त्रीषु पतिव्व्रतासु कल्ल्याणशीलासु विभूषितासु ॥
पापामचोक्क्षाम् प्रविकीर्णभाण्डाव्ँ व्यपेतधैर्यां सततं शयानाम् ।
सदा च भर्तु प्रतिकूलवादिनीं स्त्रियन् तु लक्ष्मी परिवर्जयेच् च ॥

यस्मिन्न् जनो हव्व्यभुजन्न् जुहोति गोब्राह्म्मणन्न् चार्चति देवताश् च ।
काले च पुष्पैर् बलयः क्रियन्ते तस्मिन् गृहे वासमुपैति लक्ष्मीः ॥
(रात्रौ जलाशयाज् जलस्स्य ग्रहणे मन्त्रः, हेमाद्रि-श्राद्धखण्डे)
मापो मौषधीर् हिँसीर्द् धाम्म्नोधाम्म्नो राजँस्तत् ततो बरुण नो मुञ्च ।
यदाहुरघ्घ्न्या ऽ इति बरुणेति शपामहे ततो बरुण नो मुञ्च ॥ मासं. ६।२२॥
(चन्द्रनमस्कारमन्त्रः, पद्मपुराणानुगत)
निष्कलङ्क कलाधार गङ्गाधरशिरोमणे ।
हरमुकुटनिवासाय बालचन्द्र नमोऽस्तु ते ॥
(सायङ्काले केदारस्मरणस्य माहात्म्यङ्काशीखण्डे)
सायङ् केदार केदार केदारेति त्रिरुच्चरन् ।
गृहेऽपि निवसन् नूनयँ यात्त्राफलमवाप्नुयात् ॥
(दिनेदिने स्मरणीयानि तीर्थानि वृद्धपरम्परया ज्ञातानि)
स्मरेत् प्रभाते बदरीम् मद्ध्याह्न्ने मणिकर्णिकाम् ।
भोजने तु जगन्नाथं शयने कृष्णद्वारकाम् ॥
(चोरनिवारणमन्त्रः परम्पराऽऽगत)
तिस्स्रो भार्याः कफल्लस्स्य दाहिनी मोहिनी सती ।
तासां स्मरणमात्त्रेण चौरो गच्छति निष्फलः ॥
(सुखशयनमन्त्रः)
अगस्त्त्यो माधवश् चैव मुचुकुन्दो महाबलः ।
कपिलो मुनिरास्तीकः पञ्चैते सुखशायिनः ॥
॥ इति नित्त्यसदाचारकृत्त्यप्रकरणम् ॥

अथ शान्तिकपौष्टिकादिकृत्त्यमन्त्राः

(मङ्गलपाठ)
सुमुखश् चैकदन्तश् च कपिलो गजकर्णकः ।
लम्बोदरश् च विकटो विघ्ननाशो विनायकः ॥
धूम्म्रकेतुर् गणाद्ध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच् छृणुयादपि ॥
विद्द्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
सङ्ग्रामे सङ्कटे चैव विघ्नस् तस्स्य न जायते ॥
अभीप्सितार्थसिद्ध्यर्थम् पूजिताय सुरासुरैः ॥
विघ्नवल्लीकुठाराय गणाधिपतये नमः ॥
शुक्लाम्बरधरन् देवं शशिवर्णन्न् चतुर्भुजम् ।
प्रसन्नवदनन् ध्यायेत् सर्वविघ्नोपशान्तये ॥
सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ।
येषां हृदिस्स्थो भगवान् मङ्गलायतनं हरिः ॥
लाभस् तेषान्न् जयस् तेषाङ् कुतस् तेषाम् पराजयः ।
येषामिन्दीवरश्श्यामो हृदयस्स्थो जनार्दनः ॥
मङ्गलम् भगवान् विष्णुर् मङ्गलङ् गरुडद्ध्वजः ।
मङ्गलम् पुण्डरीकाक्षो मङ्गलायतनं हरिः ॥

सर्वेष्वारब्धकार्येषु त्रयस् त्रिभुवनेश्श्वरा।
देवा दिशन्तु नः सिद्धिम् ब्रह्म्म-विष्णु-महेश्श्वरा॥
विनायकङ् गुरुम् भानुम् ब्रह्म्म-विष्णु-महेश्श्वरान्।
सरस्स्वतीञ् च नौम्म्यादौ सर्वकार्यार्थसिद्धये॥
तदेव लग्नं सुदिनन् तदेव ताराबलञ् चन्द्रबलन् तदेव।
विद्याबलन् देवबलन् तदेव हृदा परात्मस्स्मरणयँ यदेव॥

(पञ्चगव्यमेलनमन्त्रा)

गोमूत्रप्रक्षेपणे--तत् त्सवितुर्ब् बरेण्ण्यम् भर्ग्गो देवस्स्य धीमहि। धियो यो नः प्
प्रचोदयात्॥ मासं. ३।३५॥

गोमयप्रक्षेपणे-- ओ३म्॥ मासं. ४०।१५॥

गोदुग्धप्रक्षेपणे-- आप्प्यायस्स्व समेतु ते बिश्श्वतः सोम बृष्ण्ण्यम्। भवा बाजस्स्य सङ्गथे॥ मासं. १२।११२॥

गोदधिप्रक्षेपणे-- दधिक्क्राव्ण्णोऽ अकारिषञ् जिष्ण्णोरश्श्वस्स्य बाजिनः। सुरभि नो मुखा करत्त् प्र णऽआयूँषि तारिषत्॥ मासं. २३।३२॥

गोघृतप्रक्षेपणे-- तेजोऽसि शुक्क्रमस्स्यमृतमसि॥ मासं. १।३१॥

कुशोदकप्रक्षेपणे-- देवस्स्यत् त्वा सवितुः प् प्रसवेऽश्श्विनोर्ब् बाहुब्भ्याम् पूष्ण्णो हस्त्ताब्भ्याम्। अश्श्विनोर्ब् भैषज्ज्येन तेजसेब् ब्रह्म्मवर्च्चसायाऽभिषिञ्चामि सरस्स्वत्त्यै भैषज्ज्येन बीर्य्यायाऽन्नाद्यायाऽभिषिञ्चामीन्द्रस्स्येन्द्रियेण बलायश् श्रियै यशसेऽभिषिञ्चामि॥ मासं. २०।३॥

सप्तावरैर्दर्भैरालोडने-- आपो हिष्ट्ठा मयोभुवस्त् ता नऽ ऊर्ज्जे दधातन। महे रणाय चक्क्षसे॥ यो वः शिवतमो रसस्त् तस्स्य भाजयतेह नः। उशतीरिव मातरः॥ तस्म्माऽ अरङ् गमाम वो यस्स्यक् क्षयाय जिन्न्वथ। आपो जनयथा च नः॥
मासं. ११।५०-५२॥

पञ्चगव्यमाहात्म्यम्-- यत् त्वगस्थिगतम् पापन् देहे तिष्ठति देहिनाम्। ब्रह्म्मकूर्चो दहेत् सर्वम् प्रदीप्तोऽग्निरिवेन्धनम्॥ पराशरस्मृतौ ११।३७॥

(भूतापसारणमन्त्र)

अपक्क्रामन्तु ते भूता पिशाचास् सर्वतो दिशम्। सर्वेषामविरोधेन यज्ञकर्म समारभे॥
अपसर्पन्तु ते भूता ये भूता भूमिदूषका। ये भूता विघ्नकर्तारस् ते नश्श्यन्तु शिवाज्ञया॥

(आसनपवित्त्रीकरणे मन्त्र)

पृत्थ्वि त्त्वया धृता लोका देवि त्त्वव्ँ विष्णुना धृता।
त्वञ् च धारय मान् देवि पवित्त्रङ् कुरु चाऽऽसनम्॥

(कर्मार्थजलाऽऽदानादि-(कर्गपात्त्र-)मन्त्रा)

ताम्म्रपात्त्रे जलप्प्रक्षेपणे-- शन् नो देवीरभिष्ट्टयऽ आपो भवन्तु पीतये। शय्ँयोरभिस्स्रवन्तु नः॥ मासं. ३६।१२॥

पवित्त्राऽऽदाने-- पवित्त्रेस्त् थो बैष्ण्णव्व्यौ॥ मासं. १।१२॥

पवित्त्राभ्यान् ताम्म्रपात्त्रस्थजलाऽऽलोडने-- यद् देवा देवहेडनन् देवासश्च्चकृमा बयम्। अग्ग्निर्म् मा तस्म्मादेनसो बिश्श्वान्न् मुञ्चत्त्वꣳहसः॥ यदि दिवा यदि नक्क्तमेनाꣳसि चकृमा बयम्। बायुर्म् मा तस्म्मादेनसो बिश्श्वान्न् मुञ्चत्-

त्वर्ठ्हसः ॥ यदि जाग्ग्रद् यदि स्वप्प्न्नS एनौऽसि चकृमा बयम् । सूर्य्यो मा तस्म्मादेनसो बिश्श्वान्न् मुञ्चतत्वर्ठ्हसः ॥ मासं.२०।१४-१६॥ १

(कर्मार्थाभिमन्त्रितजलेनाऽऽत्मनः कर्मसामग्ग्र्याश्च सेचने मन्त्रः)

अपवित्त्रः पवित्त्रो वा सर्वावस्थाङ् गतोऽपि वा ।
यस् स्मरेत् परमात्मानं स बाह्य्याभ्यन्तरश् शुचिः ॥

(गोदाने गोपूजने मन्त्रौ)

नमो गोब्भ्यश् श्रीमतीब्भ्यस् सौरभेयीब्भ्य एव च ।
नमो ब्रह्म्मसुताब्भ्यश् च पवित्त्राब्भ्यो नमोनमः ॥

इरावती धेनुमती हि भूतर्ठ् सूयवसिनी मनवे दशस्स्या । ब्यस्कब्भ्ना रोदसी बिष्ण्णवे ते दाधर्त्थ पृथिवीमभितो मयूखैः स्वाहा ॥मासं. ५।१६॥

(ब्राह्म्मणपूजने मन्त्रः)

आ कृष्ण्णेन रजसा बर्त्तमानो निवेशयन्नमृतम् मर्त्त्यञ् च ।
हिरण्ण्ययेन सविता रथेना देवो याति भुवनानि पश्श्यन् ॥ मासं. ३३।४३॥

(गोपुच्छजलेनाऽऽत्मनश् शिरस्स्यभिषेचने मन्त्रः)

मनो मे तर्प्पयत बाचम् मे तर्प्पयतप् प्राणम् मे तर्प्पयत चक्क्षुर्म् मे तर्प्पयतश् श्रोत्त्रम् मे तर्प्पयताऽऽत्त्मानम् मे तर्प्पयतप् प्रजाम् मे तर्प्पयत पशून्न् मे तर्प्पयत गणान्न् मे तर्प्पयत गणा मे मा बितृषन् ॥ मासं. ६।३१॥

(सर्वप्रायश्चित्तप्रत्याम्नायरूपे गोदाने सङ्कल्पवाक्क्यम्)

ओ३म् । तत् सत् । स्वस्ति । श्रीमद्भगवतो महापुरुषस्स्य अचिन्त्यापरिमितमाया-शक्तिकस्स्य लीलामयेच्छया सृष्टानाम् पञ्चाशत्कोटियोजनविस्तारकाणामव्यक्तमह-दहङ्काराऽऽकाशवायुतेजोप्पृथिवीरूपावरणावृतचतुर्दशभुवनात्मकानामनन्तकोटिसङ्ख्याका-नाम् ब्रह्म्माण्डानामेकतमस्मिन्नेतस्मिन् ब्रह्म्माण्डे भूर्लोके भूमण्डले जम्बूद्वीपे भारतवर्षे कुमारिकाखण्डे आर्यावर्तान्तर्गते हिमालयदक्षिणपार्श्वस्थे नेपालदेशे विष्णुप्प्रजापतिक्षेत्त्रे गण्डकीप्प्रदेशे श्रीकृष्णाया गण्डक्क्याः पूर्वस्स्यामुत्तरस्स्यात्र् च दिशि माहेन्द्रीकर्मदयोरन्तराले चन्द्रिकानिकटे त्रितुङ्गाऽचलाङ्कित-जनपदान्तर्गत-ताम्म्रकूटग्रामोपत्त्यकायामिह पुण्ण्यदेशे वेदोक्तजगत्सृष्टिकारिणो नारायणनाभिकमलोद्भवस्स्य ब्रह्म्मणो द्वितीये परार्धे प्रथमे वर्षे प्रथमे मासे ब्रह्म्मतित्थ्यात्मकेषु मत्स्यपुराणाद्युक्तेषु श्वेतवाराहादिषु त्रिंशति कल्पेषु प्रथमे श्वेतवाराहकल्पे स्वायम्भुवादिषु चतुर्दशसु मन्वन्तरेषु सप्तमे वैवस्स्वतमन्वन्तरे एकसप्ततौ ससन्ध्यांशासु चतुर्युगीषु अष्टाविंशतितम्म्यात्र् चतुर्युग्ग्याम् , तत्त्र च सत्त्य-त्रेताद्वापरेषु व्यतीतेषु कलौ युगे प्रवृत्ते, तस्स्य प्रथमे चरणे पञ्चसु सहस्स्रेषु पञ्चनवतौ च वर्षेषु गतेषु *(बार्हस्पत्त्यमानाऽनुकूलानां षष्ट्टेस् सवँत्सराणाम् पञ्चवर्षात्मकेषु वैष्णवादिषु द्वादशसु युगेषु पञ्चमे त्वाष्ट्रे युगे तस्स्य च वेदोक्तेषु सवँत्सरपरिवत्सरेदावत्सरेद्वत्सर-वत्सराक्ख्येषु पञ्चसु वर्षेषु द्वितीये सर्वधार्यपरनामके परिवत्सराक्ख्ये वर्षे)* श्रीसूर्ये उत्तरायणगते शिशिरे ऋतौ सौराभिधानेन तपसि मासे चान्द्राभिधानेन माघे मासे शुक्ले पक्षे षष्ठ्यान् तिथौ *(कौलवे करणे)* रेवत्त्यान् नक्षत्त्रे *(विष्कम्भादिषु सप्तविंशतौ योगेषु द्वाविंशे साद्ध्ये योगे)* आदित्त्यवासरे श्रीसूर्ये मकरराशौ स्थिते देवगुरौ वृश्चिकराशौ स्थिते

---

१. परम्परयाऽऽगत कर्मपात्त्रनिर्माणप्प्रकारोऽनिर्ज्ञातमूलः, एते मन्त्रास् तु अस्माभिश् श्राद्धकाशिका-गदाधरभाष्य-विश्श्वनाथभाष्य-संस्कारभास्कर-रामोपाद्ध्यायकृतान्त्त्यपद्धत्त्यादिस्स्थकात्त्यायनादि-वचनान्न्युपजीव्व्य प्रतिपादिता ज्ञेयाः ।

चन्द्रमसि मीनराशौ स्थिते शेषेषु ग्रहेषु यथायथं राशिषु स्थितेषु सत्सु एवङ् ग्रहगणविशेषेण विशिष्टे शुभे पुण्ये काले अद्य पूषदत्तशर्म्मा कौण्डिन्न्यगोत्रो वासिष्ठमैत्त्रावरुणकौण्डिन्न्येतितित्रिप्प्रवरो माद्ध्यन्दिनीयवाजसनेयि-शुक्लयजुर्वेदशाखाद्ध्यायी अहम् मम ज्ञाताऽज्ञात-सकृदसकृत्कृतकामाऽकामकृताऽतिपातक-पातकाऽनुपातकोपपातक-जातिभ्रंशकरपातकसङ्करीकरणपातकाऽपात्त्रीकरणपातकमलिनीकरणपातक-प्रकीर्णपातकादिसकल-कायिक-वाचिक-मानसिक-सांसर्गिक-पातकानान् निरसनेन देहशुद्ध्या करिष्यमाण-वर्षवृद्धिमहोत्सव-प्रयुक्त-गुर्वादि-पूजन-होम-कर्माऽधिकार-सिद्ध्यर्थम् एतां सर्वप्रायश्चित्तप्रत्त्याम्नायतया दीयमानाङ् गां रुद्द्रदैवताम् (एतत् सर्वप्रायश्चित्त-प्रत्त्याम्नायतया दीयमानङ् गोनिष्क्रयद्रव्व्यवँ विष्णुदैवतम्) नारायणदत्तशर्म्मणे भारद्द्वाज- गोत्त्राय सुपूजिताय ब्राह्म्मणाय तुब्भ्यं सम्प्रददे, तत् सन् न मम ॥

(गोदाने प्रार्थनामन्त्र)

यज्ञसाधनभूता या विश्श्वस्स्याघप्प्रणाशिनी ।
विश्श्वरूपधरो देव प्रीयतामनया गवा ॥

(गोनिष्क्रयद्रव्यदाने प्रार्थनामन्त्र)

यज्ञसाधनभूता गौर् विश्श्वस्स्याघप्प्रणाशिनी ।
तस्स्या मूल्ल्यप्प्रदानेन प्रीयतावँ विश्श्वरूपधृक् ॥

(गोप्रार्थनामन्त्र)

कपिले सर्वदेवानाम् पूजनीयाऽसि रोहिणी ।
तीर्थदेवमयीं यस्मादतश् शान्तिम् प्रयच्छ मे ॥

(दानप्प्रतिष्ठासङ्कल्पवाक्क्यम्)

ओ३म् । पूर्वसङ्कल्पसिद्धिरस्तु, "अस्तु", इहाऽद्य कृतस्स्य सर्वप्रायश्चित्तप्रत्त्याम्नायभूतस्स्य गोदानस्स्य (गोनिष्क्रयद्रव्व्यदानस्स्य) प्रभावसम्पत्तेस् सिद्धये सुवर्णमग्नि-दैवतम् (एतद् द्रव्व्यवँ विष्णुदैवतम्) नारायणदत्तशर्मणे भारद्द्वाजगोत्त्राय सुपूजिताय ब्राह्म्मणाय तुब्भ्यमहं सम्प्रददे, तत् सन् न मम ।

(गोप्रतिग्ग्रहे गोनिष्क्रयद्रव्यप्रतिग्ग्रहे वा मन्त्र)

द्यौस्त्त्वा ददातु पृथिवीत् त्वाप् प्रतिगृह्ण्णातु । देवस्स्यत् त्वा सवितु ? प्प्रसवेऽश्श्विनोर्ब् बाहुब्भ्याम् पूष्ण्णो हस्त्ताब्भ्याम् । रुद्द्राय गाम् (विष्ण्णवे गोनिष्क्रय-द्रव्व्यम्) प्रतिगृह्ण्णामि । स्वस्त्ति ॥

(प्रतिग्ग्रहे कामस्तुतौ मन्त्र)

कोऽदात्त् कस्म्माऽअदात्त् कामोऽदात्त् कामायाऽदात् । कामो दाता काम ÷ प्प्रतिग्ग्रहीता कामैतत् ते ॥ मासं. ७।४८

(गोप्रतिग्ग्रहे गोपुच्छोदकेन दातुरभिषेचने मन्त्र)

द्यौ ? शान्तिरन्तरिक्क्षँ शान्ति ÷ पृथिवी शान्तिराप ६ शान्तिरोषधय ६ शान्ति ÷ । बनस्प्पतय ६ शान्तिर्ब्बिश्श्वे देवा ? शान्तिर्ब् ब्रह्म्म शान्ति ६ सर्व्वँ शान्ति ६ शान्तिरेव शान्ति ६ सा मा शान्तिरेधि ॥ मासं. ३६।१७॥

(रोगावस्थादिजन्न्याचारशैथिल्ल्यादिप्रायश्चित्तरूपप्राजापत्त्यानुकल्पगोदानके वाक्क्यम्)

(स्नात शुद्धवासा प्राङ्मुख कर्ताऽऽचम्म्य प्राङ्मुखीङ् गाम् (गोनिष्क्रयद्रव्यम्) उदङ्मुखम् ब्राह्म्मणञ् च स्थापयित्वा गाङ् गोनिष्क्रयद्रव्व्यवँ वा सम्पूज्ज्य ब्राह्म्मणञ् च पूजयित्त्वा) ओ३म् । तत् सत् ...... मम रोगावस्थायाम् (प्रसूतिकावस्थायाम् प्रवासावस्थायाम्

अन्न्येषु सङ्कटेषु वा) जातस्य अवश्श्यकर्तव्व्यशौचस्नानशुद्धवस्त्रपरिधाननित्त्यकर्माऽनुष्ठानलोपाऽशुचिस्पृष्ट-भोजनादिरूप-स्ववर्णाश्श्रमधर्म-मर्यादाच्युतिजन्न्यस्स्य प्रत्त्यवायस्स्य अपाकरणाय प्राजापत्त्यकृच्छ्र-प्रत्त्याम्नायभूतगोदानानुकल्पतया एतद् गोमूल्ल्यद्रव्व्यन् नाणकपत्त्ररूपवँ विष्णुदेवतममुकशर्मणेऽमुकगोत्त्राय सुपूजिताय ब्राह्म्मणाय तुब्भ्यँ सम्प्रददे तत् सन् न मम ॥

(ततो गोप्रार्थनाङ् कृत्त्वा दानप्रतिष्ठाद्रव्व्यञ् च ददीत) ।

(शिखा-सूत्त्र-स्नान-सन्ध्योपासनाऽऽदिनित्त्यकृत्त्यलोपे लशुनपलाण्ड्वाद्यभक्ष्यभक्षणे अन्न्याऽकार्यकरणे च कर्तव्व्यस्य सङ्क्षिप्तस्स्य प्रायश्चित्तस्स्य प्रयोग)

माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखामन्त्रसंहिता-याज्ञवल्क्यस्मृति-मनुस्मृति-पराशरस्मृत्त्यादि-पुस्तकान्न्यग्ग्रे खट्विकायान् निधाय प्राङ्मुखा पारिषद्द्या ब्राह्म्मणा उपविशेयु । तदसम्भवे वेदादिधर्मशास्त्रवित् सुदृढतया आस्तिकस् सदाचारशीलो न्याय्यवृत्तिरेको वा ब्राह्म्मणस् तथोपविशेत् ।

ततश् शोधनीयो जनस् सचैलस्नानङ् कृत्त्वा ब्राह्म्मणप्रदक्षिणावँ विधाय ब्राह्म्मणाग्ग्रे गत्त्वा गोमूल्ल्यमवरतो राजतशतमानमात्त्रन् निधाय दण्डवत् प्रणम्म्य ब्राह्म्मणाऽभिमुख उपविशेत् ।

तत "किन् ते कार्यम्?" इति ब्राह्म्मणपृष्टश् शोधनीयो जन "मम जन्मप्प्रभृति अद्द्य यावत् कामेनाऽकामेन सकृदसकृद् वा कृतानाञ् ज्ञाताज्ञातानाङ् कायिक-वाचिक-मानसिक-सांसर्गिक-नानाविधपापानाम् , ज्ञानमान्द्य-शरीरदौर्बल्ल्य-वृत्तिकार्श्य-व्यवहारसङ्कटादिमूलक-शिखासूत्त्रलोप-नित्त्यस्नानसन्ध्योपासनलोप-लशुनपलाण्ड्वादिभक्षण-कुक्कुटपालनादि-कार्यकरणजन्न्य-भक्ष्याऽभक्ष्य-पेयाऽपेय-कार्याऽकार्यादि-विषयक-शास्त्रोक्त-नियम-परित्त्यागादि-जात-ब्राह्म्मणाचार- शैथिल्ल्यज-दोषाणाञ् च निरसनेन देहस्स्य शुद्धये सानुग्ग्रहम् प्रायश्चित्तम् उपदिशन्तु भवन्त" इति ब्ब्रुवीत ।

ततो ब्राह्म्मण "सर्वेषामेव पापानां सङ्करे समुपस्स्थिते । दशसाहस्रमब्भ्यस्ता गायत्त्री शोधनम् परम्" इति पराशरस्स्मृतिवचनस्स्य (११।५५,५६), "यत्त्रोक्तयँ यत्त्र वा नोक्तमिह पातकशोधनम् । प्राजापत्त्येन कृच्छ्रेण शुद्ध्यते नाऽत्त्र संशय" इति पराशरमाधवीयधृतोशनोवचनस्स्य (पृ.३६१) "येषान् द्विजानां सावित्त्री नाऽनूच्च्येत यथाविधि । ताँश् चारयित्त्वा त्त्रीन् कृच्छ्रान् यथाविद्ध्युपनाययेत् ॥ प्रायश्चित्तञ् चिकीर्षन्ति विकर्मस्थास् तु ये द्विजा । ब्रह्म्मणा च परित्त्यक्तास् तेषामप्प्येतदादिशेत्" इति मनुस्मृतिवचनस्स्य (११।१९१,१९२) "अथाऽपरो ब्राह्म्मणवचनादेव सावित्त्र्या शतकृत्त्वो घृतमभिमन्त्र्य प्राश्श्य कृतप्रायश्चित्तो भवति" इति निर्णयसिन्धुधृतबौधायनवचनस्स्य (पृ.१९९) च प्रामाण्ण्याद् वेद-स्मृति-पुराणेषु देव-पितृ-ब्राह्म्मणेषु च श्रद्धाङ् कृत्त्वा आस्तिक्क्यमालम्ब्य पूर्वेद्द्युर् मुण्डनं स्नानञ् च कृत्त्वा पञ्चगव्व्यम् प्राश्श्य दश-सहस्र-कृत्त्वो गायत्त्रीमब्भ्यस्स्य उपोष्य उत्तरेद्द्यु प्राजापत्त्य-कृच्छ्रत्त्रय-प्रत्त्याम्नायतया गोत्त्रय-निष्क्रयद्रव्व्य-दानेन बौधायनोक्तेन पुनरुपनयनस्थानीयेन सावित्त्र्या गायत्त्र्या शतकृत्त्वोऽभिमन्त्रितस्स्य घृतस्स्य प्राशनेन ब्राह्म्मणत्त्रयभोजनेन च त्वम् पूतो व्यवहार्यो भविष्ष्यसि इति सानुग्ग्रहमुपदिश्श्यते इति ब्रूयात् ।

प्रायश्चित्तोपदेशकस् तद्दोषनिरासाय यथाकालं सहस्रकृत्त्वो गायत्त्रीञ् जपेत् ।

शोधनीयो जनस्तु प्रायश्चित्तोपदेशानन्तरम् "अनुगृहीतोऽस्मि" इत्त्युक्त्वा प्रणमेत् ।

तदनन्तरं शोधनीयो जनो यथास्थानम् प्राङ्मुख उपविश्श्य प्रधानसङ्कल्पपूर्वकवँ वपनादिसङ्कल्पङ् कृत्त्वा वपनादिकङ् कुर्वीत । तद् यथा--

"ओ३म् । तत् सत् । स्वस्ति । श्रीमद्भगवतो....अहम् मम जन्मप्प्रभृति अद्द्य यावत् कामेनाऽ कामेन सकृदसकृद् वा कृतानाञ् ज्ञाताज्ज्ञातानाङ् कायिक-वाचिक-मानसिक-सांसर्गिक-नानाविधपापानाम् ,ज्ञानमान्द्य-शरीरदौर्बल्ल्य-वृत्तिकार्श्य-व्यवहारसङ्कटादि- मूलक-शिखासूत्रलोप-नित्त्य-स्नान-सन्ध्योपासन-लोप-लशुनपलाण्ड्वादि-भक्क्षण-कुक्कुटपालनादिकार्य-करणजन्न्य-भक्क्ष्याभक्क्ष्य-पेयापेय-कार्याकार्यादि-विषयक-शात्रोक्त-नियम-परित्त्यागादि-जात-ब्राह्म्मणाचारशैथिल्ल्यजदोषाणाञ् च निरसनेन देहस्स्य शुद्धये दशसहस्स्रकृत्त्वो गायत्त्र्या जपम् ,प्राजापत्त्य-कृच्छ्र-त्त्रय-प्रत्त्याम्नायरूप-गोत्रय-निष्क्रय-द्रव्व्यदानम् पुनरुपनयनानुकल्प-रूपङ् गायत्त्रीशताभिमन्त्रितघृतप्प्राशनम् ब्राह्म्मणत्त्रय-भोजनञ् चेति प्रायश्चित्तयँ यथा-कालङ् करिष्ष्ये । तदङ्गतया केशश्मश्रुवपनन् नख-निकर्तनञ् च नापितादिद्द्वारा करिष्ष्ये" इति सङ्कल्पङ् कुर्वीत ।

ततश् शोधनीयो जन केशश्मश्रुवपनन् नखनिकर्तनञ् च कृत्त्वा दन्तधावनकाष्ठेन दन्तान् धावित्त्वा स्नानङ् कुर्वीत । ततो धौते वाससी परिधाय कुशोत्तरे शुद्धे आसने प्राङ्मुख उपविश्श्य "ओ३म् । इहाद्द्य नानाविधपापसमूहनिरासाय दशसहस्स्रकृत्त्वो गायत्त्र्या जपमहङ् करिष्ष्ये" इति सङ्कल्प्य जपमालाञ् जपगुडिका वा गृहीत्त्वा दशसहस्स्रसङ्ख्यया गायत्त्रीमब्भ्यस्स्येत् । तद्रात्त्रीमुपवासेनैव नयेत् । अशक्तौ हविष्ष्यम् फलादिकवँ वा भुञ्जीत ।

ततश् श्वोभूते शोधनीयो जनस् स्नात्त्वा सन्ध्योपासनङ् कृत्त्वा प्राङ्मुख उप--विश्श्य त्त्रिषु पत्त्रपात्त्रेषु गोनिष्क्रयद्रव्व्याणि निधाय तत्त्र पवित्त्राणि च निधाय देय- द्रव्व्यम् ब्राह्म्मणाँश् च गन्धाक्क्षतपुष्पै सम्पूज्ज्य सङ्कल्पङ् कुर्वीत । "ओ३म् । तत् सत् । स्वस्ति। इहाद्द्याऽहम् मम देहस्स्य शुद्धये प्राजापत्त्य-कृच्छ्र-त्त्रय-प्रत्त्याम्नायतयोपकल्पितमेतद् गोत्रयनिष्क्रयद्रव्व्यन् नानानामब्भ्यो नानागोत्त्रेब्भ्य सुपूजितेब्भ्यो ब्राह्म्मणेब्भ्यो दातुमुत्सृजे तत् सन् न मम" इति सङ्कल्प्य पूजितेब्भ्यस् त्त्रिब्भ्यो ब्राह्म्मणेब्भ्यो ददीत । ततो दानप्रतिष्ठाद्रव्व्यञ् च "ओ३म् । तत् सत् । स्वस्ति । इहाऽद्द्य कृच्छ्रत्त्रयप्रत्त्याम्नायतया कृतस्स्य गोत्रयनिष्क्रयद्रव्व्यदानस्स्य प्रभावस्स्य सम्पत्तये एतन् नाणकद्रव्व्यन् दक्क्षिणात्त्वेन नानानामब्भ्यो नानागोत्त्रेब्भ्यस् सुपूजि तेब्भ्यो ब्राह्म्मणेब्भ्यो दातुमहमुत्सृजे तत् सन् न मम" इति सङ्कल्प्य पूजितेब्भ्यस् त्त्रिब्भ्यो ब्राह्म्मणेब्भ्यो ददीत । ततो ब्राह्म्मणा गोनिष्क्रयद्रव्व्यन् दक्क्षिणाञ् च यथाविधि गृहीत्त्वा कामस्तुतिम् पठित्त्वा "देहशुद्धिर् भवतु" इत्त्युक्त्वा द्यौ शान्ति--रित्त्यादिना मन्त्रेण शोधितञ् जनमभिषिञ्चेयु ।

शोधनीयजनपत्नी च पूर्वदिने सशिरस्कं स्नानङ् गृहशुद्धिवँ वस्त्रशुद्धिञ् च विधायोपोषिता अशक्तौ हविष्ष्यभोजनेन फलादिभोजनेन वा स्थिता वाऽपि देह-श्शुद्धिगोदानङ् कुर्वीत ।

तत आचार्यो गायत्त्रीशताभिमन्त्रितङ् गोघृतं शुद्ध्यर्थिने दद्द्यात् । शुद्ध्यर्थी प्राश्नीयात् । ततस् त्रीन् ब्राह्म्मणान् भोजयेत् ॥

(इति सङ्क्षिप्तस्स्य प्रायश्चित्तस्स्य प्रयोग)

(पुण्याहवाचनमन्त्रा २)

१. पुनन्तु मा देवजना ऽ पुनन्तु मनसा धियः ।
पुनन्तु विश्श्वा भूतानि जातवेद पुनीहि मां ॥ मासं. १९।३९॥

२. स्वस्तति नऽ इन्द्रो बृद्धश्श्रवा स्वस्तति नः पूषा बिश्श्ववेदा ।
स्वस्तति नस्त् तार्क्क्ष्योऽ अरिष्ट्टनेमि स्वस्तति नो बृहस्प्पतिर्द् दधातु ॥
मासं. २५।१९॥

३. सत्रस्स्यऽ ऋद्धिरस्स्य गन्न्मज् ज्योतिरमृताऽ अभूम ।
दिवम् पृथिब्ब्याऽ अद्ध्यारुहामाविदाम देवान् त्स्वर्ज् ज्योतिः ॥ मासं. ८।५२॥

४. ज्यैष्ट्ठ्यञ् च मऽ आधिपत्त्यञ् च मे मन्न्युश् च मे भामश्च् च मेऽमश्च् च मेऽम्भश्च् च मे जेमा च मे महिमा च मे बरिमा च मेप् प्रथिमा च मे बर्षिमा च मेद् द्राघिमा च मे बृद्धञ् च मे बृद्धिश्च् च मे षज्ज्ञेन कल्प्पन्ताम् ॥
मासं.१८।४॥

५. षथेमावँ वाचङ् कल्ल्याणीमावदानि जनेब्भ्य ।
ब्रह्ममराजन्न्याब्भ्याँ शूद्द्राय् चार्य्याय चस् स्वाय् चारणाय च ॥ मासं. २६।२॥

६. मनस कामुमाकूतिवँ वाच ऽ सत्त्यमशीय ।
पशूनाँ रूपमन्नस्स्य रसो षश श्री ऽ श्रयताम् मयि ॥ मासं. ३९।४॥

७. द्यौ ऽ शान्तिरन्तरिक्क्षँ शान्तिः पृथिवी शान्तिराप शान्तिरोषधय शान्तिः ।
बनस्प्पतय शान्तिर्ब् बिश्श्वे देवा ऽ शान्तिर्ब् ब्रह्मम शान्ति सरब्बँ शान्ति शान्तिरेव शान्ति सा मा शान्तिरेधि ॥ मासं. ३६।१७॥

मन्त्रार्था सफलास् सन्तु पूर्णास् सन्तु मनोरथा ।
शत्त्रूणाम् बुद्धिनाशोऽस्तु मित्त्राणामुदयस् तव ॥
भद्द्रमस्तु शिवञ् चाऽस्तु महालक्ष्मी प्रसीदतु ।
रक्क्षन्तु त्त्वां सदा देवास् सम्पदस् सन्तु सुस्थिरा ॥
सपत्ना दुर्ग्रहा पापा दुष्टसत्त्वाद्द्युपद्द्रवा ।
हस्ते पूगीफलन् दृष्ट्वा निष्प्रभावा भवन्तु ते ॥

(विवाहार्थङ् कुमार्या वाचा दाने मन्त्र)

वाचा दत्ता मया कन्न्या पुत्त्रार्थं स्वीकृता त्वया ।
कन्न्यावलोकनविधौ निश्चितस् त्वं सुखी भव ॥

---

२. बोधायनेन पुण्याहम् , स्वस्ति, ऋद्धि इत्त्येव, रूपनारायणीये च तथैव, गण्डकीप्रदेशान्तार्गतत्रितुङ्गाऽचलाङ्कित-जनपदे लिखितेषु प्राचीन-ग्रहशान्ति-पुस्तकेषु च तथैव; सत्त्याषाढेन पुण्याहम् , स्वस्ति, ऋद्धि, श्री इत्त्येव, संस्कारगणपतौ पुण्याहम् , स्वस्ति, ऋद्धि, कल्ल्याणम् , श्री इत्त्येव (पृ. ९९), संस्कारभास्करे तु पुण्याहम् , कल्ल्याणम् , ऋद्धि, स्वस्ति, श्री इति (पृ. ३८), सङ्कल्परत्नावली पुण्याहम् , स्वस्ति, ऋद्धि , कल्ल्याणम् , शान्ति इति (पृ. १३८), संस्कारदीपके प्रथमभागे तु पुण्याहम् , स्वस्ति, ऋद्धि, वृद्धि, कल्ल्याणम्, श्री, शान्ति इति (पृ. १२६) प्रतिपादितम् । नेपालनिवासि-माद्ध्यन्दिनीय-वाजसनेयि-कान्न्यकुब्ज-ब्राह्मणेषु प्रचलिता पुण्याहवाचनपद्धति "स्वस्तिऋद्ध्यादिभिश्चादावन्ते चैव विशेषत । पुण्याहम् ब्राह्मणै कार्यवँ वेद-वेदाङ्ग-पारगै" इत्त्यादिकम् पुराणवचनम् (हेमाद्रिदानखण्डे, पृ १९८) अनुसरन्ती प्रतीयते, तेषां स्व-शाखा-ग्रन्थेषु पुण्याह-वाचन-विधेरदृश्श्यमानत्त्वात् ।

(विवाहार्थङ् कुमार्या वाचा स्वीकारे मन्त्र)

वाचा दत्ता त्वया कन्या पुत्त्रार्थं स्वीकृता मया ।
वरावलोकनविधौ निश्चितस् त्वं सुखी भव ॥

(पञ्चलोकपालपूजामन्त्रा[३])

गणानांन् त्वा गणपतिं हवामहेप् प्रियाणांन् त्वाप् प्रियपतिं हवामहे निधीनान् त्वो निधिपतिं हवामहे बसो मम । आहमंजानि गर्ब्भधमात् त्वमंजासि गर्ब्भधम् ॥
मासं. २३।१७॥

अम्बेऽअम्बिकेऽम्बालिके न मा नयति कश्च् च न ।
ससंस्त्यश्श्वकः सुभद्रिकाङ् काम्पीलवासिनीम् ॥ मासं. २३।१८॥
बायो ये ते सहस्रिणो रथासस्त् तेभिरागहि ।
नियुत्त्वान् त्सोमपीतये ॥ मासं. २७।३२ ॥
ऊर्द्ध्वाऽअस्य समिधो भवन्त्यूर्द्ध्वा शुक्क्रा शोचींष्यग्ग्नेः ।
द्युमत्तमा सुप्प्रतीकस्स्य सूनोः ॥ मासं. २७।११॥
या वाङ् कशा मधुमत्त्यश्श्विना सूनृतावती ।
तया यज्ज्ञम् मिमिक्क्षतम् ॥ मासं. ७।११॥

(गोमयमातृकापूजामन्त्र)

अदितिर् देवमाता च स्वाहा सिद्धि सरस्वती ।
कीर्तिर् लक्ष्मीर् धृतिर् मेधा पुष्टिश् श्रद्धा क्रिया मति ॥
बुद्धिर् लज्जा वपुश् शान्तिर् यूयङ् गोमयमातर ।
पूज्ज्यद्ध्वे द्वार्बहिर्देशे प्रसन्नास् स्त वरप्प्रदा ॥

(तोरणमातृकापूजामन्त्र)

गौरी च धनदा नन्दा विमला मङ्गला बला ।
गङ्गा च यमुना धात्त्री विधात्त्री तोरणेऽर्चिता ॥

(द्वारमातृकापूजामन्त्र)

नन्दे नन्दिनि वासिष्ठि वसुदेवे च भार्गवि ।
जये च विजये युष्मान् पूजये द्वारमातृका ॥

(ब्राह्म्म्यादिसप्तमातृकापूजामन्त्र)

ब्राह्म्मि माहेश्श्वरि तत कौमारि वैष्णवि तथा ॥
वाराहीन्द्राणि चामुण्डे पूजये वो वरप्प्रदा ॥

(सगणेशगौर्यादिषोडशगृहाब्भ्यन्तरमातृकापूजामन्त्र)

गणाधिपन् तदनुगा आवाह्य्यैतास् समर्चये ।
गौरीम् पद्मां शचीम् मेधां सावित्त्रीवँ विजयाञ् जयाम् ॥
देवसेनां स्वधां स्वाहाम् मातृश् च लोकमातृका ।
हृष्टिम् पुष्टिन् तथा तुष्टिमात्मन कुलदेवताम् ॥

(वसोर्धारामन्त्र मासं. १।३)

बसोः पवित्त्रमसि शतधारवँ वसोः पवित्त्रमसि सहस्रधारम् ।
देवस्त् त्वा सविता पुनातु बसोः पवित्त्रेण शतधारेण सुप्प्वा कामधुक्क्षः ॥ १।४॥

---

३. क्व चित् कुले मङ्गलसप्तकं स्यात् क्व चित् कुले मङ्गलपञ्चकञ् च ।
स्यान् मङ्गलानान् त्रितयङ् क्व चिच् च नोल्लङ्घनीया कुलदेशधर्मा ॥

(वसोर्धारामातृकापूजनमन्त्र)

श्रीश् च लक्ष्मीर् धृतिर् मेधा स्वाहा प्रज्ञा सरस्वती ।
एतास् सम्पूजिता अत्र माङ्गल्ल्ये घृतमातृका ॥

(आयुष्यजपमन्त्रा)

आयुष्ष्यवँ वर्च्चसस्य्ँ रायस्प्पोषमौद्द्भिदम् ।
इदँ हिरण्ण्यवँ वर्च्चस्स्वज् जैत्त्रायाऽऽविशतादु माम् ॥ मासं. ३४।५०॥
न तद्द्रक्क्षाँसि न पिशाचास्त् तरन्ति देवानामोजः प् प्रथमजँ ह्येतत् ।
यो बिभर्त्ति दाक्क्षायणँ हिरण्ण्यँ स देवेषु कृणुते दीर्ग्घमायुः
स मनुष्ष्येषु कृणुते दीर्ग्घमायुः ॥ मासं. ३४।५१॥
यदाबद्ध्नँन् दाक्क्षायणा हिरण्ण्यँ शतानीकाय सुमनस्स्यमानाः ।
तन्न् मऽआबद्ध्नामि शतशारदायाऽऽयुष्म्मात्र् जरदष्ट्टिर् यथासम् ॥३४।५२॥

(अथवा ४)

आ नो भद्द्राः क् क्रतवो यन्तु बिश्श्वतोऽदब्ब्धासोऽ अपरीतासऽ उद्द्भिदः ।
देवा नो यथा सदमिद् द्वृधेऽ असन्नप्प्रायुवो रक्क्षितारो दिवेदिवे ॥ मासं. २५।१४॥
देवानाम्म् भद्द्रा सुमतिर् ऋजूयतान् देवानाँ रातिरभि नो निवर्त्तताम् ।
देवानाँ सक्ख्यमुपसेदिमा बयन् देवा नऽ आयुः प् प्र तिरन्तु जीवसे ॥ मासं. २५।१५॥
तान्न् पूर्व्वया निविदा हूमहे बयम् भगम् मित्त्रमदितिन् दक्क्षमस्रिधम् ।
अर्य्यमणवँ वरुणँ सोममश्श्विना सरस्स्वती नः सुभगा मयस्क् करत् ॥ २५।१६॥
तन् नो बातो मयोभु बातु भेषजन् तन्न् माता पृथिवी तत्त् पिताद् द्यौः ।
तद्द् ग्रावाणः सोमसुतो मयोभुवस्त् तदश्श्विना शृणुतन् धिष्ण्ण्या युवम् ॥ २५।१७॥
तमीशानन्न् जगतस्त् तस्त्थुषस्प्पतिन् धियञ् जिन्न्वमवसे हूमहे बयम् ।
पूषा नो यथा बेदसामसद् द्वृधे रक्क्षिता पायुरदब्ब्धः स्वस्त्तये ॥ मासं. २५।१८॥
स्वस्त्ति नऽ इन्द्रो बृद्धश्श्रवाः स्वस्त्ति नः पूषा बिश्श्ववेदाः ।
स्वस्त्ति नस्त् तार्क्क्ष्योऽ अरिष्ट्टनेमिः स्वस्त्ति नो बृहस्प्पतिर्द् दधातु ॥२५।१९
पृषदश्श्वा मरुतः पृश्न्निमातरः शुभयँयावानो बिदथेषु जग्ग्मयः ।
अग्ग्निजिह्न्वा मनवः सूरचक्क्षसो बिश्श्वे नो देवाऽ अवसागमन्निह ॥ २५।२०॥
भद्द्रङ् कर्ण्णेभिः शृणुयाम देवा भद्द्रम् पश्श्येमाक्क्षभिर्य्यजत्त्राः ।
स्थिरैरङ्गैस्त् तुष्ट्टुवाँसस्त् तनूभिर्व् व्यशेमहि देवहितयँ यदायुः ॥ मासं. २५।२१ ॥
शतमिन् नु शरदोऽ अन्ति देवा यत्त्रा नश्च् चक्क्रा जरसन् तनूनाम् ।
पुत्त्रासो यत्त्र पितरो भवन्न्ति मा नो मद्ध्या रीरिषतायुर्ग्ग् गन्तोः ॥ मासं. २५।२२ ॥
अदितिर्द् द्यौरदितिरन्तरिक्क्षमदितिर्म् माता स पिता स पुत्त्रः ।
बिश्श्वे देवाऽ अदितिः पञ्चजनाऽ अदितिर्ज् जातमदितिर्ज् जनित्त्वम् ॥२५।२३॥

(दीपप्रज्ज्वलनमन्त्र आचारपरम्परयाऽऽगत)

स्थिरो भव बीड्ड्वङ्गऽ आशुर्ब् भव बाज्ज्यर्व्वन् ।
पृथुर्ब् भव सुषदस्त् त्वमग्ग्नेः पुरीषवाहणः ॥ मासं. ११।४४॥

---

४. आनो भद्द्रा इत्त्यादयोऽष्ट मन्त्रास् स्वस्तिवाचनेऽपि प्रयुज्यन्ते ।

(दीपपूजनमन्त्र, आचारपरम्परयाऽऽगत)

पृष्ट्टो दिवि पृष्ट्टोऽ अग्ग्निः पृथिव्व्याम् पृष्ट्टो बिश्श्वाऽ ओषधीराविवेश ।
बैश्श्वानरः सहसा पृष्ट्टोऽ अग्ग्निः स नो दिवा स रिषस्प् पातु नक्क्तम् ॥
मासं. १८।७३॥

(कलशस्थापनादिमन्त्रा: ५)

भूरसि भूमिरस्स्यदितिरसि बिश्श्वधाया बिश्श्वस्स्य भुवनस्स्य धर्त्त्री ।
पृथिवीयँ यच्छ पृथिवीन् दृँह पृथिवीम् मा हिँसी: ॥ मासं. १३।१८॥
ओषधयः समवदन्त सोमेन सह राज्ज्ञा ।
यस्म्मै कृणोतिब् ब्राह्म्मणस्त् तँ राजन्न् पारयामसि ॥ मासं. १२।९६॥
चित्त्पतिर्म् मा पुनात्त्वच्छिद्द्रेण पवित्त्रेण सूर्य्यस्स्य रश्म्मिभिः ।
तस्स्य ते पवित्त्रपते पवित्त्रपूतस्स्य यत्त्कामः पुने तच् छकेयम् ॥ मासं. ४।४॥
वाक्क्पतिर्म् मा पुनात्त्वच्छिद्द्रेण. ॥ मासं. ४।४॥
देवो मो सविता पुनात्त्वच्छिद्द्रेण. ॥ मासं. ४।४॥
आ जिग्घ्र कलशम् मह्य्यात् त्वा बिशन्त्विन्दवः । पुनरूर्ज्जा निवर्त्तस्स्व सा नः
सहस्स्रन् धुक्क्ष्वोरुधारा पयस्स्वती पुनर्म् मा विशताद् द्रयिः॥ मासं. ८।४२॥
स्थिरो भव बीड्ड्वङ्ग. ॥ मासं. ११।४४॥ (द्र. पृ. १००)।
महीद् द्यौः पृथिवी च नऽ इमयँ यज्ज्ञम् मिमिक्क्षताम् ।
पिपृतान् नो भरीमभिः ॥ मासं. ८।३२॥
याऽ ओषधीः पूर्व्वा जाता देवेब्भ्यस्त् त्रियुगम् पुरा ।
मनै नु बब्भ्रूणामहँ शतन् धामानि सप्प्त च ॥ मासं. १२।७५॥
व्रीहयश्च् च मे यवाश्च् च मे माषाश्च् च मे तिलाश्च् च मे मुद्द्गाश्च् च मे
खल्ल्वाश्च् च मेप् प्रियङ्ग्वश्च् च मेऽणवश्च् च मेश् श्यामाकाश्च् च मे नीवाराश्च्
च मे गोधूमाश्च् च मे मसूराश्च् च मे यज्ज्ञेन कल्प्पन्ताम् ॥ १८।१२॥
हिरण्ण्यगर्ब्भः समवर्त्तताग्ग्रे भूतस्स्य जातः पतिरेकऽ आसीत् ।
स दाधार पृथिवीन् द्यामुतेमाङ् कस्म्मै देवाय हविषा विधेम ॥ मासं. १३।४॥
अश्श्वत्त्थे वो निषदनम् पर्ण्णे वो बसतिष् कृता ।
गोभाजऽ इत्त् किलासथ यत् त्सनवथ पूरुषम् ॥ मासं. १२।७९॥
काण्डात्त्काण्डात्त् प्ररोहन्ती परुषः परुषस्प् परि ।
एवा नो दूर्व्वेप् प्रतनु सहस्स्रेण शतेन च ॥ मासं १३।२०॥
स्योना पृथिवि नो भवाऽनृक्क्षरा निवेशनी ।
यच्छा नः शर्म्म सप्प्रथाः ॥ मासं. ३५।२१॥
धान्न्यमसि धिनु हि देवान्न् प्राणायत् त्वोदानायत्त्वाब् व्यानायत् त्वा ।
दीर्ग्घामनुप् प्रसितिमायुषे धान् देवो वः सविता हिरण्ण्यपाणिःप् प्रति-
गृब्भ्णात्त्वच्छिद्द्रेण पाणिना ॥ मासं. १।२०॥

---

५ एते कलशस्थापनमन्त्रा रुद्रकल्पोक्तासकलकर्मोपयोगिकलशस्थापन-विधित्त्वेन वाचस्पत्त्ये कलसशब्दे प्रतिपादिते विधावुक्ता । नेपालीयाग्निस्थापन-पद्धतावनुसृत कलशस्थापनविधिस्तु कुत्रत्त्य इति न ज्ञायतेऽ तस् स उपेक्षित । सङ्क्षेपेण कलशे सम्पाद्ये आजिघ्रेति मन्त्रेणैव कलश स्थापनीय इति भविष्यपुराणे प्रतिपादितन् दृश्यते १।१३४।१५ ।

पूर्ण्णा दर्व्वि परापत सुपूर्ण्णा पुनरापत ।
बसन्नेव बिक्क्रीणावहाऽ इषमूर्ज्जꣳ शतक्क्रतो ॥ मासं. ३।४९॥
या ऽ फलिनीर्य्या ऽ अफलाऽ अपुष्प्पा याश्च्च पुष्प्पिणीः ।
बृहस्प्पतिप्प्रसूतास्ता नो मुञ्चन्त्वꣳहसः ॥ मासं. १२।८९॥
सुजातो ज्योतिषा सह शर्म्म बरूथमासदत् स्वः ।
बासोऽ अग्ग्ने बिश्श्वरूपꣳ सव्व्ययस्व बिभावसो ॥ मासं. ११।४०॥
पावका नः सरस्स्वती बाजेभिर्ब्बाजिनीवती ।
यज्ञं वष्ट्टु धियावसुः ॥ मासं. २०।८४॥
अश्श्वावतीर्ग्गोमतीर्न्नऽ उषासो बीरवतीः सदमुच्छन्तु भद्द्रा ऽ।
घृतन्दुहाना बिश्श्वतः प्प्रपीता यूयम्पात स्वस्स्तिभिः सदा नः ॥ ३४।४०॥
पञ्च नद्द्यः सरस्स्वतीमपि यन्ति सस्स्रोतसः ।
सरस्स्वती तु पञ्चधा सो देशेऽभवत् सरित् ॥ मासं. ३४।११॥

प्रपद्ये वरुणन् देवमम्भसाम् पतिमीश्श्वरम् ।
याचितन् देहि मे तीर्थं सर्वपापापनुत्तये ॥
गङ्गे त्वं सर्वतीर्थानामाश्श्रयोऽसि यतस् ततः ।
यजमानाभिषेकार्थमेहि पापवँ विनाशय ॥
तापनि यमुने देवि त्रिषु लोकेषु विश्श्रुते ।
यजमानाभिषेकार्थमेहि पापवँ विनाशय ॥
सरस्स्वति नमस् तुब्भ्यम् महेश्श्वरि हरिप्प्रिये ।
यजमानाभिषेकार्थमेहि पापवँ व्यपोह वै ॥
गङ्गे च यमुने चैव गोदावरि सरस्स्वति ।
नर्मदे सिन्धो कावेरि जलेऽस्मिन् सन्निधिङ् कुरु ॥
ब्रह्म्मा मूले तु कुम्भस्स्य मुखे विष्णुस् समाश्श्रितः ।
कण्ठे त्वस्स्य स्थितो रुद्द्रो मद्ध्ये मातृगणस् स्मृतः ॥
कुक्षौ तु सागरास् सप्त सप्तद्द्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेद सामवेदो ह्यथर्वणः ॥
अङ्गैश्च सहितास् सर्वे कलशन् तु समाश्श्रिताः ।
देवदानवसवाँदे मत्थ्यमाने महोदधौ ॥
उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ।
त्वत्तोये सर्वतीर्थानि देवास् सर्वे त्वयि स्थिताः ॥
त्वयि तिष्ठन्ति भूतानि त्वयि प्प्राणाः प्रतिष्ठिताः ।
शिवः स्वयन् त्वमेवाऽसि विष्णुस् त्वञ् च प्प्रजापतिः ॥
आदित्त्या वसवो रुद्द्रा विश्श्वेदेवा मरुद्गणाः ।
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्प्रदाः ॥
त्वत्प्रसादादिमयँ यज्ञङ् कर्तुमीहे जलोद्भव ।
सान्निद्ध्यङ् कुरु मे देव प्रसन्नो भव सर्वदा ॥

मनोंजूतिर्ज् जुषतामाज्ज्यंस्स्य बृहस्प्पतिंर्य्र् सजूजँत्रमिमन् तंनोतुत्वरिंष्ट्टयँ यजुर्ज्ञꣳ समिमन् दंधातु । बिश्श्वें देवासंऽ इह मांदयन्तामोꣳम् प्रतिंषट्ठ ॥ २।१३॥

कलश सुप्प्रतिष्ठितो भव ॥

(कलशे प्राराङ्गिके जलाधिदेवस्स्य वरुणस्स्य पूजने मन्त्र)

तत् त्वां यामिब् ब्रह्म्मंणा बन्दंमानस्त् तदाशांस्त्ते यजंमानो हविर्ब्भिं÷। अहेंडमानो बरुणेह बोद्ध्युरुंशꣳस मा नऽ आयुः प् प्रमोंषीः ॥ मासं. १८।४९॥

(गणेशपूजनमन्त्रा)

गणानांन् त्वा गणपंतिꣳ हवामहेप् प्रियाणांन् त्वाप् प्रियपंतिꣳ हवामहे निधीनान् त्वां निधिपतिꣳ हवामहे बसो मम । आहमंजानि गर्ब्भधमात् त्वमंजासि गर्ब्भधम् ॥ मासं. २३।१९॥

हे हेरम्ब त्वमेह्य्येहि अम्बिकात्त्र्यम्बकात्मज ।
सिद्धिबुद्धिपतेत् त्र्यक्क्ष लक्क्षलाभयुत शिव ॥
नागास्स्य नागहार त्वङ् गणराज चतुर्भुज ।
भूषितैस् स्वायुधैर् दिव्व्यै पाशाङ्कुशपरश्श्वधै ॥
आवाहयामि पूजार्थं रक्क्षार्थञ् च मम क्क्रतो ।
इहाऽऽगत्त्य गृहाण त्त्वम् पूजाङ् क्क्रतुञ् च रक्क्ष मे ॥

भूर्ब् भुव स्व गणपतये सिद्धिबुद्धिसहिताय सायुधाय सवाहनाय सपरिवाराय नम, एतदासनम् , पाद्द्यम् , अर्घ्यम् , स्नानीयम् , आचमनीयम् , पुनराचमनीयम् , वस्त्रम् , यज्ञोपवीतम् , अलङ्कारम् , अनुलेपनम् , (अक्क्षतान्), पुष्पाणि, दूर्वाङ्कुरान् , धूपम् , दीपम् , नैवेद्द्यम् , (दक्क्षिणाद्रव्व्यम्) च समर्पये ।

रक्क्षरक्क्ष गणाद्ध्यक्क्ष रक्क्ष त्रैलोक्क्यरक्क्षक ।
भक्क्तानामभयङ् कर्ता त्राता भव भवार्णवात् ॥
द्वैमातुर कृपासिन्धो षाण्मातुराग्ग्रज प्प्रभो ।
वरदस् त्ववँ वरन् देहि वाञ्छितवँ वाञ्छितार्थद ॥
अनेन फलदानेन फलदो भव मे सदा ॥

(रक्क्षाबन्धनाभिमन्त्रणपूजनमन्त्रा)

पूर्वे रक्क्षतु गोविन्द आग्नेय्यान् धरणीधर ।
याम्म्यां रक्क्षतु वाराहो नारसिंहस् तु नैर्ऋते ॥
वारुण्ण्याङ् केशवो रक्क्षेद् वायव्व्याम् मधुसूदन ॥
उत्तरे श्रीधरो रक्क्षेदैशान्न्यान् तु गदाधर ॥
ऊर्ध्वङ् गोवर्धनो रक्क्षेदधस्तात् तु महीश्श्वर ।
एवन् दश दिशो रक्क्षेद् वासुदेवो जनार्दन ॥
यज्ञाग्ग्रं रक्क्षताच् छङ्ख पृष्ठे वै पद्ममुत्तमम् ।
वामपार्श्वे गदा रक्क्षेद् दक्क्षिणे च सुदर्शन ॥
उपेन्द्र पातु ब्रह्म्माणमाचार्यम् पातु वामन ॥
ऋग्वेदमच्च्युतो रक्क्षेद् यजुर्वेदमथोत्तम ॥
कृष्णो रक्क्षतु सामानमथर्वाणञ् च माधव ।
उपविष्टाँश् च विप्प्राँस् ताननिरुद्धोऽभिरक्क्षतु ॥

यजमानं सपत्नीकम् पुण्डरीकाक्ष एव तु ।
रक्षाहीनग् च यत् स्थानन् तत् सर्वं रक्षताद् धरिः ॥

रक्क्षोहणवँ वलगहनवँ वैष्ण्णवीमिदमहन् तवँ वलगमुत्त् किरामि यम् मे निष्ट्ट्यो यम्मात्त्यो निचखानेदमहन् तवँ वलगमुत्त् किरामि यम् मे समानो यमसमानो निचखानेदमहन् तवँ वलगमुत्त् किरामि यम् मे सबन्धुर्स् यमसबन्धुरन् निचखानेदमहन् तवँ वलगमुत्त् किरामि यम् मे सजातो यमसजातो निचखानोत्त् कृत्त्याङ् किरामि॥ मासं ५।२३॥

स्वराडसि सपत्तँनहा सत्रराडस्स्यभिमातिहा जनराडसि रक्क्षोहा सर्ब्बराडस्स्यमित्त्रहा ॥ मासं ५।२४॥

रक्क्षोहणौ वो बलगहनद्ग् प्रोक्क्षामि बैष्ण्णवान् रक्क्षोहणौ वो बलगहनोऽवनयामि बैष्ण्णवान् रक्क्षोहणौ वो बलगहनोऽवस्तृणामि बैष्ण्णवान् रक्क्षोहणौ वावँ वलगहनाऽउपदधामि बैष्ण्णवी रक्क्षोहणौ वावँ वलगहनौ पर्य्यूहामि बैष्ण्णवी बैष्ण्णवमसि बैष्ण्णवासत् थ ॥ मासं ५।२५॥

सप्प्तऽऋषयद्ग् प्रतिहिताद् शरीरे सप्प्त रक्क्षन्ति सदमप्प्रमादम् ।
सप्प्तापद् स्वपतो लोकमीयुस्त् तत्र जागृतोऽअस्स्वप्प्नजौ सत्रसदौ च देवौ ॥
मासं ३४।५५॥

(कलशे पञ्चायतनदेवतादीनाम् पूजने मन्त्रा)

पञ्चायतनदेवताब्भ्यो गणपति-देवी-विष्णु-सूर्य-सदाशिवेब्भ्यो नमः ६ ।
पञ्चलोकपालेब्भ्यो विनायकदुर्गावाय्य्वाकाशाश्विनीकुमारेब्भ्यो नमः ।
नवग्ग्रहेब्भ्यस् सूर्यसोमभौमबुधबृहस्पतिशुक्क्रशनिराहुकेतुब्भ्यो नमः ।
नवग्ग्रहाधिदेवताब्भ्य ईश्श्वरोमास्कन्दहरिब्ब्रह्म्मेन्द्रयमकालचित्त्रगुप्तेब्भ्यो नमः ।
नवग्ग्रहप्रत्त्यधिदेवताब्भ्यः अग्न्यब्भूमिविष्णिवन्द्रेन्द्राणीप्रजापतिसर्पब्रह्म्मब्भ्यो नमः ।
दशदिक्पालेब्भ्य आदित्त्याग्गिनयमनिर्ऋतिवरुणवायुसोमेशानाग्न्यनन्तेब्भ्यो नमः ।
अष्टवसुब्भ्य अग्गिनपृथिवीवाय्य्वन्तरिक्षादित्त्यद्युचन्द्रमोनक्षत्त्रेब्भ्यो ध्रुवाद्ध्वरसोमाबनिलानलप्रत्त्यूषप्रभासापराक्ख्येब्भ्यो नमः ।
द्वादशादित्त्येब्भ्यो धात्त्रर्यममित्त्रवरुणभगेन्द्रविवस्स्वत्पूषपर्जन्न्यांशुत्वष्टृविष्णुब्भ्यो नमः।
एकादशरुद्द्रेब्भ्यो वीरभद्द्रशम्भुगिरीशाजैकपादहिर्बुध्न्यपिनाकिभुवनाधीश्वरकपालिविशाम्पतिस्थाणुभवेब्भ्यो नमः ।
गणाधिपाय नमः ।
षोडशमातृब्भ्यो गणाधिपानुगाब्भ्यो गौरी-पद्मा-शची-मेधा-सावित्त्री-विजया-जया-देवसेना-स्वधा-स्वाहा-मातृ-लोकमातृ-हृष्टि-पुष्टि-तुष्टि-कुलदेवताब्भ्यो नमः ।
सप्तमरुद्गणेब्भ्य आवहप्रवहोद्वहसवँवहविवहपरावहपरिवहेब्भ्यो नमः ।
ब्रह्म्मविष्णुरुद्द्रार्कवनस्पतिब्भ्यो नमः ।

(वरुण-पञ्चायतन-देवतादि-प्रार्थना-मन्त्रा)

अपामधिपतिर् देवो वरुणः पशहस्तकः ।
मुञ्चेन् मावँ वारुणात् पाशात् कलशेऽत्त्र प्प्रपूजितः ॥

---

६ एतादृशस्थले स्वपूज्यपञ्चायतनदेवताक्क्रमानुसारन् देवतानामानि निवेश्श्यानि ।

देवो विघ्नविनायको भगवती देवी त्रिलोक्ययम्बिका
विष्णुश्चाखिललोकपालनपरो ब्रह्म्माण्डदीपो रवि ।
त्रैलोक्ययस्स्य पिता सदाशिव इम्रा पञ्चायना देवता
विघ्नेशादिकलोकपालसहिता कुर्वन्तु मे मङ्गलम् ॥
सूर्य शौर्यमथेन्दुरिन्द्रपदवीं सन्मङ्गलम् मङ्गल
सद्बुद्धिन् च बुधो गुरुश्च गुरुतां शुक्क्रस् सुखं शं शनि ।
राहुर्बाहुबलङ् करोतु सततङ् केतु कुलस्स्योन्नतिन्
नित्स्यम् प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहा ॥
ईशाद्द्या अधिदेवतास् तदनुगा अग्न्यादयो देवता
दिक्पाला दश चाऽष्टकाश् च वसवो ह्यादित्यका द्वादश ।
रुद्र्रा षोडशमातृकाश् च मरुतो ब्रह्म्मा च विष्णुस् तथा
रुद्द्रश्चार्कयुतो वनस्पतिरिमे स्युस् सिद्धिदा मे सदा ॥
ब्रह्म्मा मुरारिस् त्रिपुरान्तकारी भानुश् शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्क्रश् शनिराहुकेतवस् सर्वे सदा शान्तिकरा भवन्तु ॥

(ग्रहपूजामन्त्रा ७)

आ कृष्णणेन् रजसा बरत्तमानो निवेशयन्ननमृतम् मरत्त्यंग् च ।
हिरण्ण्ययेन सविता रथेना देवो याति भुवनानि पश्श्यन् ॥ मासं. ३३।४३ ३४।३१
इमन् देवाऽ असपत्तून्ँ सुवद्ध्वम् महतेक् क्षत्राय महतेज् ज्यैष्ट्ठ्याय महते
जानराज्ज्यायेन्द्रस्स्येन्द्रियाय । इममुमुष्य्यपुत्त्रममुष्य्यैपुत्त्रमस्स्यै बिशऽ एष वोऽमी
राजा सोमोऽस्म्माकम् ब्राह्म्मणानाँ राजा ॥ मासं. ९।४०.१०।१८॥
अग्ग्निर्म् मूर्द्धा दिव ः ककुत्त् पतिः पृथिब्ब्याऽ अयम् ।
अपाँ रेताँसि जिन्वति ॥ मासं. ३।१२.१३।१४.१५।२०॥
उद्द् बुद्ध्यस्स्वाग्ग्नेप् प्रतिजागृहित् त्वमिष्ट्टापूर्त्ते सँसृजेथामयन् च ।
अस्म्मिन् त्सधस्त्थेऽ अद्ध्युत्तरस्म्मिन् न्विश्श्वेदेवा यजमानश्च् च सीदत ॥
मासं. १५।५४.१८।६१ ॥
बृहस्प्पतेऽ अतियदर्य्योऽ अर्हाद् द्युमद् द्विभातिक् क्रतुमज् जनेषु ।
यद् दीदयच् छवसऽ ऋतप्प्रजात तदस्म्मासु द्रविणन् धेहि चित्त्रम् ॥ मासं. २६।३॥

---

७. याज्ञवल्क्यस्मृतौ (१।३०१) विश्वरूपेण विज्ञानेश्वरेण च सम्यक्स्पष्टीकरणस्याकृतत्वात् , शुक्लयजुर्वेदशाखाद्ध्यायिकृतास्वपि पद्धतिषु मन्त्रसङ्ग्रहादिषु च कयानश्चित्रेत्त्यादिकस्यैव राहुमन्त्रस्स्य दृश्श्यमानत्त्वाच् च कयानश्च् चित्र इत्त्यादिक एव राहुमन्त्र इति नैपालीयाग्नि-स्थापनापद्धतिकार-सङ्कल्परत्नावलीकार-शत्त्रुघ्नमिश्र-रामकृष्णभट्ट-नित्त्यानन्दपर्वतीयादयश्च बहवो मन्यन्ते, किन्तु स्वशाखाविधिविशेषाभावे शुक्लयजुर्वेदशाखाद्ध्यायिनाम् याज्ञवल्क्यस्मृत्त्युक्त-पक्षस्स्यैव परिग्रहीतुमुचितत्त्वात् ,याज्ञवल्क्यस्मृतौ च राहुमन्त्रस्स्य "काण्डात्" इत्त्युल्लिखितत्त्वात् (१।३०१), विष्णुधर्मोत्तरे (१।१०२।१०) बृहन्नारदीये (१।५१।८५) च एतस्स्य राहुमन्त्रस्स्य विहितत्त्वात् , वैष्णवबृहत्पराशरस्मृतावपि (११।५८-६७) एतस्स्य मन्त्रस्स्योल्लिखितत्त्वात् , दानसागरे च (पृ. ८७) "राहोर् ऋग्वेदे कयानश्चित्र इति, यजुर्वेदे काण्डात्-काण्डादिति, सामवेदे कयानश्चित्र इति, अथर्ववेदे राहूराजानमिति" इति मन्त्रव्यवस्थाया प्रदर्शितत्त्वाच् च यजुर्वेदिभिर् विशेषतश्च शुक्ल-यजुर्वेदिभिः काण्डात्त्काण्डादित्त्यादिक एव राहुमन्त्र उपयोक्तव्यो विज्ञायते ॥

अन्नात्त् परिस्स्रुतो रसम् ब्रह्मम्मणाव् व्यपिबत्त् क्षत्त्रम् पय ऽ सोमम् प्रजापतिः।
ऋतेन सत्त्यमिन्द्रियवँ विपानँ शुक्क्रमन्धस ऽ इन्द्रस्स्येन्द्रियमिदम् पयोऽमृतम् मधु
॥ मासं. १९७५॥

शन् नो देवीरभिष्ट्टय ऽ आपो भवन्तु पीतये ।
शय्योरभिस्स्रवन्तु नः ॥ मासं. ३६।१२॥
काण्डात्त्काण्डात्त् प्ररोहन्ती परुषः परुषस्प् परि ।
एवा नो दूर्व्वेप् प्रतनु सहस्स्रेण शतेन च ॥ मासं. १३।२०॥
केतुङ् कृण्ण्वन्नकेतवे पेशो मर्य्या ऽ अपेशसे ।
समुषद्द्भिरजायथाः ॥ मासं. २९।३७॥

(अभिषेकमन्त्राः)

देवस्स्यत् त्वा सवितुः प्प् प्रसवेऽश्श्विनोर्व् बाहुब्भ्याम् पूष्ण्णो हस्त्ताब्भ्याम् ।
अश्श्विनोर्व् भैषज्ज्येन तेजसेव् ब्रह्मवर्च्चसायाऽभिषिञ्चामि सरस्स्वत्त्यै भैषज्ज्येन
बीर्य्यायाऽन्नाद्द्यायाऽभिषिञ्चामीन्द्रस्स्येन्द्रियेण बलायश् श्रियै यशसेऽभिषिञ्चामि ॥
मासं. २०।३॥

बिश्श्वानि देव सवितर्द् दुरितानि परासुव ।
यद्द् भद्द्रन् तन् नऽ आसुव ॥ मासं. ३०।३॥
द्यौः शान्तिरन्तरिक्क्षँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः।
बनस्प्पतयः शान्तिर्व् बिश्श्वेदेवाः शान्तिर्व् ब्रह्मम् शान्तिः सर्व्वँ शान्तिः
शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ मासं. ३६।१७॥

(पौराणा अभिषेकमन्त्रा मात्स्ये, भविष्ये च)

सुरास् त्वामभिषिञ्चन्तु ब्रह्ममविष्णुमहेश्श्वरा ।
वासुदेवो जगन्नाथस् तथा सङ्कर्षणो विभु ॥
प्रद्युम्नश्चाऽनिरुद्धश्च भवन्तु विजयाय च ।
आखण्डलोऽग्निर् भगवान् यमो वै निर्ऋतिस् तथा ॥
वरुण पवनश्चैव धनाद्ध्यक्षश् तथा शिव ।
ब्रह्ममणा सहित शेषो दिक्पाला पान्तु ते सदा ॥
कीर्तिर् लक्ष्मीर् धृतिर् मेधा पुष्टिश् श्रद्धा क्रिया मति ।
बुद्धिर् लज्जा वपु शान्तिस् तुष्टि कान्तिश्च मातर ॥
एतास्त्वामभिषिञ्चन्तु देवपत्न्य समागता ।
आदित्त्यश्चन्द्रमा भौमो बुधो जीवसितार्कजा ॥
ग्रहास्त्वामभिषिञ्चन्तु राहु केतुश्च तर्पिता ।
देवदानवगन्धर्वा यक्षराक्षसपन्नगा ॥
ऋषयो मनवो गावो देवमातर एव च ।
देवपत्न्यो द्रुमा नागा दैत्त्याश्चाप्सरसो गणा ॥
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ।
औषधानि च रत्नानि कालस्याऽवयवाश् च ये ॥
सरित सागराश् शैलास् तीर्थानि जलदा नदा ।
एते त्त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥

(आशीर्वादमन्त्रा)

आब् ब्रह्म्मंन्न् ब्राह्म्मुणोब् ब्रंह्म्मवर्च्चुसी जायतामाराष्ट्ट्रे राजन्न्यु÷ शूरंऽ इषव्व्योऽति ब्व्याधी महारुथो जायतान् दोग्ध्रीं धेनुर्ब् बोढांऽनड्ड्वानाशु ? सप्प्तिं पुरंन्धिर्र्ख् योषां जिष्ण्णू रंथेष्ट्ठा ? सभेयो युवाऽस्स्य यजमानस्स्य बीरो जायतान् निकामेनिंकामे न पर्ज्जन्न्यों बर्षतु फलवत्त्यो नऽ ओषंधय पच्च्यन्तायँ योगक्क्षेमो नं÷ कल्प्पताम् ॥ मासं. २२।२२॥

कामंङ् कामदुघे धुक्क्ष्व मित्त्राय् बरुणाय च ।

इन्द्रायाऽश्श्विब्भ्यांम् पूष्ण्णेप् प्रजाब्भ्यऽ ओषंधीब्भ्य ॥ मासं. १२।७२॥

पुनंस्त् त्वाऽऽदित्त्या रुद्द्रा बसंव समिंन्धताम् पुनर्ब् ब्रह्म्माणो बसुनीथ यज्ज्ञैं ?। घृतेनत् त्वन् तन्न्वव्वँ वर्द्धयस्स्व सत्त्या ? सन्तु यजमानस्स्यु कामां ॥ १२।४४॥

मन्त्रार्था सफलास् सन्तु पूर्णास् सन्तु मनोरथा ।

शत्त्रूणाम् बुद्धिनाशोऽस्तु मित्त्राणामुदयस् तव ॥

(रक्षाबन्धनमन्त्र)

त्वयँ यंविष्ट्ठ दाशुषो नॄं ? पाहि शृणुधी गिरं÷।

रक्क्षां तोकमुतत्त् मनां ॥ मासं. १३।५२. १८।७७॥

येन बद्धो बली राजा दानवेन्द्रो महाबल ।

तेन त्वामभिबद्ध्नामि रक्षे मा चल मा चल ॥ भविष्योत्तरे ॥

(तिलकमन्त्र)

त्र्यायुषञ् जमदंग्गँने कश्श्यपंस्स्यत् त्र्यायुषम् ।

यद् देवेषुंत् त्र्यायुषन् तन् नोंऽ अस्ततुत् त्र्यायुषम् ॥ मासं. ३।६२॥

(पित्र्यंकर्मणि आशीर्वादमन्त्रा आचारपरम्परागता)

शतमिन् नु शरदोऽ अन्तिं देवा यत्रां नश्च् चक्क्रा जरसंन् तनूनांम् ।
पुत्त्रासो यत्रं पितरो भवंन्न्ति मा नों मद्ध्या रींरिषताऽऽयुर्ग् गन्तों ॥ मासं. २५।२२॥
ब्राह्म्मणास पितंर सोम्म्यास शिवे नोद् द्यावांपृथिवीऽ अनेहसां ।
पूषा नं÷ पातु दुरितादृंतावृधो रक्क्षा मार्किर्न् नोऽ अघशंसऽ ईशत ॥ मासं. १९।४७॥

पुनन्तुं मा पितरं÷ सोम्म्यासं÷ पुनन्तु मा पितामहा ?

पुनन्तुप् प्रपितामहा पवित्त्रेण शतायुषा ॥

पुनन्तुं मा पितामहा ? पुनन्तुप् प्रपितामहा ।

पवित्त्रेंण शतायुंषा बिश्श्वमायुर्ब् ब्यश्नवै ॥ मासं. १९।३७॥

(पुराणकथाप्रवचनारम्भे धर्मादिनमस्कारे पुष्पाञ्जल्यर्पणे च मन्त्रा)

नमो धर्माय महते वेदाय च स्वयम्भुवे ।

ऋषिब्भ्यश्च ब्राह्म्मणेब्भ्यो वेदविद्भ्यो नमोनम ॥

नमो गोब्भ्यश् श्रीमतीब्भ्यस् सौरभेयीब्भ्य एव च ।

नमो ब्रह्म्मसुताब्भ्यश्च पवित्ताब्भ्यो नमोनम ॥

नमस्स्ये देवमग्निन् तं साक्क्षिणवँ विश्श्वतोमुखम् ।

आत्मानन् दीप्तवपुषं सर्वभूतहृदि स्थितम् ॥

अविरलमदजलनिवहम् भ्रमरकुलाऽनीकसेवितकपोलम् ।

अभिमतफलदातारङ् कामेशङ् गणपतिवँ वन्दे ॥

विघ्नद्ध्वान्तनिवारणैकतरणिर् विघ्नाटवीहव्व्यवाड्
विघ्नव्व्यालकुलाभिमर्दिगरुडो विघ्नेभपञ्चानन ।
विघ्नोत्तुङ्गगिरिप्प्रभञ्जनपविर् विघ्नाब्धिकुम्भोद्भवो
विघ्नाघौघघनप्प्रचण्डपवनो विघ्नेश्श्वर पातु माम् ॥
या कुन्देन्दुतुषारहारधवला या शुभ्भ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्म्माच्युतशङ्करप्प्रभृतिभिर् देवै सदा वन्दिता
सा माम् पातु सरस्स्वती भगवती निश्शेषजाड्ड्यापहा ॥
मूर्तित्त्वे परिकल्पितश् शशभृतो वर्त्मा पुनर्जन्मना-
मात्त्मेत्त्यात्मविदाङ् क्रतुश् च यजताम् भर्ताऽमरज्ज्योतिषाम् ।
लोकानाम् प्रलयोद्भवस्थितिकरश् चाऽनेकधा यश् श्रुतो
वाचन् नस् स ददात्त्वनेककिरणस् त्रैलोक्क्यदीपो रवि ॥
यल्ँ लोकस्स्य पितामहं हि ऋषयस् संसेव्व्य पर्यासते
गायत्त्र्या सह यम् मुदा परमया सावित्त्रिका सेवते ।
वेदा भान्ति च यम् प्रतीह प्रहितास् साक्षात् परब्ब्रह्म्मणा
तव्ँ वन्दे श्रुतियज्ञलब्भ्यविभवं सर्गादृतम् पद्मजम् ॥
यम् ब्रह्म्मा वरुणेन्द्ररुद्द्रमरुतस् स्तुन्वन्ति दिव्व्यैस् स्तवैर्
वेदैस् साङ्गपदक्क्रमोपनिषदैर् गायन्ति यं सामगा ।
ध्यानावस्थिततद्गतेन मनसा पश्श्यन्ति यय्ँ योगिनो
यस्स्याऽन्तन् न विदुस् सुराऽसुरगणास् तस्मै नमो विष्णवे ॥
कण्ठे यस्स्य विराजते हि गरलं शीर्षे च मन्दाकिनी
वामाङ्के गिरिजाऽऽननङ् कटितटे शार्दूलचर्माम्बरम् ।
माया यस्स्य रुणद्धि विश्श्वमखिलम् पायात् स नश् शङ्करो
जम्बूवज् जलबिन्दुवज् जलजवज् जम्बालवज् जालवत् ॥
जन्माद्यस्स्य यतोऽन्वयादितरतश् चार्थेष्व्वभिज्ञस् स्वराट्
तेने ब्रह्म्म हृदा य आदिकवये मुह्य्यन्ति यत् सूरय ।
तेजोवारिमृदायँ यथा विनिमयो यत्त्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्त्यम् परन् धीमहि ॥
धर्मश् शर्म परत्त्र चेह च नृणान् धर्मोऽन्धकारे रविस्
सर्वापत्प्रशमक्षमस् सुमनसान् धर्माऽभिधानो निधि ।
धर्मो बन्धुरबान्धवे पृथुपथे धर्मस् सुहृन् निश्चलस्
संसारोरुमरुस्थले सुरतरुर् नास्त्येव धर्मात् पर ॥
मूकङ् करोति वाचालम् पङ्गुल्ँ लङ्घयते गिरिम् ।
यत्कृपा तमहव्ँ वन्दे परमानन्दमाधवम् ॥
गुरुर् ब्रह्म्मा गुरुर् विष्णुर् गुरुर् देवो महेश्श्वर ।
गुरुरेव परम् ब्रह्म्म तस्मै श्रीगुरवे नम ॥
सुमीमांसितवेदार्थन् न्यायनिर्णीतधर्मकम् ।
वेदशास्त्रैकशरणव्ँ वन्दे तञ् जैमिनिम् मुनिम् ॥

श्रद्धाऽऽधिक्क्याद् विपर्यस्त-रामनाम-जपादपि ।
सिद्धिम् प्राप्तञ् चाऽऽदिकविवँ वाल्मीकिम् प्रणमामि तम् ॥
यम् प्रव्रजन्तमनुपेतमुपेतकृत्यन् द्वैपायनो विरहकातर आजुहाव ।
पुत्रेति तन्मयतया तरवोऽभिनेदुस् तं सर्वभूतहृदयम् मुनिमानतोऽस्मि ॥
नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्त्रनेत्र ॥
येन त्त्वया भारत-तैल-पूर्ण प्रज्ज्वालितो ज्ञानमय प्रदीप ॥
जयति पराशरसूनुस् सत्त्यवतीहृदयनन्दनो व्यास ।
यस्स्याऽऽस्स्यगलितवँ वाङ्मयममृतञ् जगत् पिबति ॥
नारायणन् नमस्कृत्त्य नरञ् चैव नरोत्तमम् ।
देवीं सरस्स्वतीवँ व्यासन् ततो जयमुदीरयेत् ॥
ओ३म् । तत् सत् । परमात्मने नम ॥

(पौराणकथाप्रवचनप्रारम्भे पुष्पाञ्जल्यर्पणे मन्त्रा)
उपनयतु मङ्गलवँ वस् सकलजगन्मङ्गलालयश् श्रीमान् ।
दिनकरकिरणनिबोधितनवनलिनदलनिभेक्षण कृष्ण ॥
काले वर्षतु पर्जन्न्य पृथिवी सस्स्यशालिनी ।
देशोऽयङ् क्षोभरहित प्राणिनस् सन्तु निर्भया ॥
ब्राह्म्मणा वैदिका ब्रह्म्मवर्चसेन युता बुधा ।
क्षत्त्रियाश्च सुविक्क्रान्ता धर्मस्था नयपालका ॥
न्यायार्जितधना वैश्श्या उद्द्युक्ता लोकपोपका ।
शिल्पिन कर्मठा उण्णाश् शूद्द्रा द्विजसहायका ॥
क्षीरिण्ण्यो धेनवो भद्द्रा वोढारस् सप्तयश् चला ।
योषा पुरन्ध्र्यस् सब्भ्या नो युवानो विनयान्न्विता ॥
ज्ञान-विज्ज्ञान-वृद्धाश्च महात्मान क्रियायुता ।
योगक्षेमयुतास् सर्वे सन्तु राष्ट्रे सदा हि न ॥
अपुत्त्रा पुत्त्रिणस् सन्तु पुत्त्रिणस् सन्तु पौत्त्रिण ।
अधनास् सधनास् सन्तु जीवन्तु शरदां शतम् ॥
सर्वे भवन्तु सुखिनस् सर्वे सन्तु निरामया ।
सर्वे भद्द्राणि पश्श्यन्तु मा कश्चिद् दुखभाग् जन ॥
तत्त्रैव गङ्गा यमुना च तत्त्र गोदावरी सिन्धुसरस्स्वती च ।
सर्वाणि तीर्थानि वसन्ति तत्त्र यत्त्राऽच्च्युतोदारकथाप्रसङ्ग ॥
कायेन वाचा मनसेन्द्रियैर् वा बुद्ध्याऽऽत्मना वाऽनुसृतस्स्वभावात् ।
करोमि यद्यत् सकलम् परस्मै नारायणायेति समर्पये तत् ॥
ओ३म् । तत् सत् । परमात्मने नम ॥

(पुराणकथाप्रवचनान्ते निर्गल्ल्याक्षतपुष्पप्रदाने मन्त्र)
अतसीकुसुमोपमेयकान्तिर् यमुनाकूलकदम्बमूलवर्ती ।
नवगोपवधूविलासशाली वनमाली वितनोतु मङ्गलवँ व ॥
॥ इति शान्तिक-पौष्टिकाऽऽदि-कृत्त्य-प्रकरणम् ॥

अथ वार्षिक-कृत्यविशेष-मन्त्राः

(माघस्नानमन्त्रः)

दुखदारिद्र्यनाशाय श्रीविष्णोस् तोषणाय च ।
प्रातस् स्नानङ् करोम्म्यद्द्य माघे पापविनाशनम् ॥
मकरस्थे रवौ माघे गोविन्दाऽच्च्युत माधव ।
स्नानेनाऽनेन मे देव यथोक्तफलदो भव ॥

(वसन्तपञ्चम्म्यां रतिकामरूपेण मा-माधव-पूजने माधवस्तुतिः)

वसन्तकुसुमाऽऽमोद-सुरभीकृत-दिङ्मुखे ।
गोवर्धनगिरौ रम्म्ये स्थितं रासरसोन्मुखम् ॥
नवीननीरदश्यामन् नीलेन्दीवरलोचनम् ।
वल्लवीनन्दनवँ वन्दे माधवङ् गोपरूपिणम् ॥

(श्रीपञ्चम्म्यालँ लक्ष्मीपूजने प्रार्थना भविष्योत्तरे)

क्षीराब्धिमथनोद्भूते विष्णोर्वक्षस्स्थलालये ।
सर्वकामप्प्रदे देवि ऋद्धियँ यच्छ नमोऽस्तु ते ॥

(श्रीपञ्चम्म्याङ् गायत्रीरूपायास् सरस्वत्त्याः पूजने प्रार्थना)

लक्ष्मीर् गौरी धृतिः पुष्टिस् तुष्टिर् मेधा प्रभा धरा ।
एताभिः पाहि तनुभिरष्टाभिर् मां सरस्वति ॥ द्र.भविष्योत्तरे ३५।७।

(पौर्णमास्याम् ब्रह्मणः पूजने ब्रह्मस्तुतिः)

नमः प्रणवरूपाय विश्श्वकर्त्रे नमो नमः ।
तथा विश्श्वस्स्य रक्षित्त्रे नमोऽस्तु परमात्मने ॥
तथा तस्स्यैव संहर्त्रे नमो ब्रह्मस्वरूपिणे ।
पितामह नमस् तुब्भ्यम् पद्मयोने नमोऽस्तु ते ॥

(शिवरात्रीव्रतपारणे मन्त्रः)

संसारक्क्लेशदग्धस्स्य व्रतेनाऽनेन शङ्कर ।
प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्प्रदो भव ॥

(फाल्गुनपूर्णिमायां सहोलिकाऽग्निप्रदक्षिणायाम् मन्त्रः)

नित्त्यम् प्रदक्षिणाम् मेरोः करोति सविता यथा।
तथा कृता मया वह्ने सहोलिक नमोऽस्तु ते ॥

(चैत्रशुक्लप्रतिपदि निम्बपत्त्रपिष्टिपाने मन्त्रः)

सचन्दनानि पत्त्राणि निम्बस्स्य प्प्रपिबाम्म्यहम् ।
सर्वँवत्सरम् ममाऽऽरोग्ग्यम् भूयान् निम्बस्स्य भक्षणात् ॥

(रामनवम्म्यां रामनमस्कारमन्त्रः)

सर्वलोकशरण्ण्याय रामचन्द्राय वेधसे ।
ब्रह्मानन्दैकरूपाय सीतायाः पतये नमः ॥

(मेषविषुवदोषशान्त्यर्थन् तण्डुलदानेवाक्क्यम्)

ओ३म् । तत् सत् । स्वस्ति । मम स्वजन्मनक्षत्त्रस्स्य विषुवत्पुरुषवामपादपातेन जनितस्स्याऽरिष्टस्स्य निवृत्तये एताँस् तण्डुलान् प्रजापतिदैवतान् अमुकशर्मणे अमुक-गोत्त्राय सुपूजिताय ब्राह्मणायाऽहं सम्प्रददे, तत् सन् न मम ॥

अन्नेन जायते विश्श्वम् प्राणिनाम् प्राणरक्षणम् ।
तण्डुला वैश्श्वदेवत्त्या पाकेनाऽन्नम् भवन्ति ये ॥
पावनास् सर्वयज्ञेषु प्रशस्ता यज्ञकर्मणि ।
तस्मात् तण्डुलदानेन प्रीयन्तावँ विश्श्वदेवता ॥

ओ३म् । इहाऽद्य कृतस्स्यैतस्स्य तण्डुलदानस्स्य प्रभावस्स्य सम्पत्तये इमान् दक्षिणान् नाणकद्रव्व्यवँ विष्णुदैवतम् अमुकशर्म्मणे अमुकगोत्त्राय ब्राह्म्मणाय तुब्भ्यमहं सम्प्रददे, तत् सन् न मम ।

(वैशाखस्नानमन्त्र)

वैशाखं सकलम् मासम् मेषसङ्क्रमणे रवे ।
प्रातः सनियमं स्नास्स्ये प्रीयताम् मधुसूदन ॥

(वैशाखस्नानोत्तरम् मधुसूदनायाऽर्घस्स्य दाने मन्त्र)

वैशाखे मेषमार्तण्डे स्नातो(ता)ऽहवँ विमले जले ।
एष ह्यर्घो मया दत्तो गृहाण मधुसूदन ॥

(वैशाखशुक्लतृतीयायाम् (अक्षयतृतीयायाम्) धर्मघटदाने मन्त्र)

एष धर्मघटो दत्तो ब्रह्म्मविष्णुहरात्मकः ।
अस्स्य प्प्रदानात् तृप्प्यन्तु पितरोऽपि पितामहा ॥
गन्धोदकतिलैर् मिश्श्रं सान्नङ् कुम्भम् फलान्न्वितम् ।
पितृब्भ्यस् सम्प्रदास्स्यामि अक्षय्यमुपतिष्ठतु ॥

(दशहरायाम् पञ्चसहस्स्रसङ्ख्यया जपनीयो मन्त्र)

ओ३म् । नमः शिवायै नारायण्ण्यै दशहरायै गङ्गायै नमोनमः ॥

(हरिशयन्न्यामेकादश्श्याम् अच्च्युतप्रार्थनामन्त्र)

त्वयि सुप्ते जगन्नाथ जगत् सुप्तम् भवेदिदम् ।
विबुद्धे त्वयि बुद्ध्येत प्रसन्नो मे भवाऽच्च्युत ॥

(तुलसीप्रार्थनामन्त्र)

प्रसीद मम देवेशि कृपया परया सदा ।
अभीष्टफलसिद्धिञ् च कुरु मे माधवप्प्रिये ॥

(कर्कटसङ्क्रान्तौ उल्मुकप्प्रक्षेपणे मन्त्र)

कण्डारक रात्त्रिचर लूतादिभयनाशन ।
उल्कामिमाम् प्रक्षिपामि माऽस्तु लूताभयम् मम ॥

(नागपञ्चम्म्याङ् गृहोदरे लेक्ख्या मन्त्रा)

अगस्त्यश्च पुलस्त्यश्च वैशम्पायन एव च ।
जैमिनिश्च सुमन्तुश्च पञ्चैते वज्ज्रवारकाः ॥
मुनेः कल्ल्याणमित्त्रस्स्य जैमिनेश्चाऽनुकीर्तनात् ।
विद्द्युदग्निभयन् नास्ति लिखिते च गृहोदरे ॥
यत्त्राऽनपायी भगवान् यत्त्राऽऽस्ते हरिरीश्श्वरः ।
भङ्गो भवति वज्ज्रस्स्य तत्त्र शूलस्स्य का कथा ॥
अनन्तो वासुकिः पद्मो महापद्मश् च तक्षकः ।
कुलीरः कर्कटश् शङ्खश् चाऽष्टौ नागाः प्रकीर्तिताः ॥

सर्पाऽपसर्प भद्द्रन् ते गच्छ सर्प महाविष ।
जनमेजयस्स्य यज्ञान्ते आस्तीकवचनं स्मर ॥
आस्तीकस्स्य वचः श्रुत्त्वा यः सर्पो न निवर्तते ।
शतधा भिद्यते मूर्द्ध्नि शिंशवृक्षफलयँ यथा ॥

(यज्ञोपवीतरचना-प्रतिष्ठापनादि-मन्त्राः
शिष्टसङ्गृहीत-कातीय-यज्ञोपवीतपरिशिष्टसूत्र-सर्वशाखासाधारण-भारद्वाजस्मृतिवचनायुक्ताः)

(सिद्धे मन्त्राः प्रयोक्तव्याः इति न्यायेनाऽपि प्रयोज्ज्या मन्त्राः)

ओ३म् । कार्पासबीजमभिमन्त्रयामि ।
ओ३म् । कार्पासबीजं रोपयामि ।
ओ३म् । कार्पासवृक्षम् प्रसेचयामि ।

(प्राणायामपूर्वकङ् गणेश्श्वरादिप्प्रणामे मन्त्रः)

गणेश्श्वरम् , सरस्स्वतीम् , स्वगुरुम् , देवान् , ऋषीन् , पितॄन् , ब्रह्म्माणम् ,
विष्णुम् , महेश्श्वरञ् च प्प्रणमामि ।

(यथासम्भवं सुमङ्गल्या, कन्न्यया, ब्राह्म्मणेन वा कर्तितं सूत्रमादाय षण्णवतिकृत्त्वो माने मन्त्राः)

भूः, चतुरङ्गुलेष् षण्णवतिकृत्त्वो मिनोमि ।
भुवः, द्वितीयवारञ् चतुरङ्गुलेष् षण्णवतिकृत्त्वो मिनोमि ।
स्वः, तृतीयवारञ् चतुरङ्गुलेष् षण्णवतिकृत्त्वो मिनोमि ।

(मितं सूत्रम् पलाशपत्त्रे संस्थाप्प्य तस्स्याभिषेचने मन्त्राः)

आपो हिष्ट्ठा मयोभुवस्त् ता नऽ उर्ज्जे दधातन ।
महे रणाय चक्क्षसे ॥
यो वः शिवतमो रसस्त् तस्स्य भाजयतेह नः ।
उशतीरिव मातरः ॥
तस्म्माऽ अरङ् गमाम वो यस्स्य क्क्षयाय जिन्न्वथ ।
आपो जनयथा च नः ॥
शन् नो देवीरभिष्ट्टयऽ आपो भवन्तु पीतये ।
शय्योँरभिस्स्रवन्तु नः ॥
तत् त्सवितुर्ब् बरेण्ण्यम् भर्ग्गो देवस्स्य धीमहि ।
धियो यो नः प् प्रचोदयात् ॥

(मितमभिषिक्तञ् च सूत्रवँ वामहस्ते कृत्त्वा त्रिस् सन्ताड्ड्य त्रिवलितकरणे मन्त्रः)

भूर्ब् भुवः स्वः । अप्प्रदक्क्षिणन् त्रिवलित्तङ् करोमि ।

(पुनस् त्रिगुणितकरणे वलितकरणे च मन्त्रः)

भूर्ब् भुवः स्वः । पुनस्त्रिगुणितम् प्रदक्क्षिणवँ वलितञ् च करोमि ।

(पुनस् त्रिवृतङ् कृत्त्वा ग्रन्थिकरणे मन्त्रः)

ओ३म् । पुनस् त्रिवृतङ् कृत्त्वा ग्रन्थिङ् करोमि ।

(देवतानाम् प्रणामे मन्त्राः)

पृथिव्व्यै नमः । अद्भ्यो नमः । तेजसे नमः । वायवे नमः । आकाशाय नमः ।
प्राणेब्भ्यो नमः । विश्श्वात्मने विराजे नमः । तैजसात्मने सूत्त्रात्मने नमः ।
प्राज्ज्ञात्मने हिरण्ण्यगर्भाय नमः । ब्रह्म्मणे नमः । विष्णवे नमः । महेश्श्वराय नमः । परब्ब्रह्म्मणे नमः ॥

(यज्ञोपवीतप्रतिष्ठापने मन्त्र)

ओ३म् । भूर्ब् भुव॒ स्व॒ प्प्रतिष्ट्ठापयामि ।

(तन्तुदेवताऽऽवाहन-विन्न्यसन-सम्पूजन-मन्त्रा)

प्रथमतन्तौ ओङ्कारमावाहये विन्न्यस्स्यामि सम्पूजयामि च ओ३म् । ओङ्काराय नम ।
द्वितीयतन्तौ अग्निमावाहये विन्न्यस्स्यामि सम्पूजयामि च ओ३म् । अग्नये नम ।
तृतीयतन्तौ नागान् आवाहये विन्न्यस्स्यामि सम्पूजयामि च ओ३म् । नागेब्भ्यो नम ।
चतुर्थतन्तौ यममावाहये विन्न्यस्स्यामि सम्पूजयामि च ओ३म् । यमाय नम ।
पञ्चमतन्तौ पितॄन् आवाहये विन्न्यस्स्यामि सम्पूजयामि च ओ३म् । पितृब्भ्यो नम ।
षष्ठतन्तौ प्रजापतिम् आवाहये विन्न्यस्स्यामि सम्पूजयामि च ओ३म् । प्रजापतये नम ।
सप्तमतन्तौ वायुमावाहये विन्न्यस्स्यामि सम्पूजयामि च ओ३म् । वायवे नम ।
अष्टमतन्तौ सूर्यमावाहये विन्न्यस्स्यामि सम्पूजयामि च ओ३म् । सूर्याय नम ।
नवमतन्तौ विश्वान् देवान् आवाहये विन्न्यस्स्यामि सम्पूजयामि च ओ३म् । विश्श्वेब्भ्यो देवेब्भ्यो नम ।

(यज्ञोपवीताऽऽदाने मन्त्र)

दे॒वस्स्य॑त् त्वा स॒वि॒तु प्प्र॑स॒वेऽश्श्विनो॑र्ब् ब्बा॒हुब्भ्या॑म् पू॒ष्ण्णो हस्त्ता॑ब्भ्याम् । आद॑दे ॥

(आदित्त्याय यज्ञोपवीतदर्शने मन्त्रा)

उद् व्व॒यन् तम॑सस्प॒ परि॒ स्स्व॒ पश्श्य॑न्त॒ उत्त॑रम् ।
दे॒वन् दे॑वत्त्रा॒ सूर्य्य॒मग॑न्न्म॒ज् ज्योति॑रुत्त॒मम् ॥ मासं. २०।२१.३८।२४॥
आकृ॒ष्ण्णेन॒ रज॑सा॒ वर्त्त॑मानो निवे॒शय॑न्न॒मृत॒म् मर्त्त्य॑ञ् च ।
हि॒र॒ण्ण्यये॑न स॒वि॒ता रथे॑ना दे॒वो या॑ति॒ भुव॑नानि॒ पश्श्य॑न् ॥ मासं. ३३।४३ ॥
प्रवा॑वृजे सुप्प्र॒या ब॒र्हिरे॑षा॒मा वि॒श्प्प॑तीव॒ बीरि॑टऽ इयाते ॥
वि॒शाम॒क्क्तो॑रु॒षस॑ पूर्व्वह॑तौ वा॒यु पू॒षास् स्व॒स्त्त॒ये॑ नि॒युत्त्वा॑न् ॥ ३३।४४॥
इन्द्र॒वा॒यू बृ॒हस्प्प॒ति॑म् मि॒त्त्राग्ग्नि॑म् पू॒षण॒म् भग॑म् ।
आ॒दि॒त्त्यान्न् मारु॑तङ् ग॒णम् ॥ मासं. ३३।४५ ॥
बरु॑ण॒ प्प्रावि॒ता भुव॑न्न् मि॒त्त्रो विश्श्वा॑भिरू॒तिभि॑ ।
कर॑तान् न॒ सु॒राध॑स॒ ॥ मासं. ३३।४६ ॥

(यज्ञोपवीताभिमन्त्रणे मन्त्रौ)

ओ३म् ॥ मासं. ४०।१५ ॥
तत् त्स॑वि॒तुर्व्व॒ बरे॑ण्ण्य॒म् भर्ग्गो॑ दे॒वस्स्य॑ धीमहि ।
धियो॒ यो न॑ प्प्रचो॒दया॑त् ॥ मासं. ३।३५ , २२।९ , ३०।२ ॥

(यज्ञोपवीतधारणे मन्त्रा)

आचार्याय नम , गणनाथाय नम , वाचे नम , देवेब्भ्यो नम , ऋषिब्भ्यो नम , पितृब्भ्यो नम , ब्रह्म्मणे नम , अच्च्युताय नम , रुद्द्राय नम ।

त्र्य॑म्बकय्ँ यजामहे सुग॒न्न्धिम् पु॑ष्ट्टि॒वर्द्ध॑नम् ।
उ॒र्व्वा॒रु॒कमि॑व॒ बन्ध॑नान्न् मृ॒त्त्योर्म् मु॑क्क्षीय॒ माऽमृता॑त् ॥ मासं. ३।६० ॥
भूर्ब् भुव॒ स्व॒ ॥ मासं. ३।५ , ३७ ; ७।२९ , ८।५३ , २३।८ , ३६।३ ॥

(यज्ञोपवीतम् परमम् पवित्त्रम् प्रजापतेर् यत् सहजम् पुरस्तात् ।
आयुष्ष्यमग्ग्र्यम् प्रतिमुञ्च शुब्भ्रय्ँ यज्ञोपवीतम् बलमस्तु तेज ॥)

(महोपनिषदि, नारदपरिव्राजकोपनिषदि च)

(पुराणयज्ञोपवीतत्यागमन्त्र)

एतावद्दिनपर्यन्तम् ब्रह्म्म त्वन् धारितम् मया ।

जीर्णत्त्वात् त्वत्परित्यागो गच्छ सूत्र यथासुखम् ॥

(कृष्णजन्माष्टम्म्यान् चन्द्रार्घदाने मन्त्रो गारुडे)

क्षीरोदार्णवसम्भूत अत्रिनेत्त्रसमुद्भव ।

गृहाणार्घ्यं शशाङ्केदं रोहिण्ण्या सहित प्प्रभो ॥

ज्योत्स्नापते नमस् तुब्भ्यञ् ज्योतिषाम् पतये नमः ।

नमस् ते रोहिणीकान्त ह्यर्घन् न प्रतिगृह्ण्यताम् ॥

(कुशाग्ग्रहणामावास्स्यायाङ् कुशाग्ग्रहणे मन्त्रो बृहन्नारदीये)

विरिञ्चिना सहोत्पन्न परमेष्ठिनिसर्गतः ।

नुद सर्वाणि पापानि दर्भ स्स्वस्तिकरो भव ॥ हुम् फट् ॥

(परम्पराप्राप्ते हरितालिकाव्रते पार्वतीमहादेवध्यानादिमन्त्रः)

मन्दारमालाकुलितालकायै कपालमालाङ्कितशेखराय ।

दिव्व्याम्बरायै च दिगम्बराय नमश् शिवायै च नमश् शिवाय ॥

(हरितालिकाव्रते वायनदाने मन्त्र)

अन्नं सुवर्णपात्त्रस्थं सवस्त्रफलदक्षिणम् । वायनङ् गौरि विप्प्राय ददामि प्प्रीतये तव ॥

सौभाग्ग्यारोग्ग्यकामाय सर्वसम्पत्समृद्धये । गौरीगौरीशतुष्ट्यर्थवँ वायनन् ते ददाम्म्यहम् ॥

(व्रतपारणे अच्छिद्द्रप्रार्थनामन्त्रा नानास्मृतिपुराणेषु)

व्रतच्छिद्द्रन् तपश्छिद्द्रयँ यच् छिद्द्रयँ यज्ज्ञकर्मणि ।

सर्वम् भवति निश्छिद्द्रयँ यदि चेच्छन्ति ब्राह्म्मणाः ॥

उपवासो व्रतञ् चैव स्नानन् तीर्थफलन् तपः ।

विप्प्रैस् सम्पादितयँ यच् च तत् पूर्णम् भवति द्ध्रुवम् ॥

अच्छिद्द्रम् भक्क्ष्यभोज्ज्येषु पर्यङ्केष्ष्वासनेषु च ।

नियमेषु च सर्वेषु भवति द्द्विजवाक्क्यतः ॥

ब्राह्म्मणा जङ्गमन् तीर्थन् निर्जलं सार्वकामिकम् ।

येषावँ वाक्क्योदकेनैव शुद्ध्यन्ति मलिना जनाः ॥

ब्राह्म्मणा यानि भाषन्ते मन्न्यन्ते तानि देवताः ।

सर्वदेवमयो विप्प्रो न तद्वचनमन्न्यथा ॥

पृथिव्व्यायँ यानि तीर्थानि गङ्गाद्द्यास् सरितस् तथा ।

एकस्स्य विप्प्रवाक्क्यस्स्य कलान् नार्हन्ति षोडशीम् ॥

व्यासवाल्मीकिवचनात् पराशरवसिष्ठयोः ।

गर्गगौतमधौम्म्यात्त्रिकश्श्यपाङ्गिरसान् तथा ।

वचनान् नारदादीनां सम्पूर्णम् भवतु व्व्रतम् ।

सर्वम् भवतु मेऽच्छिद्द्रम् ब्राह्म्मणा भवताङ् गिरा ॥

मन्त्रहीनङ् क्रियाहीनं सर्वहीनन् द्विजोत्तमाः ।

सर्वं सम्पूर्णतायँ यातु भवद्वाक्क्यप्प्रसादतः ॥

कृतमेतद् हरितालिकाव्रतन् देशहीनङ् कालहीनन् द्रव्व्यहीनङ् क्रियाहीनम् मन्त्र-हीनवँ विधिहीनन् दक्षिणाहीनं श्रद्धाहीनयँ यत् कृतन् तत् सुकृतमस्तु, यन् न कृतन् तद् गौरीगौरीशयो प्रसादाद् ब्राह्म्मणवचनाच् च सर्वम् परिपूर्णमस्तु । "अस्तु परिपूर्णम्"।

(चरणोदकाऽभिमन्त्रणे मन्त्र)

व्रतेन दीक्षामाप्नोति दीक्षयाऽऽप्नोति दक्षिणाम् ।
दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥ मासं. १९ । ३० ॥

अज्ञानतिमिरान्धस्स्य व्रतेनाऽनेन शङ्कर । प्रसादसुमुखो भूत्वा ज्ञानदृष्टिप्प्रदो भव ॥

(चरणोदकपाने मन्त्र)

अकालमृत्त्युहरणं सर्वव्व्याधिविनाशनम् ।
शम्भो पादोदकम् पीत्त्वा शिरसा धारयाम्म्यहम् ॥

(गणेशचतुर्थ्याङ् गणेशनमस्कारमन्त्र)

गजाननम् भूतगणादिसेवितङ् कपित्थजम्बूफलचारुभक्षणम् ।
उमासुतं शोकविनाशकारणन् नमामि विघ्नेश्श्वरमीप्सितप्प्रदम् ॥

(ऋषिपञ्चम्म्यामपामार्गस्स्योत्पाटने तत्प्रार्थने मन्त्र)

आयुर् बलयँ यशो वर्च प्रजापशुवसूनि च ।
ब्रह्म्म प्प्रज्ज्ञाञ् च मेधाञ् च त्वन् नो देहि वनस्पते ॥

(ऋषिपञ्चम्म्यान् दन्तधावने मन्त्र)

मुखदौर्गन्ध्यनाशाय दन्तानाञ् च विशुद्धये ।
ष्ठीवनाय च गात्त्राणाङ् कुर्वेऽहन् दन्तधावनम् ॥

(ऋषिपञ्चम्म्यां सप्तर्षिध्याने मन्त्र)

कश्श्यपोऽत्त्रिर् भरद्द्वाजो विश्श्वामित्त्रोऽथ गौतम ।
जमदग्निर् वसिष्ठश् च अरुन्धत्त्या सहाऽष्टका ॥
मूर्तिम् ब्रह्म्मण्ण्यदेवर्षेर् ब्रह्म्मण्ण्यन् तेज उत्तमम् ।
सूर्यकोटिप्प्रतीकाशमृषिवृन्दवँ विचिन्तये ॥

(अगस्त्योदये सप्ताहाब्भ्यन्तरे अगस्त्यलोपामुद्राब्भ्यामर्घ्ययोर् दाने मन्त्रौ)

काशपुष्पप्रतीकाश वह्निमारुतसम्भव । मित्त्रावरुणयो पुत्त्र कुम्भयोने नमोऽस्तु ते ॥

राजपुत्त्रि महाभागे ऋषिपत्नि वरानने ।
लोपामुद्द्रे नमस् तुब्भ्यमर्घ्यम् मे प्रतिगृह्य्यताम् ॥

(नवरात्त्रे देवीवेदिकायायँ यवरोपणे मन्त्र)

यव त्त्वयँ यवरूपोऽसि ब्रह्म्मणा निर्मितो विधि ।
देवानान् तृप्तिकृद् यस्मात् तस्मात् त्ववँ वरदो भव ॥

(नवरात्त्रे देवीपूजने मन्त्र)

जयन्ती मङ्गला काली भद्द्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्त्री स्वाहा स्स्वधा नमोऽस्तु ते ।

(विजयादशम्म्यां शमीदर्शनस्पर्शनपूजनेषु मन्त्र)

अमङ्गलानां शमनीं शमनीन्दुष्कृतस्स्य च ।
दुस्स्वप्ननाशिनीन् धन्न्याम् प्रपद्द्येऽहं शमीं शुभाम् ॥

(दशम्म्यान् देवीनिर्माल्ल्यगन्धाक्षतादिदाने आशीर्वचने मन्त्रा)

आयुर् द्रोणसुते श्रियो दशरथे शत्त्रुक्षयो राघवे
ऐश्श्वर्यन् नहुषे गतिश् च पवने मानश् च दुर्योधने ।
शौर्यं शान्तनवे बलं हलधरे सत्त्यञ् च कुन्तीसुते
विज्ज्ञानवँ विदुरे भवन्तु भवत कीर्तिश् च नारायणे ॥

आयुर्वृद्धिर् यशोवृद्धिर् वृद्धिः प्रज्ञासुखश्रियाम् ।
धर्मसन्तानयोर् वृद्धिस् सन्तु ते सप्त वृद्धयः ॥
अव्याधिना शरीरेण मनसा च निराधिना ।
पूरयन्नर्थिनामाशास् त्वञ् जीव शरदां शतम् ॥
भद्रमस्तु शिवञ् चाऽस्तु महालक्ष्मीः प्रसीदतु ।
रक्षन्तु त्वां सदा देवास् सम्पदस् सन्तु सुस्थिराः ॥
महाकाली महालक्ष्मीस् तथा महासरस्वती ।
त्वयि नित्त्यम् प्रसन्नास् ते सन्तु कल्ल्याणदायिकाः ॥
स्वस्त्यस्तु ते कुशलमस्तु चिरायुरस्तु गोवाजिहस्तिधनधान्न्यसमृद्धिरस्तु ।
ऐश्श्वर्य्यमस्तु बलमस्तु रिपुक्क्षयोऽस्तु सन्तानवृद्धिसहिता हरिभक्तिरस्तु ॥

(स्त्रीभ्यो गन्धाक्षतादिदाने मन्त्राः)

जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥
सर्वमङ्गलमाङ्गल्ल्ये शिवे सर्वार्थसाधिके ।
शरण्ण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥
भद्रमस्तु शिवञ् चाऽस्तु महालक्ष्मीः प्रसीदतु ।
रक्षन्तु त्वां सदा देवास् सम्पदस् सन्तु सुस्थिराः ॥
महाकाली महालक्ष्मीस् तथा महासरस्वती ।
त्वयि नित्त्यम् प्रसन्नास् ते सन्तु कल्ल्याणदायिकाः ॥

(कोजागरपूर्णिमायाल्ँ लक्ष्मीपूजने लक्ष्मीप्रार्थनायाम् मन्त्रः)

विष्णोर् वक्क्षसि पद्मे च शङ्खे चक्क्रे तथाऽम्बरे ।
लक्ष्मि नित्त्या यथासि त्त्वम् मयि नित्त्या तथा भव ॥

(कोजागरपूर्णिमायामिन्द्रपूजने इन्द्रनमस्कारे मन्त्रः)

विचित्त्रैरावतस्थाय भास्स्वत्कुलिशपाणये ।
पौलोम्म्यालिङ्गिताङ्गाय सहस्स्राक्क्षाय ते नमः ॥

(कार्त्तिकस्नाने मन्त्रः)

कार्त्तिकेऽहङ् करिष्ष्यामि प्रातः स्नानञ् जनार्दन ।
प्रीत्त्यर्थन् तव देवेश दामोदर मया सह ॥

(कार्त्तिके दामोदरायाऽर्घ्यदाने मन्त्रः)

व्रतिनः कार्त्तिके मासि स्नातस्स्य विधिवन् मम । गृहाणार्घ्यम् मया दत्तन् दनुजेन्द्रनिषूदन ॥
नित्त्ये नैमित्तिके कृष्ण कार्त्तिके पापन्नाशने । गृहाणार्घ्यम् मया दत्तं राधया सहितो हरे ॥

(आकाशदीपदाने मन्त्रः)

दामोदराय नभसि तुलायान् दोलया सह ।
प्रदीपन् ते प्रयच्छामि नमोऽनन्ताय वेधसे ॥

(कार्त्तिके धात्रीप्रार्थनायाम् मन्त्रः, स्मृतिकौस्तुभे)

धात्रि देवि नमस् तुभ्भ्यं सर्वपापक्षयङ्करि ।
पुत्त्रान् देहि महाप्राज्ञे यशो देहि बलञ् च मे ॥
प्रज्ञाम् मेधाञ् च सौभाग्ग्यवँ विष्णुभक्तिञ् च शाश्श्वतीम् ।
नीरोगङ् कुरु मान् नित्त्यन् निष्पापङ् कुरु सर्वदा ॥

(कार्तिके(आश्श्वयुजे) कृष्णत्रयोदश्श्याङ् काकबलिदाने मन्त्र)
ऐन्द्रवारुणवायव्व्या याम्म्या वै नैर्ऋतास् तथा ।
वायसा प्रतिगृह्णणन्तु भूमावन्नम् मयाऽर्पितम् ।
(कार्तिके(आश्श्वयुजे) कृष्णत्रयोदश्श्यान् निशामुखे द्वारबहिर्देशे यमदीपदाने मन्त्र)
मृत्त्युना पाशदण्डाब्भ्याङ् कालेन श्श्यामया सह ।
त्रयोदश्श्यान् दीपदानात् सूर्यज प्रीयताम् मम ॥
(कार्तिके(आश्श्वयुजे) कृष्णचतुर्दश्श्याम् प्रभाते अभ्यङ्गस्नानसमये अपामार्गभ्रमणे मन्त्र)
सीतालोष्टसमायुक्त सकण्टकदलान्वित ।
हर पापमपामार्ग भ्राम्म्यमाण पुनपुन ॥
(कार्तिके(आश्श्वयुजे) कृष्णचतुर्दश्श्यान् नरकप्प्रीतये नद्द्यादिषु दीपरस्य प्रवाहणे मन्त्र)
दत्तो दीपश् चतुर्दश्श्यान् नरकप्प्रीतये मया ।
चतुर्वर्त्तिसमायुक्त सर्वपापापनुत्तये ॥
(कार्तिके(आश्श्वयुजे) कृष्णचतुर्दश्श्याङ् कुक्कुराब्भ्यामन्नरस्य दाने मन्त्र)
शुनकौ श्यामशबलौ वैवस्स्वतकुलोद्भवौ ।
ताब्भ्यामन्नम् प्रयच्छामि स्याताम् मे तावहिंसकौ ॥
(कार्तिके(आश्श्वयुजे) कृष्णचतुर्दश्श्याम् माषपत्त्रपिष्टिप्प्राशने मन्त्र)
नुद सर्वाणि पापानि नरकाऽदर्शनङ् कुरु ।
प्राश्नामि तव पत्त्राणि माष देहि यशो बलम् ॥
(कार्तिके (आश्श्वयुजे) कृष्णचतुर्दश्श्यां रात्त्र्यान् दीपदाने मन्त्र आवन्त्ये)
नम पितृब्भ्य प्रेतेब्भ्यो नमो धर्माय विष्णवे ।
नम सूर्याय रुद्द्राय कान्तारपतये नम ॥
(कार्तिके(आश्श्वयुजे) अमावास्स्यायान् निशामुखे लक्ष्म्यै दीपमालिकादाने मन्त्र)
मार्तण्डमण्डलाखण्डचन्द्रबिम्बाग्नितेजस ।
गृहाण देवि दीपान् मे निर्मितान् श्वेतवर्तिभि ॥
(कार्तिके(आश्श्वयुजे) अमावास्स्यायाल्ँ लक्ष्मीपूजने लक्ष्मीप्रार्थनायाम् मन्त्र)
विश्श्वरूपस्स्य भार्याऽसि पद्मे पद्मालये शुभे ।
महालक्ष्मि नमस् तुब्भ्यं सुखरात्त्रिङ् कुरुष्व मे ॥
वर्षाकाले महाघोरे यन् मया दुष्कृतङ् कृतम् ।
सुखरात्त्रिप्प्रभातेऽद्द्य तन् मे लक्ष्मीर् व्यपोहतु ॥
या रात्त्रिस् सर्वभूतानान् देवानां सृष्टिसम्भवा ।
आक्ख्याता भूतले देवि सुखरात्त्रि नमोऽस्तु ते ॥
नमस् ते सर्वदेवानाव्ँ वरदाऽसि हरिप्प्रिये ।
या गतिस् त्वत्प्रपन्नानां सा मे भूयात् त्वदर्चनात् ॥
(कार्तिके(आश्श्वयुजे) अमावास्स्यायामिन्द्रपूजने इन्द्रप्रार्थने मन्त्र)
विचित्त्रैरावतस्थाय भास्स्वत्कुलिशपाणये ।
पौलोम्म्यालिङ्गिताङ्गाय सहस्स्राक्षाय ते नम ॥
(कार्तिके (आश्श्वयुजे) अमावास्स्यायां लक्ष्मीपूजने कुबेरप्रार्थने मन्त्र)
धनदाय नमस् तुब्भ्यन् निधिपद्माधिपाय च ।
भवन्तु त्वत्प्रसादान् मे धनधान्यादिसम्पद ॥

(कार्तिकशुक्लप्रतिपदि गोवर्धनपूजायाम् मन्त्र)

गोवर्धन धराधार गोकुलत्त्राणकारक ।
विष्णुबाहुकृतोच्छ्राय गवाङ्कोटिप्प्रदो भव ॥

(कार्त्तिकशुक्लप्रतिपदि गोपूजायाम् मन्त्र)

या लक्ष्मीर् लोकपालानान् धेनुरूपेण संस्थिता ।
घृतवँ वहति यज्ञार्थे सा मे पापवँ व्यपोहतु ॥
अग्ग्रतस् सन्तु मे गावो गावो मे सन्तु पृष्ठत ।
गावो मे हृदये सन्तु गवाम् मद्ध्ये वसाम्म्यहम् ॥

(कार्त्तिकशुक्लप्रतिपदि मार्गपालिकाया नमस्कारे मन्त्र)

मार्गपालि नमस् तेऽस्तु सर्वलोकसुखप्प्रदे ।
विधेयै पुत्त्रदाराद्यैर् वृतस्स्य पुनरेहि मे ॥

(कार्त्तिकशुक्लप्रतिपदि रात्त्रौ बले पूजने मन्त्र)

बलिराज नमस् तुब्भ्यन् दैत्त्यदानववन्दित ।
भविष्य्येन्द्र सुराराते पूजेयम् प्रतिगृह्य्यताम् ॥

(भ्रातृद्वितीयायाम् भ्रात्त्रे भक्त-भक्ष्य-भोज्ज्यादिदाने मन्त्र)

भ्रातस् तवानु-(ग्ग्र-)जाताऽहम् भुङ्क्ष्व भक्त-(भोज्ज्य-)मिदं शुभम् ।
प्रीतये यमराजस्स्य यमुनाया विशेषत ॥

(चातुर्मास्स्यव्रतसमापने मन्त्र)

इदवँ व्रतम् मया देव कृतम् प्रीत्त्यै तव प्प्रभो ।
न्यूनं सम्पूर्णतायँ यातु त्वत्प्रसादाज् जनार्दन ॥

(माघ-वैशाख-कार्त्तिक-स्नानादि-व्रतचारिभिर् मार्गकृष्णप्प्रतिपदि त्रिजटाया पूजाङ् कृत्त्वा तस्स्यै नवीनफलादिसहितस्स्याऽर्घस्स्य दाने प्रयोज्ज्यो मन्त्र)

रावणावरजे देवि सीताया प्रियवादिनि ।
गृहाणाऽर्घ्य्यम् मया दत्तन् त्रिजटायै नमोऽस्तु ते ॥

(मार्गकृष्णचतुर्दश्यान् नेपालस्थपशुपतिक्षेत्त्रे शतबीजरोपणे मन्त्र)

सुवर्णरक्तिकातुल्ल्यवँ व्रीहिमेकम् परिक्षिपेत् ।
मृगस्स्थलीम् परिब्भ्रम्म्य पुनर्जन्म न विद्यते ॥

(स्नानादिव्रते साद्‌गुण्ण्याय कर्तव्ये सोपस्कराऽऽमान्नदाने वाक्क्यम्)

ओ३म् । तत् सत् । स्वस्ति । मया कृतस्स्य माघस्नानव्रतस्स्य साङ्गस्स्य परिपूर्णफलस्स्य प्राप्तये एतत् सोपस्करम् आमान्नम् प्रजापतिदैवतम् अमुकशर्मणे अमुकगोत्त्राय सुपूजिताय ब्राह्म्मणाय तुब्भ्यं सम्प्रददे , तत् सन् न मम ।

(अन्नप्रार्थना)

अन्नेन जायते विश्श्वम् प्राणिनाम् प्राणरक्षणम् ।
तण्डुला वैश्श्वदेवत्त्या पाकेनाऽन्नम् भवन्ति ये ॥
पावना सर्वयज्ञेषु प्रशस्ता यज्ञकर्मणि । तस्मात् तण्डुलदानेन प्रीयन्तावँ विश्श्वदेवता ॥

(दानप्रतिष्ठा)

ओ३म् । इहाऽद्य कृतस्स्यैतस्स्य सोपस्कराऽऽमान्नदानस्स्य प्रभावस्स्य सम्पत्तये एतान् दक्षिणान् नाणकद्रव्व्यवँ विष्णुदैवतम् अमुकशर्मणे अमुकगोत्त्राय सुपूजिताय ब्राह्म्मणाय तुब्भ्यमहं सम्प्रददे, तत् सन् न मम ॥

॥ इति वार्षिककृत्त्यविशेषप्रकरणम् ॥

अथ तीर्थविशेष-स्नानादि-मन्त्राः

(सर्वतीर्थसाधारण स्नानमन्त्र)

ओन् नमो देवदेवाय शितिकण्ठाय दण्डिने । रुद्राय वामहस्ताय चक्रिणे वेधसे नमः ॥
सरस्वती च सावित्री वेदमाता विभावरी । सन्निधानङ् कुरुष्वाऽत्र तीर्थे पापप्रणाशिनि ॥

(तीर्थे सम्यक् तर्पणङ् कर्तुमजानद्भिः सङ्क्षेपेण तर्पणे सकुशहस्तैस् तिलतोयाञ्जलिदाने प्रयोज्यो मन्त्रो वायवीये)

आब्रह्मस्तम्बपर्यन्तन् देवर्षिपितृमानवाः । तृप्यन्तु पितरः सर्वे मातृमातामहादयः ॥
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ।
आब्रह्मभुवनाल् लोकादिदमस्तु तिलोदकम् ॥

(तीर्थे जीवद्-व्यक्तिविशेष-प्रतिनिधि-कुशवटु-स्नपने मन्त्र)

कुशोऽसि त्वम् पवित्रोऽसि विष्णुना विधृतः पुरा ।
त्वयि स्नाते स च स्नातो यस्यैतद् ग्रन्थिबन्धनम् ॥

(मानसी तीर्थयात्रा स्कान्दे महाभारते च)

यान्यगम्यानि तीर्थानि दुर्गाणि विषमाणि च ।
मनसा तानि गम्यानि सर्वतीर्थगतीप्सुना ॥

(शङ्करतीर्थस्नाने मन्त्र)

शुक्लिके चैव माहेन्द्रि युवयोस् सङ्गमे शिवे ।
स्नामि शङ्करतीर्थाख्ये पापम् मे हरतं शुभे ॥

(देवघट्टमाहात्म्यवर्णं वाराहपुराणे)

तस्मिन् ह्रदे महापुण्ये पुण्यनद्योस् तु सङ्गमे ।
स्नानाच् छताश्वमेधानाम् फलम् प्राप्नोति मानवः ॥
स्नात्वा तत्र तु वैशाखे गोसहस्रफलं लभेत् ।
माघमासे पुनः स्नात्वा प्रयागस्नानजम् फलम् ॥
गङ्गायमुनयोर् यद्वत् सङ्गमो मर्त्यदुर्लभः ।
तथैवाऽयन् देवनद्योस् सङ्गमस् समुदाहृतः ॥

(देवघट्टस्नाने मन्त्र)

यत्र विष्णुः प्राङ्मुखश् च शिवः प्रत्यङ्मुखस् स्थितः ।
रक्षार्थं सततन् तत्र क्षेत्रे हरिहराभिधे ॥
सितासिते सरिच्छ्रेष्ठे देवानामपि दुर्लभे ।
युवयोस् सङ्गमे ह्यद्यादिप्रयागे स्नामि सिद्धये ॥

(त्रिवेणीस्नाने मन्त्र)

देविका ब्रह्मतनया गण्डकी चाऽत्र सङ्गता ।
अत्र स्नात्वा प्रमुञ्चामि सर्वाणि दुरितान्यहम् ॥

(त्रिवेणीस्थमहादेवनमस्कारे मन्त्र)

नमस् तेऽस्तु महादेव त्रिजलेश्वरसञ्ज्ञित ।
भुक्ति-मुक्तिप्रद विभो दर्शनादघनाशन ॥

(अयोद्ध्यायां सरयूस्नाने मन्त्र)

हरिवामाङ्घ्रिसम्भूते मानसादागते शुभे ।
हर पापं सरयु मे निम्नगे घर्घरायुते ॥

(प्रयागस्नानगाहात्म्यम् पाद्मे)

वाङ्मनकायजम् पापन् नरस्स्य विलयवँ व्रजेत् ।
प्रयागे माघमासे तु त्र्यहस्नातस्स्य निश्चितम् ॥

(प्रयागस्नाने मन्त्र)

मार्तण्डतनये गङ्गे निगूढे च सरस्स्वति ।
युष्माकं सङ्गमे स्नामि पापम् मे हरताऽखिलम् ॥

(काश्श्याङ् गङ्गास्नाने मन्त्र पाद्मे)

विष्णुपादाब्जसम्भूते गङ्गे त्रिपथगामिनि ।
धर्मद्द्रवेति विक्ख्याते पापम् मे हर जाह्न्नवि ॥
विष्णुपादप्प्रसूताऽसि वैष्णवी विष्णुपूजिता ।
त्राहि मामेनसस् तस्मादाजन्ममरणान्तिकात् ॥
श्रद्धया धर्मसम्पन्ने देवि श्श्रीमति जाह्न्नवि ।
अमृतेनाऽम्बुना देवि भागीरथि पुनीहि माम् ॥
त्रिभिश् श्लोकवरैरेभिर् यस् स्नायाज् जाह्न्नवीजले ।
जन्मकोटिकृतात् पापान् मुच्च्यते नाऽत्त्र संशय ॥

(मणिकर्णिकामाहात्म्यम्, वीरमित्त्रोदये ब्रह्म्मवैवर्त्ते)

सर्वतीर्थावगाहाच् च यत् पुण्ण्यं स्यान् नृणामिह ।
तत् पुण्ण्यङ् कोटिगुणितम् मणिकर्ण्यैकमज्जनात् ॥

काश्श्यान् तीर्थान्न्यनेकानि काश्श्याल्ँ लिङ्गान्न्यनेकशः। तथापि सेव्व्यो विश्श्वेशस् स्नातव्व्या मणिकर्णिका ॥ काशीखण्डे९६।५ ॥

(काशीस्थ-विश्श्वनाथ-स्तुतिः काशीखण्डे)

व्यास उवाच-

एको रुद्द्रो न द्द्वितीयो यतस् तद् ब्रह्म्मैवैकन् नेह नानाऽस्ति किञ्चित् ।
यद्द्यप्प्यन्न्य कोऽपि वा कुत्त्रचिद् वा व्याचष्टान् तद् यस्स्य शक्तिर् मदग्ग्रे ॥
य क्षीराब्धेर् मन्दराऽऽघातजातो ज्वालामाली कालकूटोऽतिभीम ।
तं सोढुवँ वा कोऽपरोऽभून् महेशाद् यत् कीलाभि कृष्णतामाप विष्णु ॥
यद्बाणोऽभूच् छ्रीपतिर् यस्स्य यन्ता लोकेशो यत्स्यन्दनम् भूस् समस्ता ।
वाहा वेदा यस्स्य येनेषुपाताद् दग्धा ग्रामास् त्रैपुरास् तत्सम क ॥
यङ् कन्दर्पो वीक्षमाण समानन् देवैरन्न्यैर् भस्मजात स्वयं हि ।
पौष्पैर् बाणैस् सर्वविश्श्वैकजेता को वा स्तुत्त्य कामजेतुस् तदन्न्य ॥
यवँ वै वेदो वेद नैवाऽपि विष्णुर् नो वा वेधा नो मनो नैव वाणी ।
तन् देवेशम् मादृश कोऽल्पमेधा याथात्म्याद् वै वेत्त्यहो विश्श्वनाथम् ॥
यस्मिन् सर्वयँ यस् तु सर्वत्त्र सर्वो यो वै कर्ता योऽविता योऽपहर्ता ।
नो यस्स्याऽऽदिर् यस् समस्ताऽऽदिरेको नो यस्स्यान्तो योऽन्तकृत् तन्नतोऽस्मि ॥
यस्स्यैकाऽऽक्ख्या वाजिमेधेन तुल्ल्या यस्स्याऽऽनत्त्या चैकयाऽल्पेन्द्रलक्ष्मी ।
यस्स्य स्स्तुत्त्या लब्भ्यते सत्त्यलोको यस्स्याऽर्चातो मोक्षलक्ष्मीरदूरा ॥
नाऽन्न्यन् देववँ वेद्म्यहं श्रीमहेशान् नाऽन्न्यन् देवं स्तौमि शम्भोर् ऋतेऽहम् ।
नाऽन्न्यन् देववँ वा नमामि त्त्रिनेत्त्रात् सत्त्यंसत्त्यंसत्त्यमेतन् मृषा न ॥
इत्थयँ यावत् स्तौति शम्भुम् महर्षिस् तावन् नन्दी शाम्भवाद् दृक्प्रसादात् ।
तद्दोस्स्तम्भन् त्यक्तवाँश् चाऽऽबभाषे स्मायंस्मायम् ब्राह्म्मणेब्भ्यो नमो व ॥

नन्दिकेश्वर उवाच-

इदं स्तवम्महापुण्यवँ व्यास ते परिकीर्तितम् । य पठिष्यति मेधावी तस्स्य तुष्यति शङ्कर ॥
व्यासाष्टकमिदम् प्रात पठितव्यम् प्रयत्नत । दुस्स्वप्नपापशमनं शिवसान्निद्ध्यकारकम् ॥

मातृहा पितृहा वाऽपि गोघ्नो बालघ्न एव वा ।
सुरापस् स्वर्णहृद् वाऽपि निष्पापोऽस्स्यास् स्तुतेर् जपात् ॥

(गयामाहात्म्यम्)

गयान् दृष्ट्वा तु सुभगे महापापोऽपि पापकृत् ।
पूत कृत्त्याधिकारी च श्राद्धकृद् ब्रह्म्मलोकभाक् ॥ बृहन्नारदीये ॥
पञ्चक्क्रोशे गयाक्षेत्त्रे यत्त्रतत्त्र तु पिण्डद ।
अक्षयम् फलमाप्नोति ब्रह्म्मलोकन् नयेत् पितॄन् ॥ गारुडे ॥
अपि पापात्मन पुंसो ब्रह्म्मघ्नस्स्याऽपि देहिन ।
अपि रौरवसंस्स्थस्स्य कुम्भीपाकगतस्स्य च ॥
प्रेतभावगतस्स्याऽपि यस्स्य श्श्राद्धम् प्रदास्स्यति ।
गयाशिरसि वंशस्स्थस् तस्स्य मुक्तिर् भविष्यति ॥
निस्स्वा अपि करिष्यन्ति श्राद्धमेकं हि तत्त्र च ।
गयाशिरसि सुव्यक्तयँ युष्माकम् मुक्तिदायकम् ॥ स्कान्दे नागरखण्डे ॥
नो चेत् पञ्चदशाहवँ वा सप्तरात्त्रन् त्रिरात्त्रकम् ।
महाकल्पकृतम् पापङ् गयाम् प्राप्य विनश्श्यति ॥ वायवीये ॥
कृतपिण्ड फल्गुतीर्थे पश्श्येद् देवम् पितामहम् ।
गदाधरन् तत पश्श्येत् पितॄणामनृणो भवेत् ॥ गारुडे ॥

(गयायाम् फल्गुतीर्थे स्नाने मन्त्रो वायवीये)

फल्गुतीर्थे विष्णुजले करोमि स्स्नानमादृत ।
पितॄणावँ विष्णुलोकाय भुक्तिमुक्तिप्प्रसिद्धये ॥

(गयायां रामतीर्थे स्नाने मन्त्रो वीरमित्त्रोदये)

जन्मान्तरशतं साग्ग्रयँ यत् कृतन् दुष्कृतम् मया ।
तत् सर्ववँ विलययँ यातु रामतीर्थाभिषेचनात् ॥

(गयायां रामनमस्कारे मन्त्रो वीरमित्त्रोदये)

रामराम महाबाहो देवानामभयङ्कर ।
त्वान् नमस्स्येह देवेश मम नश्श्यतु पातकम् ॥

(गयायाम् ब्रह्म्मसरसि स्नाने मन्त्रो वीरमित्त्रोदये)

स्नानङ् करोमि तीर्थेऽस्मिन् ऋणत्त्रयविमुक्तये ।
श्राद्धाय पिण्डदानाय तर्पणायाऽऽत्मशुद्धये ॥

(गयाश्राद्धान्ते पठनीयौ श्लोकौ वीरमित्त्रोदये)

साक्क्षिणस् सन्तु मे देवा ब्रह्म्मेशानादयस् तथा ।
मया गयां समासाद्द्य पितॄणान् निष्कृति कृता ॥
आगतोऽस्मि गयान् देव पितृकार्ये गदाधर । त्वमेव साक्षी भगवन्ननृणोऽहमृणत्त्रयात् ॥

(गयायाम् ब्रह्म्मकूपयूपमद्ध्ये श्राद्धङ् कृत्त्वा ब्रह्म्मनमस्कारे मन्त्रो बृहन्नारदीये)

ओन् नमो ब्रह्म्मणेऽजाय जगज्जन्मादिकारिणे ।
भक्तानाञ् च पितॄणाञ् च तारकाय नमोनम ॥

(गयायाम् अक्षयवटनमस्कारे मन्त्र आग्नेये)

नमोऽक्षयवटायैव अक्षयस्स्वर्गदायिने ।
पित्त्रादीनामक्षयाय सर्वपापक्षयाय च ॥

(गयाशिरसि श्राद्धङ् कृत्वा आदिगदाधरस्य नमस्कारे मन्त्र पाद्मे)

यश् श्राद्धसमये दूरात् स्मृतोऽपि पितृमुक्तिद ।
तङ् गयायां स्थितं साक्षान् नमामि श्श्रीगदाधरम् ॥

गदाधर मया श्राद्धं सञ्चीर्णन् त्वत्प्रसादत । अनुजानीहि मान् देव गमनाय गृहम् प्रति ॥

(करतोयास्नाने मन्त्रो वीरमित्त्रोदये तीर्थप्रकाशे पृ. ६०१)

करतोये शीतनीरे सरिच्छ्रेष्ठे सुविश्श्रुते ।
पौण्ड्रान् प्लावयसे नित्त्यम् पापं हर करोद्भवे ॥

(लौहित्त्यक्षेत्त्रमाहात्म्यम् पाद्मे सृष्टिखण्डे ५०।२४५-२४६)

या गतिर् योगयुक्तानाम् मुनीनामूर्ध्वरेतसाम् ।
सा गतिस् त्यजताम् प्राणान् ब्रह्म्मपुत्त्रेषु सप्तसु ॥
लोहितस्स्य विशेषेण तीरोत्तरसमाश्रित ।
विधिना यस् त्यजेत् प्राणान् स च मत्समतावँ व्रजेत् ॥

(लौहित्त्यनदस्नाने मन्त्रो वीरमित्त्रोदये आह्निकप्प्रकाशे, पृ. २०२)

ब्रह्म्मपुत्त्र महाभाग शन्तनो कुलवर्धन ।
अमोघगर्भसम्भूत पापलँ लौहित्त्य मे हर ॥

(गङ्गासागरस्नाने मन्त्रो वीरमित्त्रोदये तीर्थप्रकाशे पृ. ३५५)

त्वन् देव सरितान् नाथ त्वन् देवि सरितावँ वरे ।
उभयोस् सङ्गमे स्नात्त्वा मुञ्चामि दुरितानि वै ॥

(महानदीमाहात्म्यम्, वनपर्वणि ८४।८४)

महानद्यामुपस्पृश्श्य तर्पयेत् पितृदेवता ।
अक्षयान् प्राप्नुयाल् लोकान् कुलञ् चैव समुद्धरेत् ॥

(पुरुषोत्तमक्षेत्त्रे जगन्नाथतीर्थे पञ्चतीर्थ्याम् मार्कण्डेयह्रदस्नाने मन्त्रो बृहन्नारदीये)

संसारसागरे मग्नम् पापग्ग्रस्तमचेतनम् । त्राहि माम् भगनेत्त्रघ्न त्रिपुरारे नमोऽस्तु ते ॥
नमश् शिवाय शान्ताय सर्वपापहराय च । स्नानङ् करोमि देवेश मम नश्श्यतु पातकम् ॥

(पुरुषोत्तमक्षेत्त्रे जगन्नाथतीर्थे वटपूजने मन्त्रो बृहन्नारदीये)

नमोऽव्यक्तस्वरूपाय महाप्रलयसाक्षिणे । महद्रसोपविष्टाय न्यग्ग्रोधाय नमोऽस्तु ते ॥
अमरस्त्वं सदाकल्प हरेश्चायतनवँ वट । न्यग्ग्रोध हर मे पापङ् कल्पवृक्ष नमोऽस्तु ते ॥

(पुरुषोत्तमक्षेत्त्रे आत्मानं नारायणं ध्यात्त्वा समुद्रस्नाने मन्त्रो बृहन्नारदीये २।५६।५२-५४)

त्वमग्निर् द्विपदान् नाथ रेतोधा कामदीपन । प्रधानस् सर्वभूतानाञ् जीवानाम् प्रभुरव्व्यय ॥
अमृतस्स्याऽरणिस् त्वं हि देवयोनिरपाम्पते । वृजिनं हर मे सर्वन् तीर्थराज नमोऽस्तु ते ॥

(पुरुषोत्तमक्षेत्त्रे इन्द्रद्युम्नसरस्स्नाने मन्त्रो बृहन्नारदीये २।६०।३ ब्राह्म्ये च ६०।३)

अश्श्वमेधाङ्गसम्भूत तीर्थ सर्वाघनाशन ।
स्नानन् त्वयि करोम्म्यद्द्य पापं हर नमोऽस्तु ते ॥

(जगन्नाथतीर्थे वैनतेयनमस्कारे मन्त्रो बृहन्नारदीये)

छन्दोमय जगद्धाममानरूपत्त्रिवृद्वपु ।
यज्ञरूप जगद्व्यापिन् प्रीयमाणाय ते नम ॥

(तत्रैव सङ्कर्षणनमस्कारे मन्त्रो बृहन्नारदीये)
नमस् ते हलधृङ्नाम्ने नमस् ते मुशलायुध । नमस् ते रेवतीकान्त नमस् ते भक्तवत्सल ॥
नमस् ते बलिनां श्रेष्ठ नमस् ते धरणीधर । प्रलम्बारे नमस् तेऽस्तु त्राहि माङ् कृष्णपूर्वज ।

(जगन्नाथस्तुति, बृहन्नारदीये)
जय कृष्ण जगन्नाथ जय सर्वाघनाशन । जय चाणूरकेशिघ्न जय कंसनिषूदन ॥
जय पद्मपलाशाक्ष जय चक्रगदाधर । जय नीलाम्बुदश्याम जय सर्वसुखप्रद ॥
जय देव जगत्पूज्य जय संसारनाशन । जय लोकपते नाथ जय वाञ्छाफलप्रद ॥
संसारसागरे घोरे निस्सारे दुखफेनिले । क्रोधग्राहाकुले रौद्रे विषयोदकसम्प्लवे ॥
नानारोगोर्मिकलिले मोहाऽऽवर्तसुदुस्तरे । निमग्नोऽहं सुरश्रेष्ठ त्राहि माम् पुरुषोत्तम ॥

(जगन्नाथतीर्थे सुभद्रास्तुति, बृहन्नारदीये)
नमस् ते सर्वगे देवि नमस् ते शुभसौख्यदे ।
त्राहि माम् पद्मपत्राक्षि कात्त्यायनि नमोऽस्तु ते ॥

(समुद्रस्नाननियमः स्कान्दे प्रभासे ब्राह्मे च)
विना मन्त्रवँ विना पर्व क्षुरकर्म विना नरैः ।
कुशाग्रेणाऽपि देवेशि न स्प्रष्टव्यो महोदधिः । ७।१।२४।११॥
सर्वत्र सागरः पुण्यः सदा पर्वणिपर्वणि ।
नाऽपर्वणि सरिन्नाथं स्पृशेदन्यत्र कर्हि चित् ॥ ३।१।५२।६०॥
सेतौ सिन्ध्वब्धिसयँयोगे गङ्गासागरसङ्गमे ।
नित्यं स्नानं हि निर्दिष्टङ् गोकर्णे पुरुषोत्तमे ॥३।१।५२।६१॥

(समुद्रस्नाने समुद्रे पाषाणस्य प्रक्षेपणे मन्त्रः स्कान्दे ३।१।५।११९)
पिप्पलादसमुत्पन्ने कृत्त्ये लोकभयङ्करे ।
पाषाणस् ते मया दत्त आहारार्थम् प्रकल्प्यताम् ॥

(समुद्रतीर्थसेवनाऽनुज्ञापने मन्त्रः स्कान्दे ब्राह्मे)
अशेषजगदाधार शङ्खचक्रगदाधर ।
देहि देव ममाऽनुज्ञाँयँ युष्मत्तीर्थनिषेवणे ॥

(समुद्रस्पर्शने मन्त्रः स्कान्दे आवन्त्ये)
नमस् ते विष्णुरूपाय नमस् तुभ्यमपाम् पते ।
सान्निद्ध्यङ् कुरु देवेश सागरे लवणाम्भसि ॥

(समुद्रस्नानमन्त्रो महाभारते वनपर्वणि स्कान्दे ब्राह्मादिखण्डेषु च)
अग्निस् तु ते योनिरिला च देहो रेतो हि विष्णोरमृतस्य नाभिः ।
एतद् ब्रुवन् पाण्डव सत्त्यवाक्यन् ततोऽवगाहेत पतिन् नदीनाम् ॥

(समुद्रस्नानानन्तरं समुद्रायाऽर्घ्यस्य दाने मन्त्रः स्कान्दे ३।१।५।१२२)
सर्वरत्नमय श्रीमन् सर्वरत्नाकराऽऽकर ।
सर्वरत्नप्रधानस् त्वङ् गृहाणाऽर्घ्यम् महोदधे ॥

(सेतुनमस्कारे मन्त्रः स्कान्दे ३।१।७।७१-७२)
रघुवीर-पदन्न्यास-पवित्रीकृत-पांसवे । दशकण्ठशिरश्छेदहेतवे सेतवे नमः ॥
केतवे रामचन्द्रस्य मोक्षमार्गैकसेतवे । सीताया मानसोल्लासहेतवे सेतवे नमः ॥

(रामनाथ-(=रामेश्वर-)स्तुति स्कान्दे ब्राह्मखण्डे सेतुमाहात्म्ये)
नमस् ते रामनाथाय त्रिपुरघ्नाय शम्भवे । पार्वतीजीवितेशाय गणेशस्स्कन्दसूनवे ॥
नमस् ते सूर्यचन्द्राग्निलोचनाय कपर्दिने । नमश् शिवाय सोमाय मार्कण्डेयभवच्छिदे ॥

नमस् सर्वप्प्रपञ्चस्स्य सृष्टिस्स्थित्त्यन्तहेतवे । नम उग्ग्राय भीमाय महादेवाय साक्षिणे ॥
सर्वज्ज्ञाय वरेण्ण्याय वरदाय वराय ते । श्रीकण्ठाय नमस् तुब्भ्यम् पञ्चपातकभेदिने ॥
नमस् तेऽस्तु परानन्दसत्त्यविज्ज्ञानरूपिणे । नमस् ते भवरोगग्घ्न स्तायूनाम्पतये नमः ॥
पतये तस्क्कराणान् ते वनानाम्पतये नमः । गणानाम्पतये तुब्भ्यवँ विश्श्वरूपाय साक्षिणे ॥
कर्मणा प्प्रेरितश् शम्भो जनिष्ष्ये यत्त्रयत्त्र तु । तत्त्रतत्त्र पदद्द्वन्द्वे भवतो भक्तिरस्तु मे ॥
असन्मार्गे मतिर् मा भूद् भवतः कृपया मम । वैदिकाऽऽचारमार्गे च रतिस् स्याद् भवते नमः ॥

(कावेरीमाहात्म्यम् महाभारते कौर्मे च)

ततो गच्छेत कावेरीवँ वृतामप्सरसाङ् गणैः ।
तत्त्र स्स्नात्त्वा नरो राजन् गोसहस्स्रफललँ लभेत् ॥ वन. ८५।२२॥
पवित्त्रसलिला पुण्ण्या कावेरी विपुला नदी ।
तस्स्यां स्नात्त्वोदकङ् कृत्त्वा मुच्च्यते सर्वपातकैः ॥ कू. २।३७।१६॥

(काञ्चीमाहात्म्यम् , गारुडे २।३८।४,५)

मानुष्ष्यम् भारते वर्षे त्रयोदशसु जातिषु ।
तत् प्राप्प्य म्रियते क्षेत्त्रे पुनर्जन्म न विद्द्यते ॥
अयोद्ध्या मथुरा माया काशी काञ्ची अवन्तिका । पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः ॥

(केरलस्थ-ब्रह्मश्श्रीक-द्विजेन्द्र-महिमा)

साद्ध्यात्मैस् साधिदैवैर् दुरवगमतरैस् साधिभूतैस् तथैव
भव्व्यैस् सामाजकैश् चाऽप्प्यतिमहितगुणै राष्ट्रियैश् चाऽपि पक्षैः ।
युक्तानाम् मन्दशिक्षाऽसुविदितमहसां श्रौतयज्ञक्रियाणान्
निर्वोढारो द्विजेन्द्रा असुकरतपसः केरलस्था जयन्ति ॥

(भीमरथी-(कृष्णा-)स्नाने मन्त्रो वीरमित्त्रोदये आह्निकप्प्रकाशे पृ. २०२)

भीमसस्वेदसमुद्भूते रथनेमिविनिस्सृते ।
सर्वपापविनाशार्थं स्नास्स्ये देवि तवाऽम्भसि ॥

(सूर्ये बृहस्पतौ च सिंहस्थे गोदावरीस्नाने मन्त्रः)

अद्द्य सूर्यबृहस्पत्त्योस् सिंहराशिस्थयोस् सतोः ।
परमात्मप्प्रसादाय स्नामि गोदावरि त्त्वयि ॥
गोदावरि नमस् तेऽस्तु प्रसन्ना त्त्वं शुभे नदि ।
प्रक्षाल्ल्य रिप्प्रं सर्वम् मेऽन्तर्बहिश्शुद्धिमाचर ॥

(नर्मदास्नाने मन्त्रो वीरमित्त्रोदये आह्निकप्प्रकाशे पृ. २०२)

आद्द्ये नमः पुण्ण्यजले नमस् सागरगामिनि ।
नर्मदे पापनिर्मुक्ते नमो देवि वरानने ॥
नमोऽस्तु ते मुनिगणसिद्धसेविते नमोऽस्तु ते शङ्करदेहनिस्सृते ।
नमोऽस्तु ते धर्मभृतावँ वरप्प्रदे नमोऽस्तु ते सर्वपवित्त्रपावने ॥

(प्रभासस्थ-सोमनाथ-दर्शन-माहात्म्यं स्कान्दे प्रभासखण्डे)

सरस्स्वती समुद्द्रश् च सोमस् सोमग्ग्रहस् तथा ।
दर्शनं सोमनाथस्स्य सकाराः पञ्च दुर्लभाः ॥

(द्वारकास्थगोमतीस्नाने गोमत्त्यै शुब्भ्राक्षतफलयुक्तार्घदाने मन्त्रः प्रभासखण्डे)

ब्रह्म्मलोकात् समायाते वसिष्ठतनये शुभे ।
सर्वपापविशुद्ध्यर्थन् ददाम्म्यर्घन् तु गोमति ॥

वसिष्ठतनये देवि सुरवन्द्ये यशस्स्विनि ।
त्रैलोक्क्यवन्दिते देवि पापम् मे हर गोमति ॥
(द्वारकायाङ् गोमत्त्युदधिसङ्गमे स्नात्त्वा महार्णवायाऽर्घ्यस्स्य दाने मन्त्र प्रभासखण्डे)
भक्त्या चाऽर्घ्यम् प्रदास्स्यामि देवाय परमात्मने ।
त्राहि मान् नरकाद् घोरादम्बुरूपिन् नमोऽस्तु ते ॥
तीर्थराज नमस् तुब्भ्यं रत्नाकर महार्णव ।
गोमत्त्या सहितो देव गृहाणाऽर्घ्यन् नमोऽस्तु ते ॥
(पुष्करमाहात्म्यम् महाभारते वनपर्वणि ८९।१८)
मनसाऽप्प्यभिकामस्स्य पुष्कराणि मनस्स्विन ।
विप्प्रणश्श्यन्ति पापानि नाकपृष्ठे च मोदते ॥
(नारायणसरोमाहात्म्यम् , शिवपुराणे, ब्रह्म्मपुराणादिषु च)
तत्र नारायणसरस् तीर्थम् परमपावनम् ।
सङ्गमो यत्र सञ्जातो दिव्व्यसिन्धुसमुद्द्रयो ॥
(सिन्धुसागर-सङ्गम-माहात्म्यम् , वनपर्वणि ८२।६८.६९)
सागरस्स्य च सिन्धोश् च सङ्गमम् प्राप्प्य भारत ।
तीर्थे सलिलराजस्स्य स्नात्त्वा प्रयतमानस ॥
तर्पयित्त्वा पितॄन् देवानृषींश् च भरतर्षभ ।
प्राप्नोति वारुणल्ँ लोकन् दीप्प्यमानं स्वतेजसा ॥
(सिन्धुसागर-सङ्गम-माहात्म्यम् , स्कान्दे ६।२१३।९६-९८)
द्वारकाया विनिष्क्रम्म्य साम्बोऽपि द्विजसत्तमा ।
सम्प्राप्तश् च क्रमेणाऽथ सिन्धुसागरसङ्गमम् ॥
यत्र योगीश्श्वरस् साक्षादम्बरीषप्प्रतिष्ठित ।
अद्द्याऽपि तिष्ठते विष्णुर् जन्तूनाम् पापनाशन ॥
(सिन्धुसागर-सङ्गम-माहात्म्यम् , वायवीये ब्रह्म्माण्डे च)
ब्रह्म्मतीर्थे महातीर्थे अश्श्वमेधफलल्ँ लभेत् ।
सिन्धुसागरसम्भेदे तथा पञ्चनदेऽक्षयम् ॥
(सन्धुसागर-सङ्गम-माहात्म्यम् , विष्णुधर्मोत्तरे)
पौण्डरीकश् च राजेन्द्र गङ्गासागर-सङ्गम ।
सिन्धुसागरयोश् चैव सङ्गमस् सुमनोहर ॥
(सिन्धुनदमाहात्म्यम् , शिवपुराणे १।१५४-५)
गङ्गा गोदावरी चैव कावेरी ताम्म्रपर्णिका । सिन्धुश् च सरयू रेवा सप्त गङ्गा प्रकीर्तिता ॥
(सिन्धुनदमाहात्म्यम् , विष्णुधर्मोत्तरे १।१७०।४-६)
गङ्गायास् सप्तमो भागस् सिन्धुर् नाम नदोत्तम ।
शीतलामलपानीयस् स्वर्गलोकप्प्रदायक ॥
यत्र स्नात्त्वा गतियँ यान्ति ब्राह्म्मणाश् च तपस्स्विन ।
तस्स्य तीरे वराहाऽर्चा पुराणर्षिविनिर्मिता ॥
(सिन्धुनदमाहात्म्यम् , स्कान्दे ६।१३०।५५.५६)
एषा गङ्गा वरारोहे मम मूर्द्ध्नो विनिर्गता ।
हिमवन्तन् नगम् भित्त्वा द्विधा जाता तत परम् ॥

ततस् सिन्ध्वभिधाना सा पश्चिमं सागरङ् गता ।
शतानि नव सङ्गृह्य नदीनाम् परमेश्वरि ॥
(काश्मीरमण्डलनदीमाहात्म्यम् महाभारते १३।२५८)
काश्मीरमण्डले नद्यो या पतन्ति महानदम् ।
ता नदीस् सिन्धुमासाद्य शीलवान् स्वर्गमाप्नुयात् ॥
(शतद्रु-(शरावती-)माहात्म्यम् आनुशासनिके पर्वणि १६५।१९ ,३५)
शतद्रुश् च विपाशा च चन्द्रभागा सरस्वती ।
सिन्धुश् च देविका चैवं प्रभासम् पुष्कराणि च ॥
कीर्तयानो नरो ह्य्येतान् मुच्च्यते सर्वकिल्बिषैः ।
स्तुवँश् च प्रतिनन्दँश् च मुच्च्यते सर्वतो भयात् ॥
(विपाशामाहात्म्यम् आनुशासनिके पर्वणि २५।२४)
कालिकाश्श्रममासाद्य विपाश्शायाङ् कृतोदकः ।
ब्रह्म्मचारी जितक्क्रोधस् त्रिरात्रम् मुच्च्यते भवात् ॥
विपाशायाम् पुत्त्रशोकाद् वसिष्ठो भगवानृषिः ।
बद्ध्वाऽऽत्मानन् निपतितो विपाशः पुनरुत्थितः ॥ द्र.वन. १३०।९॥
(इरावतीकीर्तनम्:, आनुशासनिके पर्वणि १४६।१८-२०)
विपाशा च वितस्ता च चन्द्रभागा इरावती ।
शतद्रूर् देविका सिन्धुः कौशिकी गौतमी तथा ॥

(चन्द्रभागामाहात्म्यम् , वीरमित्त्रोदये तीर्थप्रकाशे, पृ. १२६)
वैशाखे वरणा ख्याता चैत्त्रे पुण्ण्या सरस्वती ।
वैशाखे तु महापुण्ण्या चन्द्रभागा सरिद्वरा ॥
सप्ताहवँ वै चन्द्रभागावँ वितस्तामूर्मिमालिनीम् ।
विगाह्य वै निराहारो निर्मलो मुनिवद् भवेत् ॥ अनुशा. २५।७॥
(वितस्तामाहात्म्यम् , वनपर्वणि ८२।८९)
वितस्तां च समासाद्य सन्तर्प्य पितृदेवताः ।
नरः फलमवाप्नोति वाजपेयस्य भारत ॥

(वितस्तामाहात्म्यम् , विष्णुधर्मोत्तरे १।१६४।२३-२६)
हरस्य दयिता भार्या शैलेन्द्रतनया उमा ।
विस्तारितमहाकूला सा वितस्ता महानदी ॥
अवृत्तिकर्षितः पापङ् कृत्त्वैव ऋतुपञ्चकम् ।
स्नानेनैकेन सकलं शैशिरेण व्यपोहति ॥
यस्याङ्कस्यान् तिथौ स्नातस् स्वर्गमाप्नोत्त्यसंशयम् ॥
तस्यां सवँवत्सरं स्नात्त्वा मोक्षोपायन् तु विन्दति ॥

(सरस्वतीमाहात्म्यं स्कान्दे ७।१।३६।३, वामनपुराणे च ४२।१८-१९)
सरस्वती सर्वनदीषु पुण्ण्या सरस्वती लोकसुखावहा सदा ।
सरस्वतीम् प्राप्य सुदुखिता नरास् सदा न शोचन्ति परत्त्र चेह ॥
मातृहा पितृहा यश् च ब्रह्म्महा गुरुतल्पगः ।
स्नात्त्वा शुद्धिमवाप्नोति यत्त्र प्राची सरस्वती ॥

(नदीनाम् प्रार्थना शैशिरीयशाकलऋग्वेदसंहितायाम् १०।७५।५)
इमम् मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या।
असिक्न्या मरुद्वृधे वितस्तयाऽऽर्जिकीये शृणुह्या सुषोमया ॥
(कुरुक्षेत्रमाहात्म्यम् महाभारते शल्यपर्वणि ५३।२२)
पांसवोऽपि कुरुक्षेत्राद् वायुना समुदीरिता।
अपि दुष्कृतकर्माणन् नयन्ति परमाङ् गतिम् ॥
(कुरुक्षेत्रमाहात्म्यम्, वनपर्वणि ८३।१०५ वामनपुराणे च ३३।७)
कुरुक्षेत्रङ् गमिष्ष्यामि कुरुक्षेत्रे वसाम्म्यहम्।
अप्प्येतावँ वाचमुत्सृज्ज्य सर्वपापैः प्रमुच्च्यते ॥
(यमुनानमस्कारे मन्त्रः स्कान्दे ५।२।७१।६८)
यमुने त्वान् नमस्स्यामः कालिन्दीवँ वरवाहिनीम्।
सुता त्वम् पावनी देवी मार्तण्डस्स्य दिवस्पतेः ॥
(मथुरामाहात्म्यम्, स्कान्दे २।५।१७।१७)
चतुर्णामपि वेदानाम् पुण्ण्यमद्ध्ययनाच् च यत्।
तत् पुण्ण्यञ् जायते तत्त्र मथुरां स्मरतान् नृणाम् ॥
(केदारमाहात्म्यम्, स्कान्दे नागरखण्डे)
केदारे सलिलम् पीत्त्वा गयापिण्डम् प्रदाय च।
ब्रह्म्मज्ज्ञानमथाऽऽसाद्द्य पुनर् जन्म न विद्द्यते ॥
यो मान् दृष्ट्वा शुचिर् भूत्त्वा कुण्डमेतत् प्रपश्श्यति।
त्रिः पीत्त्वा वामसव्व्येन द्वाब्भ्याञ् चैव ततो जलम् ॥
कराब्भ्यां स पुमान् नूनन् तारयेच् च कुलत्त्रयम्।
अपि पापसमाचारन् नरकेऽपि व्व्यवस्थितम् ॥
वामेन मातृकम् पक्क्षन् दक्क्षिणेनाऽथ पैतृकम्।
उभाब्भ्यामथ चाऽऽत्मानङ् कराब्भ्याम् मद्वचो यथा ॥
(बदरीमाहात्म्यम्, स्कान्दे २।३।२।११-१२)
अन्न्यत्त्र मरणान् मुक्तिस् स्वधर्मविधिपूर्वकात्।
बदरीदर्शनादेव मुक्तिः पुंसाङ् करे स्थिता ॥
(बदरीमाहात्म्यम्, महाभारते, वनपर्वणि ९०।२८)
यत्त्र नारायणो देवः परमात्मा सनातनः।
तत्त्र कृत्स्नञ् जगत् सर्वन् तीर्थान्न्यायतनानि च ॥
(मानससरोमाहात्म्यम्, महाभारते)
आदित्त्यास् सत्त्रमासन्त सरो वै मानसम् प्रति।
वसिष्ठम् मनसा गत्त्वा ज्ञात्त्वा तत् तस्स्य गौरवम् ॥ अनु. १५५।१६॥
अत्त्रोपस्पृश्श्य सरसि श्रद्दधानो जितेन्द्रियः।
क्षीणपापश् शुभाल्ँ लोकान् प्राप्नुते नाऽत्त्र संशयः ॥वन.१३०।१६-१७॥
(बिन्दुसरोमाहात्म्यम्, वायवीये महाभारतादिषु च)
अस्त्युत्तरेण कैलासाच् छिवसत्त्वौषधो गिरिः। गौरो नाम गिरिस् तत्त्र हरितालमयश् शुभः ॥
हिरण्ण्यशृङ्गस् सुमहान् दिव्व्यो मणिमयो गिरिः।
तस्स्य पादे महद् दिव्व्यं शुभङ् काञ्चनबालुकम् ॥

रम्म्यम् बिन्दुसरो नाम यत्त्र यातो भगीरथः ।
गङ्गानिमित्तं राजर्षिरुवास बहुलास् समाः ॥

(नदीनाम् पर्वतादीनाञ् च माहात्म्यन् देवलस्मृतिस्थवँ वीरमित्रोदये तीर्थप्रकाशे, पृ. ११५)

सर्वाः समुद्द्रगाः पुण्ण्याः सर्वे पुण्ण्या नगोत्तमाः ।
सर्वमायतनम् पुण्ण्यं सर्वे पुण्ण्या वनाश्श्रमाः ॥

(कर्णालीस्नाने मन्त्रः)

सिता-तिला-जवा-भेरी-युते च सरयूङ् गते ।
कर्णालीति प्प्रसिद्धे त्त्वम् पापम् मे हर घर्घरे ॥

(गण्डकीमाहात्म्यम् , वनपर्वणि ८४।११३)

गण्डकीन् तु समासाद्द्य सर्वतीर्थजलोद्भवाम् ।
वाजपेयमवाप्नोति स्वर्गलोकञ् च गच्छति ॥

(गण्डकीमाहात्म्यम् , स्कान्दे २।२।३१।३)

गङ्गा च नर्मदा तापी यमुना च सरस्स्वती ।
गण्डकी गोमती पूर्णा एता नद्द्यस् सुपावनाः ॥

(सर्वासु गण्डकीषु स्नाने साधारणो मन्त्रः)

सप्तर्षिसन्निधौ जाते गौरीगात्त्रविनिस्सृते ।
सप्तर्षिसेविकासाक्ख्ये पापम् मे हर गण्डकि (गण्डिके) ॥

(कृष्णास्नाने मन्त्रः)

नारायणाङ्गसम्भूते सुरासुरनमस्कृते ।
कृष्णे अघौघशमनि पापम् मे हर गण्डकि ॥

(हृषीकेशमाहात्म्यम् , वाराहपुराणे अ. १४६)

रुरुतीर्थे कृतस्नानस् त्रिरात्त्रोपोषितो नरः ।
दृष्ट्वा देवं हृषीकेशम् भवेत् पूतो न संशयः ॥
ब्रह्म्महत्त्यादिपापानि ज्ञात्त्वाऽज्ञात्त्वा कृतान्न्यपि ।
यास्स्यन्ति विलयङ् क्षिप्प्रमेवमेतन् न संशयः ॥

(वैशाखमासे श्वेतिकायां स्नाने मन्त्रः)

श्वेतिके त्त्वज्जले स्नामि भक्त्या वैशाखमासके ।
दुग्धाभेऽघौघशमनि पापम् मे हर श्वेतिके ॥

(माद्द्रिकास्नाने मन्त्रः)

महेन्द्रनगसम्भूते गण्डकीक्षेत्त्रमद्ध्यगे ।
नीलाभेऽघौघशमनि पापम् मे हर माद्द्रिके ॥

(चन्द्रिकास्नाने मन्त्रः)

गौरीगुरुपदोद्भूते लोकसञ्जीवनोदके ।
कर्मदासङ्गते देवि पापम् मे हर चन्द्रिके ॥

(कर्मदास्नाने मन्त्रः)

रत्नकूटोत्सङ्गगते रत्नधारेति विश्श्रुते ।
गिरिजालकसम्भूते पापम् मे हर कर्मदे ॥

(त्रिशूलगङ्गास्नाने मन्त्रः, हिमवत्खण्डे ४६।६६)

नीलकण्ठाय रुद्द्राय जलदेवाय ते नमः ।
जलदेव्व्यै महादेव्व्यै धर्मधारे नमोऽस्तु ते ॥

(नीलकण्ठह्रदयात्रायाम् यष्टिविनायकप्रार्थना हिमवत्खण्डे ४८।३६,३७)

नमो लम्बोदरार्याय शङ्करायाऽर्तिनाशिने ।
हेरम्बाय गणेशाय रुद्द्राज्ज्ञापालिने नमः ॥
विघ्नराज नमस् तेऽस्तु शीग्घ्रन् नाशय मे श्रमम् ।
त्वत्प्रसादादहन् देव दर्शिष्य्यामि शिवं ह्रदम् ॥

(नीलकण्ठह्रदयात्रायाम् भैरवप्रार्थना, हिमवत्खण्डे ४८।४०-४२)

नमो भिन्नाञ्जनाभाय महाकायसुदंष्ट्रिणे ।
कल्पान्तकाग्निनेत्राय क्षेत्त्रपालाय वै नमः ॥
नमो भैरवदेवाय शत्त्रुब्भ्यो भयदाय च ।
नमस् त्रिशूलहस्ताय रौद्द्राय मुण्डमालिने ॥
त्वत्प्रसादाच् च देवेशन् दर्शिष्य्यामि च तद् ध्रुवम् ।
अनुज्ज्ञा दीयताम् मह्य्यं येन विग्घ्नो विनश्श्यति ॥

(नीलकण्ठह्रद(=गोरस्वामिकुण्ड-)स्नाने मन्त्र, हिमवत्खण्डपरिशिष्टे)

सर्वतीर्थजलावास देवर्षिगणसेवित ।
दर्शनेन शिवाधार पुनीहि सर्वकामद ॥

(नीलकण्ठस्तुति, हिमवत्खण्डे ४८।४६,४७)

ओन् नमो नीलकण्ठाय त्रिलोचनाय शम्भवे ।
शूलहस्ताय रुद्द्राय देवेशाय नमो नमः ॥
वृषारूढाय देवाय सर्वेश्श्वर नमोऽस्तु ते ।
निरञ्जनाय नीराय नीरप्प्रशायिने नमः ॥

(वाग्गतीमाहात्म्यम् , वाराहपुराणे २१५।५०-५१)

हिमाद्द्रेस् तुङ्गशिखरान् निस्सृता वाग्मती नदी ।
भागीरत्थ्याश् शतगुणम् पवित्त्रन् तज्जलं स्मृतम् ॥

(वाग्मतीदर्शने मन्त्र, हिमवत्खण्डपरिशिष्टे)

नमस् ते वाग्मति देवि सर्वदुष्कृतनाशिनि ।
अद्द्य मे धूलितम् पापन् दर्शनात् ते चिरार्जितम् ॥

(कौशिकीस्नाने मन्त्र, वीरमित्त्रोदये आह्निकप्प्रकाशे, पृ.२०२)

गाधिराजसुते देवि विश्श्वामित्त्रमुनेस् स्वसः ।
ऋचीकभार्ये सत्त्यार्ये पापम् मे हर कौशिकि ॥

अथ स्तोत्त्राणि

वह्न्यष्टकम् , कूर्मपुराणे २।३३।११७-१२४

नमस्स्यामि महायोगङ् कृशानुङ् गहनम् परम् । दाहकं सर्वभूतानामीशानङ् कालरूपिणम् ॥
नमस्स्ये पावकन् देवं साक्षिणवँ विश्श्वतोमुखम् । आत्मानन् दीप्तवपुषं सर्वभूतहृदि स्थितम् ॥
प्रपद्द्ये शरणवँ वह्निनम् ब्रह्म्मण्ण्यम् ब्रह्म्मरूपिणम् ।
भूतेशङ् कृत्तिवसनं शरण्ण्यम् परमम् पदम् ॥३॥
तम् प्रपद्द्ये जगन्मूर्तिम् प्रभवं सर्वतेजसाम् । महायोगेश्श्वरवँ वह्निनमादित्त्यम् परमेष्ठिनम् ॥
प्रपद्द्ये शरणं रुद्द्रम् महाग्रासन् त्रिशूलिनम् । कालाग्निर्यँ योगिनामीशम् भोगमोक्षफलप्प्रदम् ॥

प्रपद्ये त्वावँ विरूपाक्षम् भूर्भुवस्स्वस्स्वरूपिणम् ।
हिरणमये गृहे गुप्तम् महान्तममितौजसम् ॥६॥
वैश्वानरम् प्रपद्येऽहं सर्वभूतेष्ववस्थितम् । हव्यकव्व्यवहन् देवम् प्रपद्ये वह्निमीश्वरम् ॥
प्रपद्ये तत् परन् तत्त्ववँ वरेण्यं सवितुश् शिवम् ।
भर्गमग्निम् परञ् ज्योती रक्ष मां हव्व्यवाहन ॥८॥
॥ इति कूर्मपुराणे रामपत्न्युक्तवँ वह्न्यष्टकम् ॥

गणेशस्तोत्रम्

प्रणम्म्य शिरसा देवङ् गौरीपुत्त्रवँ विनायकम् । भक्तावासं स्मरेन् नित्त्यमायुकामार्थसिद्धये॥
प्रथमवँ वक्क्रतुण्डञ् च एकदन्तन् द्वितीयकम् ।
तृतीयङ् कृष्णपिङ्गाक्षङ् गजवक्त्रञ् चतुर्थकम् ॥
लम्बोदरम् पञ्चमञ् च षष्ठवँ विकटमेव च । सप्तमवँ विघ्नराजेन्द्रन् धूम्म्रवर्णन् तथाऽष्टमम् ॥
नवमम् भालचन्द्रञ् च दशमन् तु विनायकम् । एकादशङ् गणपतिन् द्वादशन् तु गजाननम् ॥
द्वादशैतानि नामानि त्रिसन्ध्ययँ यः पठेन् नरः । न च विघ्नभयन् तस्स्य सर्वसिद्धिर् भवेद् ध्रुवम् ॥
विद्यार्थी लभते विद्यान् धनार्थी लभते धनम् । पुत्त्रार्थी लभते पुत्त्रान् मोक्षार्थी लभते गतिम् ॥
जपेद् गणपतिस्तोत्रं षड्भिर् मासैः फललँ लभेत् ।
सवँवत्सरेण सिद्धिञ् च लभते नाऽत्त्र संशयः ॥
अष्टानाम् ब्राह्मणानाञ् च लिखित्त्वा यस् समर्पयेत् ।
तस्स्य विद्या भवेत् सद्यो गणेशस्स्य प्प्रसादतः ॥
॥ इति नारदपुराणे गौरीहरसवँवादे गणपतिस्तोत्रम् ॥

गायत्रीसरस्स्वतीप्रणतिः, स्कान्दे ३।१।४१।९९

चतुराननगेहिन्न्यौ जगद्धात्त्र्यौ नमाम्म्यहम् ।
विद्यास्स्वरूपे गायत्रीसरस्स्वत्त्यौ शुभे उभे ॥

लक्ष्मीस्तुतिः, विष्णुपुराणे १९।११६-११९

नमस्स्ये सर्वलोकानाञ् जननीमब्जसम्भवाम् ।
श्रियमुन्निद्रपद्माक्षीवँ विष्णुवक्षस्स्थलस्स्थिताम् ॥
पद्मालयाम् पद्मकराम् पद्मपत्त्रनिभेक्षणाम् । वन्दे पद्ममुखीन् देवीम् पद्मनाभप्प्रियामहम् ॥
त्वं सिद्धिस् त्वं स्वधा स्स्वाहा सुधा त्त्वलँ लोकपावनी ।
सन्ध्या रात्त्रिः प्रभा भूतिर् मेधा श्रद्धा सरस्स्वती ॥
यज्ञविद्या महाविद्या गुह्य्यविद्या च शोभने ।
आत्मविद्या च देवि त्त्ववँ विमुक्तिफलदायिनी ॥

देवीस्तुतिः, सप्तशत्त्याम्

त्वयैतद् धार्यते विश्श्वन् त्वयैतत् सृज्ज्यते जगत् ।
त्वयैतत् पाल्ल्यते देवि त्वमत्स्यन्ते च सर्वदा ॥
शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके । घण्टास्स्वनेन नः पाहि चापज्ज्यानिस्स्वनेन च ॥
नमो देव्व्यै महादेव्व्यै शिवायै सततन् नमः । नमः प्रकृत्त्यै भद्रायै नियताः प्रणताः स्म ताम् ॥
सर्वस्स्य बुद्धिरूपेण जनस्स्य हृदि संस्थिते । स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥

शरणाऽऽगतदीनाऽऽर्तपरित्त्राणपरायणे । सर्वस्स्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥
सर्वस्स्वरूपे सर्वेशे सर्वशक्तिसमन्न्विते । भयेब्भ्यस् त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥
देवि प्प्रसीद परिपालय नोऽरिभीतेर् नित्त्ययँ यथाऽसुरवधादधुनैव सद्द्य ।
पापानि सर्वजगताम् प्रशमन् नयाऽऽशु उत्पातपाकजनिताँश् च महोपसर्गान् ॥

विष्णुस्तोत्त्रम्

शान्ताकारम् भुजगशयनम् पद्मनाभं सुरेशवँ
विश्श्वाधारङ् गगनसदृशम् मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तङ् कमलनयनयँ योगिभिर् ध्यानगम्म्यवँ
वन्दे विष्णुम् भवभयहरं सर्वलोकैकनाथम् ॥

सूर्यस्तोत्त्रम्

साम्ब उवाच-

आदिदेव नमस् तुब्भ्यम् प्रसीद मम भास्कर । दिवाकर नमस् तुब्भ्यम् प्रभाकर नमोऽस्तु ते ॥
सप्ताश्श्वरथमारूढम् प्रचण्डङ् कश्श्यपात्मजम् । श्श्वेतपद्मधरन् देवन् तं सूर्यम् प्रणमाम्म्यहम् ॥
लोहितं रथमारूढं सर्वलोकपितामहम् । महापापहरन् देवन् तं सूर्यम् प्रणमाम्म्यहम् ॥
त्रैगुण्ण्यञ् च महाशूरम् ब्रह्म्मविष्णुमहेश्श्वरम् । महापापहरन् देवन् तं सूर्यम् प्रणमाम्म्यहम् ॥
बृंहितन् तेजःपुञ्जञ् च वायुमाकाशमेव च । प्रभुञ् च सर्वलोकानान् तं सूर्यम् प्रणमाम्म्यहम् ॥
बन्धूकपुष्पसङ्काशं हारकुण्डलभूषितम् । एकचक्क्रधरन् देवन् तं सूर्यम् प्रणमाम्म्यहम् ॥
तं सूर्यम् भवकर्तारम् महातेजप्रदीपनम् महापापहरन् देवन् तं सूर्यम् प्रणमाम्म्यहम् ॥
तं सूर्यञ् जगतान् नाथञ् ज्ञानविज्ज्ञानमोक्क्षदम् । महापापहरन् देवन् तं सूर्यम् प्रणमाम्म्यहम् ॥
सूर्याष्टकम् पठेन् नित्त्यङ् ग्रहपीडाप्रणाशनम् । अपुत्त्रो लभते पुत्त्रन् दरिद्द्रो धनवान् भवेत् ॥
(स्त्रीतैलमधुमांसानि यस् त्यजेत् तु रवेर् दिने । अव्व्याधिशोकदारिद्द्र्यस् सूर्यलोकं स गच्छति ॥)

शिवमानसपूजास्तोत्त्रम्

रत्नैः कल्पितमासनं हिमजलैस् स्नानञ् च दिव्व्याम्बरन्
नानारत्नविभूषितम् मृगमदामोदाङ्कितञ् चन्दनम् ।
जातीचम्पकबिल्ल्वपत्त्ररचितम् पुष्पञ् च धूपन् तथा
दीपन् देव दयानिधे पशुपते हृत्कल्पितङ् गृह्म्यताम् ॥
सौवर्णे मणिरत्नखण्डरचिते पात्त्रे घृतम् पायसम्
भक्क्ष्यम् पञ्चविधम् पयोदधियुतं रम्भाफलम् फाणितम् ।
शाकानामयुतञ् जलं रुचिकरङ् कर्पूरखण्डोज्ज्वलन्
ताम्बूलम् मनसा मया विरचितम् भक्त्या प्रभो स्वीकुरु ॥
छत्त्रञ् चामरयोर् युगवँ व्यजनके चाऽऽदर्शकन् निर्मलवँ
वीणाभेरिमृदङ्गकाहलकलागीतञ् च नृत्त्यन् तथा ।
साष्टाङ्गप्प्रणतिस् स्तुतिर् बहुविधा ह्येतत् समस्तम् मया
सङ्कल्पेन समर्पितन् तव विभो पूजाङ् गृहाण प्प्रभो ॥
आत्मा त्त्वङ् गिरिजा मतिस् सहचराः प्राणाश् शरीरङ् गृहम्
पूजा ते विषयोपभोगरचना निद्द्रा समाधिस्स्थितिः ।

सञ्चारः पदयोः प्रदक्षिणविधिस् स्तोत्त्राणि सर्वा गिरो
यद्यत् कर्म करोमि तत्तदखिलं शम्भो तवाऽऽराधनम् ॥
करचरणकृतवँ वाक्कायजङ् कर्मजवँ वा श्रवणनयनजवँ वा मानसवँ वाऽपराधम् ।
विहितमविहितवँ वा सर्वमेतत् क्षमस्स्व जयजय करुणाब्धे श्रीमहादेव शम्भो ॥
(त्रिदलन् त्रिगुणाकारन् त्रिनेत्त्रञ् च त्रियायुधम् ।
त्रिजन्मपापसंहारमेकबिल्ल्वं शिवार्पणम् ॥)

स्कन्दस्तोत्रम् (स्वामिकार्त्तिकेयस्तोत्त्रम्) भविष्यपुराणे ४।४२।९

देवसेनापते स्कन्द कार्त्तिकेय भवोद्भव ।
कुमार गुह गाङ्गेय शक्तिहस्त नमोऽस्तु ते ॥

ब्रह्म्म-विष्णु-महेश्वर-स्तोत्त्रम्

शुक्लाम्बरङ् कृष्णमृगाजिनाङ्कितं सुकूर्चकवँ विश्श्वसृजञ् चतुर्मुखम् ।
कुसुम्भदण्डस्स्रुवदर्भहस्तकं सरस्स्वतीशङ् कमलासनम् भजे ॥
सशङ्खचक्क्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षस्स्थलकौस्तुभश्श्रियन् नमामि विष्णुं शिरसा चतुर्भुजम् ॥
कर्पूरगौरङ् करुणावतारं संसारसारम् भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवम् भवानीसहितन् नमामि ॥

परब्ब्रह्म्मस्तोत्त्रम् भागवते ४।९।१६,१२।१२।६७

यस्मिन् विरुद्धगतयो ह्यनिशम् पतन्ति विद्याादयो विविधशक्तय आनुपूर्व्यात् ।
तद् ब्रह्म्म विश्श्वभवमेकमनन्तमाद्यमानन्दमात्त्रमविकारमहम् प्रपद्ये ॥
उपचितनवशक्तिभिस् स्व आत्मन्युपरचितस्स्थिरजङ्गमालयाय ।
भगवत उपलब्धिमात्त्रधाम्ने सुरऋषभाय नमस् सनातनाय ॥

सप्तश्लोकीगीता

ओमित्त्येकाक्षरम् ब्रह्म्म व्याहरन् मामनुस्स्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमाङ् गतिम् ॥
स्थाने हृषीकेश तव प्प्रकीर्त्या जगत् प्रहृष्य्यत्त्यनुरज्ज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्स्यन्ति च सिद्धसङ्घाः ॥
सर्वतःपाणिपादन् तत् सर्वतोऽक्षिशिरोमुखम् ।
सर्वतश्श्रुतिमल् लोके सर्वमावृत्त्य तिष्ठति ॥
कविम् पुराणमनुशासितारमणोरणीयांसमनुस्मरेद् यः ।
सर्वस्स्य धातारमचिन्त्यरूपमादित्त्यवर्णन् तमसः परस्तात् ॥
ऊर्ध्वमूलमधश्शाखमश्श्वत्थम् प्राहुरव्व्ययम् ।
छन्दांसि यस्स्य पर्णानि यस् तवँ वेद स वेदवित् ॥
सर्वस्स्य चाऽहं हृदि सन्निविष्टो मत्तस् स्मृतिर् ज्ञानमपोहनञ् च ।
वेदैश् च सर्वैरहमेव वेद्यो वेदान्तकृद् वेदविदेव चाऽहम् ॥
मन्मना भव मद्भक्तो मद्याजी मान् नमस्कुरु ।
मामेवैष्य्यसि युक्त्वैवमात्मानम् मत्परायणः ॥

चतुश्श्लोकीभागवतम् भागवते २।९।३०-३६

श्रीभगवानुवाच-

ज्ञानम् परमगुह्यम् मे यद् विज्ञानसमन्वितम् ।
सरहस्यन् तदङ्गञ् च गृहाण गदितम् मया ॥
यावानहयँ यथाभावो यद्रूपगुणकर्मक । तथैव तत्त्वविज्ञानमस्तु ते मदनुग्ग्रहात् ॥
अहमेवाऽऽसमेवाऽग्ग्रे नाऽन्यद् यत् सदसत्परम् ।
पश्चादहयँ यदेतच् च योऽवशिष्येत सोऽस्म्यहम् ॥
ऋतेऽर्थयँ यत् प्रतीयेत न प्प्रतीयेत चाऽऽत्मनि ।
तद् विद्द्यादात्मनो मायायँ यथाऽऽभासो यथा तम ॥
यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु । प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥
एतावदेव जिज्ज्ञास्यन् तत्त्वञ् जिज्ज्ञासुनाऽऽत्मन ।
अन्वयव्व्यतिरेकाब्भ्यायँ यत् स्यात् सर्वत्त्र सर्वदा ॥
एतन् मतं समातिष्ठ परमेण समाधिना । भवान् कल्पविकल्पेषु न विमुह्यति कर्हि चित् ॥

(डोटिशिलागडिकास्थ-)शैलेश्श्वरीस्तोत्त्रम् (सिद्धराजजोसिप्रकाशितम्)

ब्रह्मोवाच-

नमामि मूर्द्ध्ना च गिरा च कर्मणा गिरीन्द्रजायापदपङ्कजद्द्वयम् ।
यन्मायायाऽजोऽपि विमोहितश् चिरन् नोऽद्द्यापि जानाति च कुत्र ते सुरा ॥
या देवदैत्त्योरगयक्षकिन्नरैर् नरैर् मुनीन्द्रै परिसेविता सदा ।
भुक्त्यै विमुक्त्यै च सुरेश्श्वरीम् परां शैलेश्श्वरीन् नौमि शिवाभिलालिताम् ॥
स्फुरन्मणीन्द्रोज्ज्वलकुण्डलोल्लसद्-गण्डस्थलां रत्नकिरीटमण्डिताम् ।
बन्धूकवर्णामरुणाम्बराम् परां शैलेश्श्वरीन् नौमि शिवाभिलालिताम् ॥
शुम्भादिदैत्त्यौघविनाशकारिणीम् पाशाङ्कुशाभीतिवरोल्लसत्कराम् ।
लज्जातपोत्साहवतां सुसिद्धिदां शैलेश्श्वरीन् नौमि शिवाभिलालिताम् ॥
यदंशलेशोद्भवसत्तया जगत् सृजाम्म्यहम् पाति हरिर् हरत्त्यज ।
यदङ्घ्रिसेवाप्तवरास् सुरास् तां शैलेश्श्वरीन् नौमि शिवाभिलालिताम् ॥
या दक्षिणा कामकला च गुह्यका योग्ग्रा च नीलैकजटाभिधा स्वयम् ।
या षोडशी पञ्चदशी च बाला शैलेश्श्वरीन् नौमि शिवाभिलालिताम् ॥
याऽनन्तरूपाऽपि दशस्वरूपिणी त्रिशक्तिरूपा गुणभेदतोऽभवत् ।
या कुल्लुका शक्तिविभेदतस् स्वयं शैलेश्श्वरीन् नौमि शिवाभिलालिताम् ॥
स्त्रीपुंस्वरूपेण विसृज्ज्य या जगद् भूमिस्स्वरूपेण बिभर्ति तत् पुन ।
जलस्स्वरूपेण च जीवयत्त्यजा शैलेश्श्वरीन् नौमि शिवाभिलालिताम् ॥
यायँ योगिनो योगसमाधिना पराम् पश्श्यन्त्यरूपामपि चित्स्वरूपिणीम् ।
तावँ वाङ्मनोऽगोचररूपिर्णीं सतीं शैलेश्श्वरीन् नौमि शिवाभिलालिताम् ॥

स्कन्द उवाच-

इत्थं स्तुता जगद्धात्री ब्रह्मणा परमेष्ठिना । प्रत्त्यक्षमभवत् तत्त्र वामभागे महेशितु ॥
रक्ताम्बरा त्रिनयना नानारत्नौघमण्डिता । वरदानोन्मुखी साक्षाद् भानुकोटिसमप्प्रभा ॥

॥ इति शैलेश्श्वरीस्तोत्त्रं समाप्तम् ॥

अच्छामगण्डलस्थवैद्यनाथप्रणतिः

पूर्वोत्तरे प्रज्ज्वलिकानिधाने सदा वसन्तङ् गिरिजासमेतम् ।
सुराऽसुराऽऽराधितपादपद्मं श्रीवैद्यनाथन् तमहन् नमामि ॥

ज्वालादेवीस्तोत्त्रम् , हिमवत्खण्डपरिशिष्टे

भगवति भवबन्धव्व्यापृतञ् ज्ञानशून्न्यवँ विविधविषयचिन्ताजर्जरन् तापतप्तम् ।
अतनुतनुवनोत्थं शुष्कहृत्काष्ठमेतत् तव विमलशिखाग्ग्रे ज्वालिके सञ्जुहोमि ॥
सपदि कलुषवृन्दञ् जन्मजन्मान्तरोत्थयँ यदिह मम शरीरे विद्यते देवि सर्वम् ।
दहदह कुरु सद्द्यो भस्मसात् तत् समन्तान् निजविमलशिखाभिस् सर्वतो विस्तृताभिः ॥
हरनिटिलनिवासे दिव्व्यदीप्तिप्प्रकाशे भगवति मयि दासे चारुहासे प्रसीद ।
नहि जननि जगत्त्यालँल्लक्षये व्यक्तरूपाङ् कलुषदहनदीक्षाबद्धकक्षान् त्वदन्न्याम्॥
त्वमसि शमनरूपा देवि कल्पावसाने मदनदहनकाले शाम्भवी दिक् कराला ।
दशरथसुतसत्त्रे त्वं सवित्त्रीप्सितस्स्य न हि तव परमार्थवँ वेत्ति रूपस्स्य कोऽपि ॥
कलुषनिवहहन्त्रीन् दुर्लभाद्द्रौ वहन्तीन् निजरुचिरशिखाभिस् सर्वदोषान् धमन्तीम् ।
सततशिशिरनीरप्प्रोच्चधाराभिरामाङ् गिरिगहनगुहाब्भ्यो निस्सृतान् त्वान् नमामि ॥
यश् श्लोकपञ्चकमिदं शिखिनस् समीपे स्थित्त्वा च दुर्लभगिरौ प्रयतः पठेत ।
तस्स्य प्प्रसीदतितराञ् ज्वलनस्स्य शक्तिर् ज्वालात्मिका भगवती भवभीतिहन्त्री ॥
विद्यां श्रियवँ विपुलसौक्ख्यमनन्तकीर्तिं सौभाग्ग्य-सन्ततिसुखञ् चिरजीविताञ् च ।
तस्मै ददाति सततं स्तुतिभिः प्रसन्ना भक्ताय भव्व्यनिलयाय निजाश्श्रिताय ॥
भूतप्प्रेतपिशाचेब्भ्यो दुर्ग्रहेब्भ्यस् तथैव च ।
न भयवँ विद्यते तस्स्य ज्वालायँ यस् स्तौति भक्तितः ॥
दुर्विनीताय दुष्टाय नास्तिकाय शठाय च । न देयं स्तोत्त्रमेतद् धि ज्वालादेव्व्याः कथञ्चन ॥

मुक्तिनाथस्तुतिः , हिमवत्खण्डपरिशिष्टे

शैलराजशिखरेऽ*सितासरित्*-सन्निधौ धवलभासि भास्स्वरम् ।
भुक्तिमुक्तिपरिशीलिनाम् भजे मुक्तिनाथमिह मुक्तिदायकम् ॥
प्रज्ज्वलज्ज्वलनकीलसम्मिलत्-सज्जला-ऽच्छतम-धारयोज्ज्वलम् ।
उज्ज्वलीकृतसमस्तभूधरम् मुक्तिनाथमज मुक्तिदायकम् ॥
कृष्णगण्डकसरिच्छिरोगिरौ कृष्णगण्डकशिलाकुलाकुले ।
देवदानवकुलार्च्यमर्चये मुक्तिनाथमिह मुक्तिदायकम् ॥
शोकतापहतलोकमाश्श्रितं संसृतेस् सकलबन्धनात् क्षणात् ।
मोचयन्तमहमाश्श्रयामि तम् मुक्तिनाथमिह मुक्तिदायकम् ॥
पञ्चभूतपरिपञ्चपञ्जरे पञ्चधापतितदेहिदेशिकम् ।
पञ्चदेवपरिषत्प्रभुम् भजे मुक्तिनाथमिह मुक्तिदायकम् ॥
मुक्तिपञ्चकमिदवँ विमुक्तये मुक्तिनाथपदभक्तिशालिनाम् ।
पञ्चपातक-विमुक्ति-साधनम् पञ्चकोषकृतदोषमोषकम् ॥
स्तवनम् मुक्तिनाथस्स्य मुक्तिनाथेन योगिना ।
निर्मितम् मुक्तिकामैश् च सेव्व्यम् पञ्चजनैस् सदा ॥

गुह्ये्येश्वरीस्तोत्रम् , हिमवत्खण्डे ८२।२१-२४

मातर् देवि नमस् तेऽस्तु भवान्न्यै सततन् नमः ।
अव्यक्तायै अलक्षायै व्यक्ताव्यक्तस्वरूपिणि ॥
कात्त्यायन्न्यै कलाधात्त्र्यै अम्बिकायै शिवे नमः । मायायै गतमायायै मायामोहितसंहरे ॥
जगदैश्श्वर्यरूपाय्यै जगन्मोहिनि ते नमः ।
गुह्य्याक्ख्यायै च रौद्द्रायै गुह्य्येश्श्वरि नमोऽस्तु ते ।
वरन् देहि च नो मातर् येन द्रक्ष्यामहे विभुम् ॥

पशुपतिस्तोत्रम् , हिमवत्खण्डपरिशिष्टे

शङ्कर त्त्रिदशनाथ दयालो भाललोचन हर त्त्रिपुरारे ।
अच्च्युताऽव्यय कलाधरमौले मानसम् पशुपते हर दुखम् ॥
कालकाल करुणामय शूलिन् कान्तकाय कलिनाशनमूर्ते ।
कालकूटकलितासितकण्ठ मानसम् पशुपते हर दुखम् ॥
केशवप्प्रिय पिशङ्गकपर्दिन् पार्वतीश्श्वर पिनाकधरेश ।
मन्मथप्प्रमथ कामविकाशिन् मानसम् पशुपते हर दुखम् ॥
कुन्द-हीरक-सुधाकर-गौर निष्कलङ्क निखिलागमवेद्द्य ।
त्र्यक्ष निर्गुण गुणेश्श्वर जिष्णो मानसम् पशुपते हर दुखम् ॥
पुण्यकीर्तन पुराण पुरारे पूर्णरूप पुरुषोत्तम पुण्य्य ।
पञ्चवक्त्र पुरुषप्प्रमथेन्द्र मानसम् पशुपते हर दुखम् ॥
भोगिभूषणविभूषितभोग भूतिशोभिततनो हरिकेश ।
भक्त-हृत्-कमल-वेश्म-निवासिन् मानसम् पशुपते हर दुखम् ॥
शुद्धभाव-नतकन्धर-लोक-वृन्द-वाञ्छित-फलप्प्रद शम्भो ।
सृष्टिपालनलयैकनिदान मानसम् पशुपते हर दुखम् ॥
दुष्टनिर्दलन निर्जर देव स्वर्णदीभुवनशेखर शर्व ।
वामदेव मतिगम्म्य महात्मन् मानसम् पशुपते हर दुखम् ॥
शङ्कराष्टकमिदं सुमनोज्ज्ञं रोगशोककलहार्तिविनाशम् ।
यः पठेत् सकलवाञ्छितसिद्धिस् तस्स्य तुष्य्यति च शङ्करदेवः ॥

जनकपुरस्थजानकीसहितरामस्तोत्त्रम्

रामाय रामभद्द्राय रामचन्द्राय वेधसे । रघुनाथाय नाथाय सीतायापतये नमः ॥
श्रीराम राम रघुनन्दन रामराम श्रीराम राम भरताग्ग्रज रामराम ।
श्रीराम राम रणकर्कश रामराम श्रीराम राम शरणम् भव रामराम ॥
श्रीरामचन्द्रचरणौ मनसा स्मरामि श्रीरामचन्द्रचरणौ वचसा गृणामि ।
श्रीरामचन्द्रचरणौ शिरसा नमामि श्रीरामचन्द्रचरणौ शरणम् प्रपद्द्ये ॥
माता रामो मत्पिता रामचन्द्र स्वामी रामो मत्सखा रामचन्द्र ।
सर्वस्स्वम् मे रामचन्द्रो दयालुर् नान्य्यग् जाने नैव जाने न जाने ॥
लोकाऽभिरामं रणरङ्गधीरं राजीवनेत्त्रं रघुवंशनाथम् ।
कारुण्य्यरूपङ् करुणाकरन् तं श्रीरामचन्द्रं शरणम् प्रपद्द्ये ॥
आपदामपहर्त्तारन् दातारं सर्वसम्पदाम् । लोकाऽभिरामं श्रीरामम् भूयोभूयो नमाम्म्यहम् ॥

भर्जनम् भवबीजानामर्जनं सुखसम्पदाम्। तर्जनयँ यमदूतानां रामरामेति गर्जनम्॥
दक्षिणे लक्ष्मणो यस्स्य वामे तु जनकात्मजा।
पुरतो मारुतिश् चैव तवँ वन्दे रघुनन्दनम्॥

(कोकामुख-)वराहक्षेत्त्रस्थ-वराह-स्तोत्त्रम्, हिमवत्खण्डे ३५।१३-२२

नीलमेघाभदेवाय वराहाय नमोनमः। तडिद्विलेखकाङ्गाय नतास् स्मस् तेऽनिशं हरे॥
सितोग्ग्रदंष्ट्ररूपाय चक्क्राक्षाङ्कितशोभिने। सूर्यभदृग्वराहाय प्रणतास् स्मो हि सन्ततम्॥
वेदाङ्गपादयूपस्स्य दर्भरोमाङ्कदेहिन। अग्निजिह्व्वस्स्य देवस्स्य नतास् स्मश् चरणे तव॥
तुण्डस्स्रुवाज्ज्यनासाय सामघोषाय ते नमः। मन्त्रसन्ध्यञ्चिताङ्गाय यज्ज्ञरूपाय वै नमः॥
त्रैलोक्क्योद्धारणार्थाय एतद् रूपवँ विधारिणे। पवित्त्राङ्गावताराय नतास् स्मः परमाय च॥
देहाय देहिने देहाश्श्रितसत्त्वाय शम्भवे। चैतन्न्याय विवेकाय जगतां साक्षिणे नमः॥
कोषस्स्थाय च कोषाय वर्णरूपाय वै नमः। अनाहताय नादाय सर्वनादाय ते नमः॥
मनोधीचित्तकोषांशोज्जृम्भकेन्द्रियवर्ष्मिणे। सच्चैतन्न्यदृढाविद्द्यानिवर्त्यानन्दकारिणे॥
ब्रह्म्मानन्दाय पूर्णाय सदानन्दाय वै नमः। कैवल्ल्यानन्दरूपाय चिदानन्दाय ते नमः॥
यस्स्य दर्शनमात्त्रेण कैवल्ल्यम् प्राप्प्य वै नराः।
नित्त्यानन्दम् प्राप्नुवन्ति तस्मै देवाय ते नमः॥

नवग्ग्रहस्तोत्त्रम्

जपाकुसुमसङ्काशङ् काश्श्यपेयम् महाद्युतिम्।
तमोऽरिं सर्वपापग्घ्नम् प्रणतोऽस्मि दिवाकरम्॥
दधिशङ्खतुषाराभङ् क्षीरोदार्णवसम्भवम्। नमामि शशिनं सोमं शम्भोर् मुकुटभूषणम्॥
धरणीगर्भसम्भूतवँ विद्द्युत्कान्तिसमप्प्रभम्।
कुमारं शक्तिहस्तन् तम् मङ्गलम् प्रणमाम्म्यहम्॥
प्रियङ्गुकलिकाश्यामं रूपेणाऽप्प्रतिमम् बुधम्।
सौम्म्यं सौम्म्यगुणोपेतन् तम् बुधम् प्रणमाम्म्यहम्॥
देवानाञ् च ऋषीणाञ् च गुरुङ् काञ्चनसन्निभम्।
बुद्धिभूतन् त्रिलोकेशन् तन् नमामि बृहस्पतिम्॥
हिमकुन्दमृणालाभन् दैत्त्यानाम् परमङ् गुरुम्। सर्वशास्त्रप्रवक्तारम् भार्गवम् प्रणमाम्म्यहम्॥
नीलाञ्जनसमाभासं रविपुत्त्रयँ यमाग्ग्रजम्। छायामार्तण्डसम्भूतन् तन् नमामि शनैश्चरम्॥
अर्धकायम् महावीर्यञ् चन्द्रादित्त्यविमर्दनम्। सिंहिकागर्भसम्भूतन् तं राहुम् प्रणमाम्म्यहम्॥
पलाशपुष्पसङ्काशन् तारकाग्ग्रहमस्तकम्।
रौद्द्रं रौद्द्रात्मकङ् घोरन् तङ् केतुम् प्रणमाम्म्यहम्॥
इति व्यासमुखोद्गीतयँ यः पठेत् सुसमाहितः।
दिवा वा यदि वा रात्त्रौ विघ्नशान्तिर् भविष्ष्यति॥
नरनारीनृपाणाञ् च भवेद् दुस्स्वप्ननाशनम्। ऐश्श्वर्यमतुलन् तेषामारोग्ग्यम् पुष्टिवर्धनम्॥
ग्रहनक्षत्त्रजाः पीडास् तस्कराग्निसमुद्भवाः।
तास् सर्वाः प्रशमयँ यान्ति व्यासो ब्रूते न संशयः॥

अथ प्रकीर्णकम्

(माध्यन्दिनीयवाजसनेयिनान् तर्पणे पिण्डदाने च पितृक्रम)

पिता पितामहश् चाऽथ प्रपितामह एव च । माता पितामही चैव ततश्च प्रपिताही ॥
ततस् सपत्नमाता च तर्पणीयेति के चन । नैवम् माद्ध्यन्दिनीयानान् तच्छ्रुते प्रातिकूल्यत ॥
पित्रादितर्पणादेव तस्स्यतस्याऽनुगा अपि । मात्रादयस् तर्पितास् स्युर् न स्स्यात् तत्तर्पणम् पृथक् ॥
पितृत्रिकात् परन् तर्प्यास्त्रियो मातामहादय । तत आचार्यश्च विद्द्यागुरुश् शिष्य्यस् तत परम् ॥
ऋत्त्विक् ततस् तु पत्नी च पुत्र पुत्री यथाक्रमम् । तत पितुश्च स्वस्स्याऽपि भ्रातरश् च तत परे ॥
श्वशुरश् च सखा चैव मातुलो भागिनेयक । पितुर् मातुश् च स्वस्याऽपि भगिन्यश् च तत परम् ॥
अन्येऽप्याप्तास् तर्पणे स्युस् तर्प्या तीर्थे महालये । स्वसूत्रोक्तिबलादेवङ् कार्यम् माद्ध्यन्दिनीयकै ॥

(कालज्ञानादिकम्)

महाकल्पश् च कल्पश् च मन्वन्तरमत परम् । महायुगयँ युगञ् चाऽऽर्षयुगं स्यु कालखण्डका ॥
तत्र वर्षञ् चाऽयनञ् च ऋतुर् मासश् च पक्षक । दिनञ् चेति प्रसिद्धो ऽस्ति षोढा कालो जनेषु च ॥
महाकल्पस् तु ब्रह्म्मायुर् ब्राह्म्मवर्षशतात्मकम् । स्याच् चतुर्दशभिर् मन्वन्तरै कल्पो विधेर् दिनम् ॥
मन्वन्तरं ससन्ध्यांशा चतुर्युग्ग्येकसप्तति । महायुगं सत्त्यत्रेताद्वापरै कलिनाऽपि च ॥
मितम् मानुषवर्षाणाञ् चतुर्भिर् लक्षकैस् तथा । द्वात्रिंशता सहस्रैश्च बुधै कलियुगं स्मृतम् ॥
द्विगुणन् द्वापरयुगङ् कलेस् त्रेतायुगम् पुन । त्रिगुणं स्यात् सत्त्ययुगञ् चतुर्गुणमिति स्थिति ॥

(वेदाङ्गज्योतिषकार-लगधमुनि-प्रतिपादित-पञ्चाब्दयुगद्वादशयुगायनमासदिनादिकम्)

युगमार्षं हि पञ्चाब्दम् ब्रह्म्मगुप्तादिजल्पितै । नाऽनार्षैर् बाद्ध्यते धर्मे परम् मानमृषिर् यत ॥
सवँवत्सरस् तु प्रथमो द्वितीय परिवत्सर । ततश् चेदावत्सरश् च तुर्य इद्वत्सरश् श्रुत ॥
वत्सर पञ्चमोऽब्दस् स्यात् पञ्चाब्दस्स्य युगस्स्य च । तेषावँ विपरिवर्तेश् च युगद्द्वादशकं स्मृतम् ॥
वैष्णवम् प्रथमन् तत्र बार्हस्पत्त्यन् तत परम् । ऐन्द्रमाग्नेयञ्च त्वाष्ट्रमाहिर्बुध्न्यञ् च पित्र्यकम् ॥
वैश्वदेवञ् च सौम्यञ् च ऐन्द्राग्नञ् चाऽऽश्विनन् तथा । भाग्ग्यञ् चेति द्द्वादशैव युगानि कथितानि हि ॥
"स्वराक्रमेते सोमार्कौ यदा साकं सवासवौ । स्यात् तदाऽऽदियुगम् माघस् तपश् शुक्लोऽयनं ह्युदक् ॥"
बार्हस्पत्त्ये षष्टिवर्षे युगद्द्वादशकात्मके । काले सवँवत्सराद्द्यास् तु प्रभवाद्द्या प्रकीर्तिता ॥
बार्हस्पत्त्यास् तु प्रभवादयो माघादिका मता । चान्द्रास् ते चैत्रशुक्लाद्द्या इति के चित् प्रचक्षते ॥
सावनश्चाऽथ चान्द्रश्च सौरो नाक्षत्त्र एव च । बार्हस्पत्त्यश्चाऽपि कालो वत्सराद्द्यो बुधैस् स्मृत ॥
वैदिकानान् तु वर्षादि सौरचान्द्रम् प्रकीर्तितम् । अयनवँ विषुवं सूर्यान् मासञ् चन्द्राच् च लक्षयेत् ॥
आर्यावर्ते तु मद्ध्याह्न्नेऽहस्सु दीर्घतमा यदा । शङ्कोश् छाया ततस् सूर्य प्राप्नुयादुत्तरायणम् ॥
आर्यावर्ते हि मद्ध्याह्न्नेऽहस्सु ह्रस्वतमा यदा । शङ्कोश् छाया ततस् सूर्य प्राप्नुयाद् दक्षिणायनम् ॥
समता स्याद् यदा रात्रेरह्न्नश् चाऽपि प्रमाणत । तङ् कालवँ विषुववँ विद्द्याद् वसन्तशरदोस् सदा ॥
चौडन् तथोपनयनवँ विवाहञ् चेतराश् शुभा । क्रियास् सर्वा हि कुर्वीत सूर्ये चोदङ्मुखे सति ॥
सूर्यस्स्योदङ्मुखीभावात् स्फुटयँ याऽमावसी परा । तस्स्यान् तु पूर्णे मासे हि प्रवृत्तवँ वर्षमिष्य्यते ॥
तस्स्य मासस्स्य या शुक्ला प्रतिपत् तत एव च । इज्ज्यार्थवँ वर्षमयनमृतुर् मासश् च गण्यते ॥
तत्राऽयनञ् चोत्तरं स्स्यादृतुश् च शिशिरो भवेत् । तपास् सौरे नाम्नि मासो माघश् चान्द्रे प्रकीर्तित ॥
तपस्-तपस्स्यौ च मधु-माधवौ शुक्रकश् शुचि । नभो-नभस्स्यौ चेषोर्जौ सहाश् चैव सहस्स्यक ॥
सौरनाम्ना त्त्विमे मासा वेदमन्त्रेषु कीर्तिता । चान्द्रनाम्ना च माघाद्द्या ब्राह्म्मणादिषु च श्श्रुता ॥
मघायुक्ता पौर्णमासी माघी मासे तु यत्र सा । नाम्ना स माघ एवं स्यात् फाल्गुनश् च तथा परे ॥
चैत्रो वैशाखश् च ज्येष्ठ आषाढश् श्रावणोऽ पि च । भाद्द्र आश्श्वयुजश् चाऽपि कार्त्तिको मार्ग-पौषकौ ॥
एकस्मिन्नयने सप्त दर्शा वर्षे त्रयोदश । यदा दर्शे सप्तमे तु पूर्णो मासस् तदाऽधिक ॥
तत्राऽनन्यगतिङ् कुर्यान् नित्त्यान् नैमित्तिकीङ् क्रियाम् । नत्वारभेत विबुध काम्म्ययज्ञव्रतादिकम् ॥
चन्द्रस्स्याऽदर्शनाच् चैव यावदन्यददर्शनम् । मासश् चन्द्रमितस् तस्स्य शुक्ल-कृष्णौ तु पक्षकौ ॥
आपूर्यमाणे चन्द्रे च विवाहादि प्रकीर्तितम् । दैवञ् च कर्माऽथ क्षीय-माणे क्षीणे च पित्र्यकम् ॥
शिशिरश् च वसन्तश् च ग्रीष्मो वर्षास् तथा शरत् । हेमन्तश् चेति ऋतव क्रमान् मासद्द्वयात्मका ॥

पुत्त्रोद्वाहात् परम् पुत्त्रीविवाहन् न ऋतुत्त्रये । न मण्डनान् मुण्डनञ् च कुर्यान् नो मङ्गलत्त्रयम् ॥
न विवाहाद् व्रतन् तुल्ल्या त्रिया शोदरयोर् न च । न मङ्गलन्लँ लघु ज्ज्येष्ठात् परन् नाऽब्दे गृहोद्वहौ ॥
वर्षाणामपि पञ्चानामाद्यस् सर्व्वँत्सरश् श्रुतः । उत्तरञ् चाऽय्ययनयोर् ऋतूनां शिशिरस् तथा ॥
मासानाम् माघ एव स्स्यात् पक्षयोश् शुक्ल एव च । तिथीनाम् प्रतिपच् चाह्न्नो रात्त्रेश् चाऽप्यहरेव च ॥
तिथिश् च करणम् भञ् च योगोऽथो वासराधिपः । दिनरूपस्स्य कालस्स्य पञ्चाऽङ्गानि विदुर् वुधाः ॥
सूर्योदयात् प्रभृति च यावत् सूर्योदयम् परम् । कालस् तत् सावनदिनवँ वैदिकै परिकीर्तितम् ॥

प्रातःकालस् सङ्गवश् च मद्ध्याह्न्नश् चाऽपराह्ण्णकः ।
सायाह्न्नश् चेति कथिता मुक्ख्या भागा दिनस्स्य च ॥

प्रहरस् तु चतुर्थो हि भागोऽह्न्नश् च निशो ऽपि च । विभागो नैष वेदेषु वेदाङ्गेष्ब्वपि वाऽऽश्रितः ॥
मुहूर्तोऽह्न्न पञ्चदशो भागस् स्याच् च निशस् तथा । ते रुद्द्रदैवताद्याश् च विज्ञैः कैश्चिदुदाहृताः ॥
मुहूर्तार्धं स्मृतो दण्डो नाडी वा घटिकाऽपि वा । घट्ट्याष् षष्टितमो भागः पलं स्याद् विघटीति वा ।

(तिथयः करणानि च)

चन्द्रस्स्याऽदर्शनाद् यानि यावद्दन्न्यददर्शनम् । दिनानि प्रथमाद्यानि तिथयस् ताः प्रकीर्तिताः ॥
प्रतिपच् च द्द्वितीया च तृतीया च चतुर्थ्यपि । पञ्चमी चैव षष्ठी च सप्तमी चाऽष्टमी ततः ॥
नवमी दशमी चैकादशी च द्द्वादशी तथा । त्रयोदशी चाऽथ चतुर्दश्श्यथो पौर्णमास्स्यमे ॥
नन्दा भद्द्रा जया रिक्ता पूर्णेति तिथयस् सिते । अशुभा मद्ध्यमाश् शस्ताश् शस्त-मद्ध्या-ऽशुभाः परे ॥
"तिथीशा वह्निकौ गौरी गणेशोऽहिर् गुहो रविः । शिवो दुर्गाऽन्तको विश्श्वे हरिः कामश् शिवश् शशी ॥"
रिक्ता षष्ठी चाऽष्टमी च द्द्वादशी दर्श एव च । अशुभास् तिथयः प्रोक्ता शेषाश्च तिथयश् शुभाः ॥
तिथ्यर्धङ् करणम् प्रोक्तङ् किंस्तुघ्नादि च तत् स्मृतम् । भद्द्रापराक्ख्या विष्टिस् तु तत्त्र त्याज्ज्या शुभे सदा ॥
करणानि तु किंस्तुघ्न-वव-वालव-कौलवाः । तैतिलश् च गरश्चापि वणिग् विष्टिर् ववादयः ॥
क्रमात् शुक्लप्रतिपदस् तिथ्यर्धेषु स्स्मृतानि हि । कृष्णपक्षान्ते शकुनिश् चतुष्पान् नाग एव च ॥

करणचक्रम्

तिथयः	शुक्लपक्षे		कृष्णपक्षे		तिथय
	पूर्वार्धे	उत्तरार्धे	पूर्वार्धे	उत्तरार्धे	
१.	किंस्तुघ्न	वव	वालव	कौलव	१
२.	वालव	कौलव	तैतिल	गर	२
३.	तैतिल	गरः	वणिग्	विष्टि	३
४.	वणिग्	विष्टि	वव	वालव	४
५	वव	वालव	कौलव	तैतिल	५
६.	कौलव	तैतिल	गर	वणिग्	६
७.	गरः	वणिग् .	विष्टि	वव	७
८.	विष्टिः	वव	वालव	कौलव	८
९.	वालव	कौलव	तैतिल	गर	९
१०.	तैतिल	गर	वणिग्	विष्टिः	१०
११.	वणिग्	विष्टिः	वव	वालव	११
१२.	वव	वालव	कौलव	तैतिल	१२
१३.	कौलव	तैतिल	गर	वणिग्	१३
१४.	गर	वणिग्	विष्टिः	शकुनिः	१४
१५.	विष्टिः	वव	चतुष्पाद्	नाग	३०

(वेदाङ्गज्योतिषकार-लगधमुनिप्रोक्त-नक्षत्त्रक्रमादिकम्)

नक्षत्त्राणि कृत्तिका च रोहिणी मृगशीर्षकम् । आर्द्रा पुनर्वसू पुष्य्यस् ततो ऽश्लेषा मघास् तथा ॥
पूर्वफल्गुन्न्यौ च फल्गुन्न्यौ तथैवोत्तरे अपि । हस्तश् चित्त्रा च स्वातिश् च विशाखे चाऽनुराधिकाः ॥
ज्येष्ठा मूलञ् च पूर्वाश् चाऽषाढास् ता उत्तरा अपि । श्रवणश् च श्रविष्ठाश् च ततश् शतभिषक् परः ॥

पूर्वभद्रपदे चैवोत्तरभभद्रपदे अपि । रेवत्त्यश्शवयुजौ चाऽपभरण्यश्चाऽप्यनुक्रमात् ॥
"अग्नि प्रजापति सोमो रुद्रोऽदितिर् वृहस्पति । सर्पाश्च पितरश् चैव भगश् चैवाऽर्यमाऽपि च ॥
सविता त्त्वष्टाऽथ वायुश् चेन्द्राग्नी मित्त्र एव च । इन्द्रो निर्ऋतिरापो वै विश्वेदेवास् तथैव च ॥
विष्णुर् वसवो वरुणोऽजएकपात् तथैव च । अहिर्वुध्न्यस् तथा पूषा अश्विनौ यम एव च ॥
नक्षत्त्रदेवता एता एताभिर् यज्ञकर्मणि । यजमानस्स्य शास्त्रज्ञैर् नाम नक्षत्त्रजं स्मृतम्॥
उग्रान्यार्द्रा च चित्रा च विशाखा श्रवणोऽश्श्वयुक् । क्रूराणि तु मघा स्वाती ज्येष्ठा मूलयं यमस्य यत्"॥
रोहिणी मृगशीर्षञ् च फल्गुन्यावुत्तरे तथा । हस्तश् चित्त्रा च स्वातिश् च अषाढा उत्तरा अपि ॥
श्रवणश् च श्रविष्ठाश् चोत्तरभद्द्रपदे तथा । रेवत्त्यश्शवयुजौ चाऽपि विवाहे तारकाश् शुभा ॥
"पञ्च भानि धनिष्ठात पञ्चकम् परिकीर्तितम् । गृहार्थन् तृणकाष्ठानां सङ्ग्रहन् तत्त्र वर्जयेत् ॥"

(विष्कम्भादियोगा)

सूर्यचन्द्रस्थितिवशाद् योगा विष्कम्भकादय : । भवन्ति तेषान् नाम्नैव विज्ञेयञ् च शुभाशुभम् ॥
विष्कम्भ प्रीतिरायुष्मान् सौभाग्यश् शोभनस् तथा । अतिगण्ड सुकर्मा च धृति शूलश् च गण्डक ॥
वृद्धिर् ध्रुवश्च व्याघातो हर्षणो वज्त्र एव च । सिद्धिस् तथा व्यतीपातो वरीयान् परिघश् शिव ॥
सिद्धिस् साद्ध्यश् शुभश् शुक्लो ब्रह्मा ऐन्द्रश् च वैधृति । इति योगास् तु सङ्कल्पे कीर्तनीया बुधैस् स्मृता ॥
व्यतीपातो वैधृतिश् च पातावुक्तौ मनीषिभि । व्यतीपाते श्राद्धमुक्तम् प्रशस्तं स्मृतिवेदिभि ॥

(वार-वारतिथियोग-वेला-विचारादिकम्)

आदित्त्यश् चाऽथ सोमश् च मङ्गलश् च बुधोऽपि च । बृहस्पतिश् शुक्र-शनी स्यु क्रमाद् वासराधिपा ॥
आदित्त्य-मङ्गल-शनैश्चरा पापा दिनाधिपा । सोमो बुधो गुरुश् शुक्रस् सौम्म्यास स्युर् वासराधिपा ॥
शुक्रे नन्दा वुधे भद्द्रा मङ्गले च जयास् तथा । शनौ रिक्ता गुरौ पूर्णास् तिथयस् सिद्धिदायिका ॥
नन्दा बुधे शनौ चाऽपि भद्द्रा भौमे जया गुरौ । रिक्ता शुक्रे त्त्वथाऽऽदित्त्ये सोमे पूर्णाऽमृताह्व्वया ॥
उद्वेगोऽथ चरो लाभोऽमृतङ् कालस् तथा शुभ । रोगोऽथोद्वेग इत्त्येवर्वं वेलाफलमुदाहृतम् ॥
उद्वेगाद्यं रवौ प्रोक्तन् तथा सोमेऽमृतादिकम् । रोगादिकम् मङ्गले तु वुधे लाभादिकन् तथा ॥
बृहस्पतौ शुभाद्यञ् च शुक्रे तु स्स्याच् चरादिकम् । शनैश्चरे स्यात् कालाद्यमहन्न्यष्टमलवे फलम् ॥
रात्रे खल्ल्वष्टमांशानाम् फलेपूद्वेगक शुभ । अमृतञ् च चरो रोग कालो लाभ इति क्रम ॥

(क्षौराभ्यङ्गादिविचार)

"षष्ठ्याम् पर्वसु पक्षादौ भद्द्रारिक्तातिथिष्व्वपि । पाते श्राद्धे व्रताहे च वर्ज्यङ् क्षौरन् निशासु च " ॥
स्नाते भुक्ते भूषिते चाऽभ्यक्ते यात्त्रोन्मुखे पि च । साम्वके गर्भिणीकान्ते न क्षौरं नवमेऽह्नि च ॥
कृत्तिकासु च रोहिण्ण्याम् मघास्स्वर्यमदैवते । अनुराधासु न क्षौरम् भानु-भौम-शनिष्व्वपि ॥
रवौ दुखं सुखं सोमे भौमे मृत्त्युर् वुधे जय । क्षौरेऽमानो गुरौ शुक्रे क्षयो दोषास् समे शनौ ॥

"षष्ठीषु तैलम् पलमष्टमीषु क्षौरक्क्रियाञ् चाऽपि चतुर्दशीषु ।
स्त्रीसेवनन् नष्टकलासु पुंसामायुक्षयार्थम् मुनयो वदन्ति ॥"

मृगशीर्षे पुनर्वस्स्वो पुष्ष्ये हस्तादिषु त्रिषु । श्रवणे च श्रविष्ठासु रेवत्त्याङ् क्षौरमिष्टदम् ॥
तैलाभ्यङ्गे रवौ तापस् सोमे शोभा कुजे मृति । वुधे लाभो गुरौ हानिश् शुक्रे दुखं शनौ सुखम् ॥
रवौ पुष्पम् मृत्तिकान् तु भौमे दूर्वाङ् गुरौ तथा । शुक्रे तु गोमयङ् क्षिप्त्वा तैलेऽभ्यङ्गो न दुष्ष्यति ॥
"अतैलं सार्षपन् तैलयं यत् तैलम् पुष्पवासितम् । अदुष्टम् पक्क्वतैलञ् च स्नानाभ्यङ्गेषु नित्त्यश ॥"

(यात्त्राविचार)

प्रतिपन्नवमीयुग्मे तृतीयैकादशीयुगे । पञ्चम्म्यां सत्त्रयोदश्श्याञ् चतुर्थीद्वादशीद्वये ॥
षष्ठ्याञ् च सचतुर्दश्यां सप्तमीपूर्णिमायुगे । द्वितीयादशमीयुग्मे षष्ठ्यमावस्स्ययो क्रमात् ॥
पूर्वादौ योगिनी वामे सुखदा पृष्ठतोऽर्थदा । दक्षिणे धनहन्त्री सा सम्मुखे मरणप्प्रदा ॥
सर्वदिग्गमने त्त्वश्शवयुजी च मृगशीर्षकम् । सिद्ध्यो हस्तस् तथा श्रोणा रेवती तारकाश् शुभा ॥
ज्येष्ठायावं वर्जयेत् पूर्वाम् पञ्चके दक्षिणान् दिशम् । रोहिण्ण्याम् पश्चिमाञ् चोत्तरफल्गुन्न्योरस् तथोत्तराम् ॥
सोमे शनौ त्यजेत् पूर्वायं यात्त्रायान् दक्षिणाङ् गुरौ । सूर्ये शुक्रे पश्चिमाञ् च उत्तरान् तु कुजे बुधे ॥

सोमे गुरौ च नाऽऽग्नेयीं रवौ शुक्क्रे न नैरृतीम् । गच्छेन् न वायवीम् भौमे नैशानीम् मङ्गले शनौ ॥
घृतं रवौ पयस् सोमे गुडम् भौमे तिलान् बुधे । गुरौ दधि यवान् शुक्क्रे माषान् भुक्त्वा व्रजेच् छनौ ॥
प्राच्च्यान् तु मङ्गले लाभो दक्षिणस्स्यां शनौ सुखम् । प्रतीच्च्यात्र् ज्ञे गुरौ सिद्धिश् शमुदीच्च्यां रवौ कवौ ॥
मेषे सिंहे धनुषि च पूर्वस्स्यान् दिशि चन्द्रमा । दक्षिणस्स्यान् दिशि वृषे कन्न्यायाम् मकरेऽपि च ॥
मिथुने च तुलायात्र् च कुम्भे पश्चिमदिश्श्यथ । कर्कटे वृश्चिके मीने चोत्तरस्स्यान् दिशि स्मृत ॥
सम्मुखे त्त्वर्थलाभस् स्यात् पृष्ठे स्यात् प्राणसंशय । दक्षिणे सुखसम्पत्तिर् वामे चन्द्रे धनक्षय ॥

मेषे सिंहे वृश्चिके स्स्याद् युधेऽब्जो भद्द्रे कर्के तौलिके सिद्धये च ।
युग्मे चापे मीनके चश् श्रिये स्यान् नार्यान् नक्क्रे कुम्भके भीतये च ॥
"करणभगणदोषवँ वारसङ्क्रान्तिदोषङ् कुलिकतिथिजदोषयँ यामयामार्धदोषम् ।
शनिगुरुबुधदोषं राहुकेत्त्वादिदोषं हरति सकलदोषत्र् चन्द्रमास् सम्मुखस्स्थ ॥"

गर्ग प्रशसत्त्युषसं शकुनत्र् च वृहस्पति । अङ्गिरा मानसोत्साहवँ विप्प्रवाक्क्यत्र् जनार्दन ॥

(नागशिरोदिग्ज्ञानम्)

भाद्द्रादिषु शिर प्राक् स्यादवाङ् मार्गादिषु त्रिषु । फाल्गुनादिषु प्रत्त्यक् चोदग् ज्यैष्ठादिषु भोगिन ॥

(होमयोग्ग्यदिनज्ञानादिकम्)

"सैका तिथिर् वारयुता कृताप्ता शेषे गुणेऽब्भ्रे भुवि वह्निनवास ।
सौक्ख्याय होमे शशियुग्मशेषे प्राणार्थनाशौ दिवि भूतले च ॥"

तिथिन् द्विग्घ्नाम् पञ्चयुताङ् कुर्यात् तष्टान् नगैस् तत । शेषे वेदे रसे खे च नेष्टा रुद्द्र्यन्यथा शुभा ॥
"द्विपुष्करे च नन्दायां ह्यमायात्र् च भृगोर् दिने । चतुर्दश्श्यात्र् च नोनानि कृत्तिकासु त्रिपुष्करे ॥

(ग्रह-राशि-तत्स्वामि-ज्ञानादिकम्)

रविश् चन्द्रो मङ्गलश् च बुधश् चैव वृहस्पति । शुक्क्रश् शनैश्चरो राहु केतुश् चैव नव ग्ग्रहा ॥
मेषो वृषश् च मिथुनङ् कर्कटस् सिंह-कन्न्यके । तुला-ऽलि-धन्न्व-मकर-कुम्भ-मीनाश् च राशय ॥
भौमश् शुक्क्रो बुधश् चन्द्रो रविश् चान्द्रिश् च भार्गव । भौमो गुरुश् शनिश्चैनिर् गुरुर् मेषादिपा क्रमात् ॥
रविर् मेषे वृषे चन्द्रो गुरु कर्कटके तथा । कन्न्यायान् तु बुधस् सौरिस् तुलायाम् मकरे कुज ॥
शुक्क्रो मीने च बलिन प्रोच्चस्स्थानस्थिता मता । तेषां स्वोच्चात् सप्तमन् तु नीचस्स्थानम् प्रकीर्तिम् ॥
रवेर् मित्त्राणीन्दुभौमजीवाश् शुक्क्रशनी रिपू । इन्दोस् सूर्यबुधौ मित्त्रे प्रोक्ते तस्स्य न कोऽप्प्यरि ॥
मित्त्राण्ण्यर्केन्दुगुरवो मङ्गलस्स्य रिपुर् बुध । बुधस्स्य तु हितौ सूर्यशुक्क्रौ चन्द्रोऽहितो मत ॥
गुरोर् हितास् सूर्यभौमेन्दवश् शत्त्रू बुध कवि । शुक्क्रस्स्य मित्त्रे तु बुध-शनी शत्त्रू रवि शशी ॥
शनेश् शुक्क्रबुधौ मित्त्रे अरयोऽर्केन्दुमङ्गला । मित्त्रारिभिन्नास् सर्वेषां समास् सर्वे प्रकीर्तिता ॥
शनिस् तृतीयन् दशमम् पञ्चमन् नवमङ् गुरु । चतुर्थमष्टमम् भौमस् सर्वे पश्श्यन्ति रम् ॥
सूर्यश् चन्द्रो बुधश् शुक्क्रस् तृतीयदशमादिकम् । युग्मकङ् क्रमश पाद-वृद्ध्या पश्श्य सर्वदा ॥

(लग्ने षड्वर्गशुद्धि)

एकविंशे तु मेषस्स्य वृषस्स्य तु चतुर्दशे । मिथुनस्स्य सप्तदशे सप्तमे कर्कटस्स्य च ॥
अष्टादशेंऽशे सिंहस्स्य कन्न्यायास् सप्तमे तथा । चतुर्दशे तुलायाश् च द्वादशे वृश्चिकस्स्य च ॥
धनुषस् स्यात् सप्तदशे मकरस्स्य चतुर्दशे । षड्विंशेंऽशे तु कुम्भस्स्य शुद्धिर् मीनस्स्य सप्तमे ॥

(सङ्क्षिप्तजातकविचार)

"लग्नात् तनुर् धनम् भ्राता सुख -पुत्त्र-रिपु-स्त्रिय । मृत्त्यु-धर्मौ च कर्माऽऽयौ व्ययो भावा क्रमादमी ॥"
लग्ने शुक्क्रो बुधो वाऽपि यस्स्य केन्द्रे गुरुर् हि वा । दशमोऽङ्गारको यस्स्य स जात कुलदीपक ॥
बुधो गुरु कविर् वाऽपि यस्स्य केन्द्रगतो वली । एकोऽपि तस्स्य किङ् कुर्यु प्रतिकूला ग्रहा परे ॥
"लग्ने शुक्क्रबुधौ यस्स्य यस्स्य केन्द्रे वृहस्पति । दशमोऽङ्गारको यस्स्य स जात कुलदीपक ॥"
तनौ सुखे च जायायाम् मृत्यौ चाऽथ व्यये कुजे । कन्न्या भर्तृविनाशाय भार्यानाशाय वै वर ॥

शुभेषु केन्द्रे च सुते च धर्मे स्थितेषु पापै परिवर्जितेषु ।
सर्वार्थसिद्धिम् प्रवदेन् नराणान् ततोऽन्न्यथास्थेषु विपर्ययत्र् च ॥

ओ३म् ।

शुद्धिपत्रम्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
घ	१९	निरग्निकाणाम्	निरग्निकानाम्
घ	३१	श्रुतिसूत्राऽननूकूल	श्रुतिसूत्राऽननुकूल
झ	१६	कात्त्ययान	कात्त्यायन
ढ	३४	-ब्रह्म्मश्रीक-	-ब्राह्म्मश्रीक-
३	२४	प्रब्ब्रंवाम	प्रब् ब्रंवाम
५	१८	गो॒भाज॒ इत॒त्	गो॒भाज॒ऽ इत॒त्
६	२४	ये ते	से ते
६	२४	वरुण ये	वरुण से
१०	६	तिर्य्यगग्-	तिर्स्सगग्-
११	६	छन्द इन्द्रन्	छन्दऽ इन्द्रन्
१५	१५	मधुद॒ द्यौर्रसत॒तु	मधुद॒ द्यौर्रस्त॒तु
१८	२	द्विर्सींमु॒तः	द्वि सींमु॒तः
१८	३५	(१४।६।९ २१)	(१४।६।९।२१)
२०	३	बिर्दधातु	बि र्दधातु
२०	३	द्विर्लिषट्टम्	द्वि र्लिषट्टम्
३६	६	याऽसम्मान्	साऽसम्मान्
५७	३२	चरयद्ध्वं	वरयद्ध्वं
६१	२६	पितर॒ एह	पितर॒ऽ एह
७४	२७	सवैरेव	सर्वैरेव
९७	२४	उत्सृजे	उत्सृज्ये
११२	१९	ता नऽ उ॒र्जु॒जे	ता नऽ ऊ॒र्जु॒जे
१२४	१६	ब्रह्म्मश्रीक	ब्राह्म्मश्रीक
१२४	१८	सामाजकैः	सामाजिकैः
१३८	२	नाऽब्दे	नाऽब्दे
१३९	३८	षष्ठ्यमावास्स्ययोः	ऽष्टम्यमावास्स्ययोः
१४०	२४	स्थिता मता।	स्थिता मताः।
१४०	२४	प्रकीर्तिम्॥	प्रकीर्तितम्॥
१४०	२९	पश्यन्ति मम्॥	पश्यन्ति सप्तमम्॥
१४०	३०	पश्य सर्वदा॥	पश्यन्ति सर्वदा॥

अस्माकम् प्रकाशिताः प्रकाशनीयाश् च के चन ग्रन्थाः

(नैपालीयभाषायाम्)

१. आदिकवि भानुभक्त आचार्यको सच्चा जीवनचरित्र (२०३६) नै. रू. ५०/-
२. वृत्तनक्षत्रमाला (छन्दोग्रन्थः, २०२८) नै. रू. १/-
३. जिम्दो नेपालि भासा (भाषाव्याकरणसिद्धान्तग्रन्थः, प्र.ख. २०३०) नै. रू. ३/१०
४. जिम्दो नेपालि भासा (द्वितीयखण्डात्मकः, २०३७) नै. रू. १०/-
५. नेपाली वर्णोच्चारणशिक्षा (साझाप्रकाशनेन प्रकाशिता, २०३१) नै. रू. ११/१५
६. वैदिक धर्म मूल रूपमा (२०४५) नै. रू. १००/-

(संस्कृतभाषायाम्)

७. काव्यप्रकाशः हैमवत्त्या संस्कृतव्याख्यया सहितः,
मोतीलाल-बनारसीदास-प्रकाशितः, वाराणस्याम् (१९८०) भा. रू. ८०/-
८. कतिपय-नैपाल-संस्कृतग्रन्थकारपरिचयः (२०४८) नै. रू. ४०/- भा. रू. २५/-
९. चतुर्वर्गसुभाषितपीयूषपिन्वनकम्।
१०. नारायणपण्डितकृतो हितोपदेशः आचार्यकौण्डिन्न्यायनप्रतिसंस्कृतः।
११. माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायि-निरग्निक-द्विज-सदाचारकर्म-
संस्कारकर्म-श्राद्धकर्मादि-वैदिकमन्त्रसङ्ग्रहः नै. रू. १००/- भा. रू. ६५/-
१२. माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिनिरग्निकवेदनिष्ठद्विज-
नित्यसदाचारकर्म-संस्कारकर्म-श्राद्धकर्मादिपद्धतयः।
१३. माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखाद्ध्यायिनां स्वशाखीय-मन्त्र-ब्राह्मण-
श्रौतसूत्र-गृह्यसूत्रपरिशिष्टादिसङ्ग्रहरूपः स्वाद्ध्यायसङ्ग्रहः सटिप्पणः।
१४. कौण्डिन्न्यायनशिक्षा [प्रातिशाख्यादिसर्वसंस्कृतशिक्षाग्रन्थसमीक्षागर्भा
महाशिक्षा, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयेन वाचस्पतिः (डि. लिट्.)
इत्युपाधये स्वीकृता, २०४९] नै. रू. ६६०/- भा.रू. ४००/-
१५. कात्त्यायनश्रौतसूत्रम् सपरिशिष्टम् अनेकव्याख्यानयुतम्।
१६. पारस्करगृह्यसूत्रम् सपरिशिष्टम् अनेकव्याख्यानयुतम्।
१७. पाणिनीयव्याकरणम् आचार्यकौण्डिन्न्यायनपरिष्कृतम् वेदपरक-व्याख्यानयुतम्।
१८. वेदभाषानिघण्टुः (कौण्डिन्न्यायनकोषः) वैदिक-लौकिक-संस्कृतशब्दानां
सङ्ग्रहेण अमरकोषशैल्याम् आचार्यकौण्डिन्न्यायनेन रचितः।
१९. वेदभाषानिघण्टुः (कौण्डिन्न्यायनकोषः) भूलोककाण्डान्तर्गतदेववर्गब्रह्मवर्गात्मकस्
सप्रस्ताविकश् शब्दानुक्रमणिकासहितः (२०५०) नै. रू. ४०/- भा. रू. २५/-
२०. छन्दस्सूत्रम् ब्राह्मणादिग्रन्थप्रतिपादितच्छन्दस्तत्त्वप्रकाशनव्याख्यानयुतम्।
२१. वेदाङ्गज्योतिषम् लगधकृतम् वैदिकव्याख्यानयुतम्। (२००५) भा.रू. ४५०/- / ४००/-
२२. जैमिनीय-धर्ममीमांसासूत्रम् कौण्डिन्न्यायनवृत्तियुतम्।
२३. बादरायणीय-ब्रह्ममीमांसासूत्रम् कौण्डिन्न्यायनवृत्तियुतम्। (२००७) भा.रू. २००/-
२४. माद्ध्यन्दिनीयवाजसनेय्यौपनिषदोपासनादिकर्मप्रयोगकल्प आचार्यकौण्डिन्न्यायनविरचितः।
२५. काशिनिवासिभिर् विद्वद्भिर् ब्राह्मणैर् दत्ता भारतवर्ष-बहिर्गमन-विधर्मिविदेशि-
सहवाससहभोजनादिदुरित-प्रायश्चित्तव्यवस्था (२०४९) नै.रू. ४०/- भा. रू. २५/-
२६. व्यावहारिकं संस्कृतम् [प्रथमम् पुस्तकम्] (२०५०) नै. रू. २०/-
२७. व्यावहारिकं संस्कृतम् [द्वितीयम्, तृतीयम्, चतुर्थम्, पञ्चमञ् च पुस्तकम्]
२८. पाणिनीयशिक्षा वेदाङ्गशिक्षाविमर्शाख्यव्याख्यानसहिता। (२००७) भा.रू. ४५/-